उवरिदणं अलिंदअं आरुहिअ, अज्ज चारुदत्तं पेक्खस्सं॥ इति निष्क्रांताः सर्वे॥ इति द्यूतकरसम्वाहकानामहिती
योंकः॥ अथतृतीयोंकः॥ ततः प्रविशति चेटः॥ चेटः॥ सुअणो हु भिच्चानुकंपके सामिए निग्घणे वि सोहदि; पिसु

णो अणब्भग्गविदे दुक्केले खु परिणामदारुणे॥ सुअणो हु कुणिअपालए, धणहीणे अपहूवि सोहदि; पिशुणो उण द
ब्भग्गविदे, णअ छलीविहवावलेविदे॥ अपिच॥ शरपलकबलेहं ण शक्कि वालिदुं; अण्णकलन्तपशन्ते ण शक्कि
॥ वालिदुं; सूरपशन्त मणुशो ण शक्कि वालिदुं; जेवि सहाविअदोशो ण शक्कि वालिदुं॥ १॥ कावि वेला अज्ज
चारुदत्तस्स गंधव्वं सुणिदुं गदस्स अदिक्कमदि अत्थलाणी, अज्जावि णागच्छदि॥ ता जाव, बाहिरदुआरसा
लाए गदुअ सुक्खिस्सं॥ तथा करोति॥ ततः प्रविशति चारुदत्तो विदूषकश्च॥ चारु॥ अहो साधु, साधु, रेभिलेन गीतं
॥ वीणा हि नाम॥ असमुद्दोत्थितं रत्नं॥ कुतः॥ उत्कंठितस्य हृदयानुगुणा वयस्या, संकेतवेश्मगमनं प्रवरा विनो
दः संस्थापना प्रियतमा विरहातुराणां, रक्तस्य रागपरिवृत्तिकरः प्रमोदः॥ १॥ विदू॥ भो, एहि गेहं गच्छस्म॥ चा

रू॥अहो सुष्ठु भावेरगिलेन गीतं॥विदू॥मम दाव देवेहिं जेव्व हस्सं जा अदिइत्थिआ ए सक्कदं पढंतीए, मणुस्सेण अक्का
अली गाअंतेण। इत्थिआ॥दाव सक्कदं पढंती, दिण्णणवणस्साविअ गिट्ठी अधि अं सुणुआ अदि; मणुस्सोवि का
अली गा अंतो, सुमुखसुमणोदामवेट्ठिदो बुद्धपुरोहिदो विअ मंतं जवंतो, दिट्ठं मे णारोअदि॥चार॥वयस्य सुष्ठु खल्वि
त्थ गीतं भावेरगिलेन; नच॥भवान् परितुष्टः॥रक्तं च, नाम, मधुरं च, समं स्फुटं च, भावान्वितं च, ललितं च, मनोहरं च; किंवा प्रशस्तवचनैर्बहुभिर्मदीये, रंतर्हिता यदि भवेदनितेति मन्ये॥१॥अपिच॥तं तस्य स्वरसंक्रमं मृदुगिरः, श्लिष्टं च तंत्रीस्वनं, वर्णानामपि मूर्छनांतरगतं, तारं विरामे मृदुं; हेलासंयमितं पुनश्च, ललितं रागद्विरुच्चारितं, यत्सत्यं विरतेऽपि गीतसमये, गच्छामि शृण्वन्निव॥१॥विदू॥भो व अस्स, आवणंतर रत्ता विहा एसु सुहं कुक्कुरावि सुत्ता,
ता गेहं गच्छम्ह॥अग्गतो, वलोक्य॥व अस्स, पेक्ख, पेक्ख, एसोवि अंधआरस्स विअ अवआसं देन्तो, अंतरि

क्ख पासादादो ओरदि भअवं चंदो॥चार॥साम्यगाह भवान्॥असो हि दत्वा तिमिरावकाशमस्तं व्रजत्युन्नतकोटिरिंदुः, जलावगाढस्य वनद्विपस्य तीक्ष्णं विषाणाग्रमिवावशिष्टं॥विदू॥भो, एदं अम्हाणं; वट्टमाणआ, उद्देहि दुआरअं॥चेटः॥अज्ज मित्तेअ शलभ, ओए शअणीअदि; आगदे अज्जचालुदत्ते। ता जाव दुआलअं शोदेमि॥तथा कृत्वा॥अज्ज॥वंदामि; मित्तेअ तुमंपि वंदामि॥एत्थ वित्थिण्णे आसणे णिसीदंतु अज्जा॥उभौ नाट्येन प्रविश्य उपविशतः॥विदूषकमाणआ, रअणिअं सद्दावेहि पादाइं धोइदुं॥चार॥सानुकंपं॥अलं सत्सजनं प्रबोधयितुं॥चेट॥अज्ज मित्तेअ; अहं पाणिअं गेण्हे तुमं पादाइं धोवेहि॥विदू॥भो वअस्स, एसो दाणिं दासीए पुत्तो भविअ, पाणिअं गेण्हेदि, मंउज्जं वंभणं पादाइं संधावेदि॥चार॥वयस्य मैत्रेय, त्वमुदकं गृहाण, वर्धमानकः पादौ प्रक्षालयतु॥चेटः॥अज्ज मित्तेअ,

॥देहि उदअं॥विदू॥तथा करोति॥चेटः॥चारुदत्तस्य पादौ प्रक्षाल्यापसरति॥चारु॥दीयतां आत्मनस्य पादोदकं॥
विदू॥किं मम पादोदएहिं भूमीए जेव्व मए गहेण विअ पुणोवि लोट्टिदव्वं॥चेटः॥अज्ज मित्तेअ वत्सणे खु तुमं
॥विदू॥जधा सव्वणागाणं मज्झे डुंडुहो तधा सव्व वत्सणाणं मज्झे अहं वत्सणो॥चेटः॥अज्ज मित्तेअ तधावि धो
इस्सं तथा कृत्वा अज्ज मित्तेअ एदं ते सुवण्णभंडअं मम दिवा तुह रत्तिं च ता गेह॥इति दत्वा निष्क्रांतः॥विदू॥
॥गृहीत्वा अज्जवि एदं विदुदि किं एत्थ उज्जइणीए चोरोवि णत्थि जो एदं दासीए पुत्तो णिद्दाचोरं णावहरदि॥
भो केअस्स अभंतरचतुःसालअं पवेस आमि णं॥चारु॥अले चतुःशालमिमं प्रवेशय प्रकाशनारीधृतएष यस्मा
त्॥तस्मात्स्वयं धारय विप्र तावद्यावन्न तस्याः खलु भोः समर्प्यते॥निद्रां नाटयन्॥तं तस्य स्वरसंयममिति पुनः पठ

ति॥विदू॥अवि णिद्दाअदि भवं॥चारु॥अथ किं॥इयं हि निद्रा नयनावलंबिनी ललाटदेशादुपसर्पतीवामां॥अहश्य
रूपा चपला जरेव मनुष्यसत्वं परिभूय वर्त्तते॥१॥विदू॥ता सुवेत्म॥नाट्येन स्वपितः॥ततः प्रविशति शार्विलकः॥
शार्विलकः॥कृत्वा शरीरपरिणाहसुखप्रवेशं शिरावलेन च बलेन च कर्ममार्गः गच्छामि भूमिपरिसर्पणघृष्टपार्श्वो
निर्मुच्यमानइव जीर्णतनुर्भुजंगः॥२॥नगो ऽवलोक्य सहर्षं॥अये कथमस्तमुपगतोऽसि स भगवान्मृगांकः॥
तथाहि॥नृपतिपुरुषशंकितप्रचारं परगृहदूषणनिश्चितैकवीरं॥घनतिमिरनिरुत्यमर्त्यभावा रजनिरियं जननी
व संसृणोति॥कृष्णवाटिकापरिसरे संधिं कृत्वा प्रविष्टोस्मि मध्यमकं तावदिदानीं चतुःशालकमपि दूषयामि
॥भोः॥कामिनी चमिदं वदंति पुरुषाः स्वप्ने च यद्दृश्यते विश्वस्तेषु च वंचनापरिणवश्चौर्यं न शौर्यं हि तत्॥स्वा

धीना वचनोपतोपि हि वरं वक्त्योन सेवांजलिर्मार्गोत्थेष नरेंद्रसोसिकबधे पूर्वं कृतोद्योगिना॥ तत्कस्मिंनु देशे संधिमुत्पादयामि॥देशः कोनु जलावसेकशिथिलोयस्मिन्न शब्दोभवेद्दित्तीनांच न दर्शनोतरगतः संधिः करालोभवेत्॥सारस्त्रीणतया च लोष्टकठिनं जीर्णं क हर्म्यं भवेत्॥कस्मिन्स्त्रीजनदर्शनंच न भवेत्स्यादर्थसिद्धिश्च मे॥१॥ गिन्निं परामृश्य॥नित्यादित्यदर्शनोत्कसेचनेन दूषितेयं भूमिः॥सारस्त्रीणा॥भूषिकोत्कश्चेह हंत सिद्धोयमर्थः॥यथमेतत् स्कंदपुत्राणां शिथिलश्रमं॥अत्र कर्मारंभे कीदृश मिदानीं संधि मुत्पादयामि॥इह खलु भगवता कनकशक्तिना चतुर्विधः संध्युपायोदर्शितः॥तद्यथा॥पंकेष्टकानामाकर्षणं॥आमेष्टकानांछेदनं॥पिंडमयानां सेचनं॥काष्ठमयानां पाटनमिति॥तत्र पंकेष्टके इष्टिकाकर्षणं तत्र पश्यव्या

कोशं॥भास्करं॥बालचंद्रं॥वापीविस्तीर्णं॥स्वस्तिकं॥पूर्णकुंभं॥तत्कस्मिन् देशे दर्शयाम्यात्मशिक्षां॥दृष्ट्वा श्वो यं यद्विस्मयं यांति पौराः॥तत्र पंकेष्टके पूर्णकुंभएव शोभते॥तमुत्पादयामि॥अन्यासु गिन्निषु मया निशि॥पाटितासु॥सारस्तासु॥विषमासु च कल्पनासु॥दृष्ट्वा प्रभातसमये प्रतिवेशिवर्गो॥दोषांश्च मे वदंति कर्मणि कौशलंच॥१॥नमो॥वरदाय कुमारकार्तिकेयाय॥नमः कनकशक्तये॥ब्रह्मण्याय देवाय देवव्रताय॥नमो॥भास्करनंदिने॥नमोयोगाचार्याय॥यस्याहंप्रथमः शिष्यः॥तेन च परितुष्टेन योगरोचना मे दत्ता॥अनया हि समालब्धं न मां इस्यंति रक्षिणः॥शस्त्रंच पतितं गात्रे रुजं नोत्पादयिष्यति॥२॥ तथा करोति॥धिक्कष्टं प्रमाणसूत्रं मे विस्मृतं॥विचिंत्य॥ओं इदं यज्ञोपवीतं प्रमाणसूत्रं भविष्यति॥यज्ञोपवीतं हि नाम॥ब्रा

त्मणस्य महदुपकरणद्रव्यं विशेषतोऽस्माद्विधस्य ॥कुतः॥एतेन मापयति भित्तिषु कर्म मार्गं मेतेन मोचयति ॥भूषणसंप्रयोगान्॥उद्घाटकोभवति यंत्रदृढे कपाटे दृष्टस्य कीटभुजगेः परिवेष्टनंच ॥१॥मापयित्वा कर्म समारभे ॥तथा कृत्वावलोक्य च॥एकलेशावशेषोऽयं संधिः॥धिक्कष्टं॥अहिना दष्टोस्मि॥यज्ञोपवीतेनांगुलीं बध्वाविषवेगं नाटयति॥चिकित्सां कृत्वा स्वस्थोऽस्मि॥पुनः कर्मकृत्वा दृष्ट्वा च॥अये ज्वलति प्रदीपः॥तथाहि॥शिखा प्रदीपस्य सुवर्णपिंजरा महीतले संधिमुखेन निर्गता॥विभाति पर्यंततमः समावृता सुवर्णरेखेव कषे निवेशिता॥पुनः कर्म कृत्वा॥समाप्तोऽयं संधिः॥भवतु॥प्रविशामि॥अथवा न तावत्प्रविशामि प्रतिपुरुषं निवेशयामि॥तथा कृत्वा॥अयेन कश्चित्॥नमः कार्तिकेयाय॥प्रविश्य दृष्ट्वा च॥अये पुरुषद्वयं सुप्तं भवतु आत्मरक्षार्थं द्वारमुद्घाटयामि कथंजीर्णत्वाद्गृहस्य विरोति कपाटः॥तद्यावत्खलिलमन्वेषयामि॥कुतो खलु॥सलिलंगृहीत्वा क्षिप्तं सशंकं॥मा तावत् भस्मो पतत् शब्दमुत्पादयेत्॥भवत्वेवंतावत्॥पृष्ठेन प्रतीक्ष्य कपाटमुद्घाट्य॥भवत्वेवंतावदिदानीं परीक्ष्ये किं लक्ष्यसुप्तमुत परमार्थसुप्तमिदं द्वयं॥त्रासयित्वा परीक्ष्य च॥अये परमार्थसुप्तेनानेन भवितव्यं॥तथाहि॥निःश्वासास्य न शंकितः सुविशदः स्वप्नांतरं वर्तते दृष्टिर्गोदनिभालिता न विकला नाभ्यंतरंचंचला॥गात्रं स्वस्तशरीरसंधिशिथिलं शेया प्रमाणाधिकं दीपंचापि न मर्षयदग्निमुखं स्यालक्ष्यसुप्तं यदि॥२॥समंतादवलोक्य॥अये कथं मृदंगः॥अयं दर्दुरः॥अयं पणवः॥इयमपि वीणा॥एते वंशाः॥अमी पुस्तकाः॥कथं नाट्याचार्यस्य गृहेमिरं॥अथ

२८

वा। भवनप्रत्ययात्वविष्टोस्मि। तत्किं परमार्थदरिद्रोऽयं। उत राजाभयाद्वोराद्वा भूमिष्ठं द्रव्यं धारयति। तन्मया
पि नाम शर्विलकस्य भूमिष्ठं द्रव्यं प्रक्षिपामि॥ तथा कृत्वा॥ निक्षिप्तं बीजं न क्वचित्स्कारी भवति। अये॥ पर
मार्थदरिद्रोऽयं। भवतु गच्छामि॥ विदू॥ उत्स्वप्नायते॥ भो वअस्स। संधी विअ दिज्जदि। चोरं विअ पेक्खामि।
ता गेण्ह दुवं एदं सुवण्णभंडअं॥ शर्वि। किंनु खल्वयमिह मां प्रविष्टं ज्ञात्वा दरिद्रोऽस्मीति उपहसति, तत्किं
व्यापादयामि। उत लघुत्वादुत्स्वप्नायते॥ दृष्ट्वा॥ अये। जर्जरस्नानशाटीनिवस्त्रं दीपप्रभयादीपितं सत्यमेवेतद् ३९
लंकरणभांडं। भवतु गृह्णामि। अथवा। नयुक्तं तुल्यावस्थं कुलपुत्रजनं पीडयितुं। तद्गच्छामि॥ विदू॥ भो व अ
स्स। साविदोसि गोवत्तणकामाए। जइ एदं सुवण्णभंडअं णं गेण्हसि॥ शर्वि॥ अनतिक्रमणीया भगवती

॥ गोकाम्या ब्राह्मणकाम्याच॥ गृह्णाति॥ अथवा। ज्वलति प्रदीपः। अस्ति च मया प्रदीपनिर्वापणार्थमाग्ने
यः कीटोधार्यते। तंतावत्प्रवेशयामि॥ तथा कृत्वा॥ अये निर्वापितः प्रदीपः। तस्यायंदेशकालप्राप्त मुक्तोम
या कीटोयात्येवास्य दीपस्योपरि मंडलं विचरति। एष पक्षवातानिलेन निर्वापितोऽतिपीडन। धिक्कृतमंध
कारं। अथवा। मयापि अस्मद्ब्राह्मणकुले। धिक्कृतमंधकारं। अहं हि चतुर्वेदविदः प्रतिग्राहकस्य पुत्रः। श
र्विलको नाम। ब्राह्मणो। गणिकामदनिकार्थमकार्यमनुतिष्ठामि॥ इदानीं करोमि ब्राह्मणस्य प्रणयमिति॥
जिघृक्षति॥ विदू॥ भो वअस्स। सीदलो। दे अग्गहत्थो॥ शर्वि॥ धिक्कृमारः। सलिलसंपर्कशीतलो मे। ग्रह
स्तः। भवतु। कक्षयोर्हस्तं प्रक्षिपामि॥ नाट्येन सव्यहस्तमुष्णीकृत्य गृह्णाति॥ विदू॥ गहिदं॥ शर्वि। अनति

क्रमणीयो ऽयं ब्राह्मणप्रलयः॥तद्गृहीते॥विदू॥दाणीं विक्कणिरं पुण्णा विअ वाणिओ ऽहं सुहं सुविस्सं॥
॥शर्वि॥महाब्राह्मण स्वपिहि वर्षशतं॥कष्टमेवं मरनिकागणिकार्यं ब्राह्मणकुले नमसि पातितं॥अथवा
आत्मापातितः॥धिगस्तु खलु दारिद्र्यमनिर्वर्तितपौरुषं यदेतद्गर्हितं कर्म निंदामि च करोमि च॥तद्यावन्म
रनिकायानिष्क्रयणार्थं वसंतसेनागृहंगच्छामि॥परिक्रम्यावलोक्य च॥अये पदशब्द इव मां नामरक्षिणः॥भ
वतु स्तंभमुत्खा निष्क्रामामि॥अथवा ममापि नामशर्विलकस्य रक्षिणः॥यो हे॥मार्जारः क्रमणो मृगः प्रसरणो
ह्येनोगृहालुंचने सुप्तासुप्तमनुष्यवीर्यतुलने श्वा सर्पणो पन्नगः॥मायाकूपशरीरवेशरचने वाग्देशभाषांत
रे द्वीपारात्रिषु संकटेषु दुडुभो वाजी स्थले नोर्जले॥२॥अपिच॥भुजगइव गतौ गिरिः स्थिरत्वे पन्नग

तेः परिसर्पणे च तुल्यः॥शशइव भुवनावलोकनेहं वृकइव च ग्रहणे वेले च सिंहः॥२॥प्रविश्य रदनिका॥
हत्थी बाहिरदुआरशालाए परुत्तोवट्टमाणओ सोवि एत्थ ण दीसइ॥भोदु अज्जमित्तेअं सद्दावेमि॥इति
परिक्रामति॥शर्वि॥रदनिकां हंतुमिच्छति निरूप्य॥कथं स्त्रीभवतु गच्छामि॥इतिनिष्क्रांतः॥रद॥गत्वा स
त्रासं॥हत्थी हत्थी अत्ताणं गेहे संधिं कप्पिअ चोरो णिक्कमति॥भोदु मित्तेअं गदुअ पवोधेमि॥
विदूषकमुपगम्य॥अज्ज मित्तेअ उट्ठेहि उट्ठेहि अत्ताणं गेहे संधिं कप्पिदे चोरो णिक्कंतो॥विदू॥उत्था
य॥आः दासीए धीए किं भणासि चोरो कप्पिअ संधिं णिक्कंतो॥रद॥हदास अलं परिहासेण किं
ण पेक्खसि एदं॥विदू॥आः दासीए धीए किं भणासि दुट्ठिअं विअ दुआरअं उग्घाडिदत्ति॥भो कअ

स्स चारुदत्त उट्ठेहि उट्ठेहि ब्राह्मणं गेहे संधिं दइअ चोरो णिक्कंतो ॥ चारु० भवतु भोः अलं परिहासेन ॥ विदू० भो एसो परिहासो फक्खदु भवं ॥ चारु० कस्मिन्नुद्देशे ॥ विदू० भो एसो ॥ चारु० विलोक्य ॥ अहो दर्शनीयो ऽयं संधिः ॥ उपरितलनिपातितेष्टको ऽयं शिरसि तनुर्विपुलश्च मध्यदेशो ॥ असदृशजनसंप्रयोगभीरोर्हृदयमिव स्फुटितं महारहस्य ॥ २ ॥ कथमस्मिन्नपि कर्मणि कुशलता ॥ विदू० भो वअस्स अअं संधी दुवेहिं जेव्व दिण्णो भवे आदु आगंतुणा सिक्खदुकामेण वा अंणधा इध उज्जइणीए को अत्ताणं घरं विहवं ण आणादि ॥ चारु० वेदेनूयेन कृतोऽवेन्मम गृहे व्यापारमभ्यस्यता नोसो वेदितवान्धनैर्विरहितं विस्रब्धसुप्तं जनं ॥ दृष्ट्वाग्रहती निवासरचनामस्माकमाशान्वितः संधिछेदनखिन्नएष सुचिरं पश्चान्नि

राशोगतः ॥ २ ॥ ततः सुहृद्भः किमसौ कथयिष्यति तपस्वी सार्थवाहस्तस्य गृहं प्रविश्य न किंचिन्मया समारादितमिति ॥ विदू० भो कधं तं जेव्व चोरहदअं अणुसोचेमि ॥ तेण चिन्तिदं महंतं एदं गेहं इदो रअणभंडअं सुवण्णभंडअं वा णिक्कामइस्सामि ॥ स्मृत्वा सविषादमात्मगतं ॥ कहिं तं सुवण्णभंडअं ॥ पुनरनुस्मृत्य प्रकाशं ॥ भो वअस्स तुमं सव्वकालं भणासि मुक्खो मित्तेअओ अपंडिदो मित्तेअओत्ति सुट्ठुमए कदं तं सुवण्णभंडअं भवदो हत्थे समप्पअंतेण अंण्णधा दासीए पुत्तेण अवहदं भवे ॥ चारु० अलं परिहासेन ॥ विदू० भो जह णाम अहं मुक्खो किं ता परिहासस्सावि देसआलं ण आणामि ॥ चारु० कस्यां वेलायां ॥ विदू० भो जदा तुमं मए भणिदोसि सीदलो दे अग्गहत्थो ॥ चारु० कदाचि

देवमपि स्यात्॥सर्वतोनिरूप्य महर्षे॥वयस्य॰दिष्ट्या ते प्रियंस्य निवेदयामि॥विदू॥किं ण अवहदं॥
चारु॰हते॥विदू॥तधावि किं पियं॥चारु॥यदेसो कृतार्थोगतः॥विदू॥णासो क्खु सो॥चारु॥कथं
॥न्यासः॥मोहमुपगतः॥विदू॥समःस्ससदु भवं जइ णासो चोरेण अवहरो तुसंवि किं मोहमु
पगदो॥चारु॥समाश्वस्य॥वयस्य॰॥कः श्रद्धास्यति॰भृतार्थं सर्वोमां तुलयिष्यति॥शंकनी
याहि लोकस्मिं निःश्रतापा॰दरिद्रता॥१॥भोः कष्टं॰॥यदि तावत्कृतांतेन श्रणयो॰र्थेषु मे कृतः॥ ४२
किमिदानीं नृशंसेन चारित्रमपि दूषितं॥१॥विदू॥अहं खु अवलविस्सं॥केण दिण्णं केण गहि
नि दं॰कोवा सक्खिं॥चारु॥अहमिदानीं सत्यमधिष्ठास्ये॥भोस्यणाभ्यर्जयिष्यामि पुनर्न्यासक्रियां

यं॰अनृतंन्नाधिष्ठास्यामिचारित्रभंशकारणं॥१॥रद॥ता जाव अज्जाधूदाए गदुअ णि
वेदेमि इति निष्क्रांता॥प्रविश्य चेट्या सह चारुदत्तवधूः॥वधूः ससंभ्रमं॥अइ सच्चं अवरिक्खदसरीरो
॥अज्ज उत्तो॰अज्जमित्तेएण सह॥चेटी भट्टिणि॰सच्चं॰किंतु जो सो वेस्साजणकेरको अलंकारओ सो
॥अवहदो॥वधूः मोहं नाद्यति॥चेटी॥समस्सदु अज्जा धूदा॥वधूः समाश्वस्य॥हंजे किं भणासि॰अ
वरिक्खदसरीरो॰अज्ज उत्तोत्ति॥वरं हालिं सो सरीरेण परिक्खदो णउण चारित्तेण॥संपदं॰उज्ज
इणीए जणो एवं मंतइस्सदि॰दलिद्दाए अज्ज उत्तेण जेव्व ईदिसं अकज्जं अनुचिट्ठिदंति॥ऊर्ध्वमव
लोक्य निश्वस्य च॥अयं कअंत॰पोक्खरवत्तपडिदजलविंदुचंचलेहिं कीलसि दलिद्दपुरिसाणा अधेए

हिं॥ इ अंच मे एक्का मादुधरत्था र अणावली चिट्ठदि। एदं अदिणीदरुआए अज्ज उत्तो ण गेहिस्स
दि हंजे, अज्ज मित्तेअं दाव सद्दावेहि॥ चेटी जं अज्जा धूदा धूदा आणवेदि॥ विदूषकमुपगम्य॥ अ
ज्ज मित्तेअ, धूदा दे सद्दावेदि॥ विदू कहिं सा॥ चेटी। एसा चिट्ठदि उवसप्प॥ विदू॥ उपसृत्य॥ सो त्थि
ओरीए॥ वधूः अज्जं वंदामि; अज्ज पुरत्थि आमुहो होहि॥ विदू॥ एस भोदि पुरत्थि आमुहो संवुत्तो
म्हि॥ वधूः अज्ज पडिच्छ इमं॥ किं एदं॥ वधूः॥ अहं खु र अणेसदिं उववसिदा आसिं, तहिं जधा
विहवाणुसारेण वत्तणो पडिग्गाहिदव्वो, सो अणापडिग्गाहिदो, ता तस्स कदे पडिच्छ इमं र अणामा ४२
लिअं॥ विदू॥ गृहीत्वा॥ सो; गमिस्सं पि अवअस्सस्स णिवेदेमि॥ वधूः। अज्ज मित्तेअ, मा खु मं ल
त्थि

ज्जावेहि॥ इतिनिष्क्रांता॥ विदू॥ सविस्मयं॥ अहो से महाणुभावदा॥ चारु॥ अये चिरयति मैत्रेयः॥ मा
नाम चेटकुट्याटकायंकुर्यात्॥ मैत्रेय, मैत्रेय॥ विदूःउपसृत्य॥ एसोत्ति; गेण्ह एदं॥ रत्नावली दर्शयति॥ चा
रु॥ किमेतत्॥ विदू॥ भो, जं दे सरिसदारसंगहस्स फलं॥ चारु॥ कथं, आत्मनी मामनुकंपते॥ कष्टमिदा
नीमस्मिद्दरिद्रे:॥ आत्मभाग्यक्षतद्वेषः स्त्रीद्वेषेणानुकंपितः॥ अर्थतः पुरुषो नारी या नारी सार्थतः पुमा
न्॥ २॥ अथवा। नाहं दरिद्रः। यस्य मम, विभवानुगता गाथा, सुखदुःखसुहृद्यान्॥ सत्यं च न परिभ्र
ष्टं, यद्दरिद्रेषु दुर्लभं॥ २॥ मैत्रेय, गच्छ रत्नावलीमादाय वसंतसेनायाः सकाशंवक्तव्या च सा मद्वचना
त्॥ यत्त्वल्वस्माभिः सुवर्णभांडमात्मीयमिति कृत्वा विस्रंभात् द्यूते हारितं, तस्य कृते गृह्यतामिति

रत्नावलीति॥ विदू मा दाव॰ अक्खाइदस्स॰ अभुत्तस्स॰ अप्पमुक्कस्स॰ चोरेहिं अवदस्स॰ कारणा
दो॰ चदुस्स मुहसारभूदा र अणावली दी अदि॥ चारु॥ वयस्य मामेवं॥ यं समालंब्य विश्वासं न्या
सो॰ स्मासु तया कृतः तस्येत्तन्महतोमूल्यं प्रत्ययस्येवदीयते॥१॥ तद्यस्य॰ अस्मत्कुरीरस्पृष्टिकया
॥शापितोसि॰ नेनामग्राहयित्वात्रागंतव्यं॥ वर्धमानक॰ एताभिरिष्टिकाभिः संधिः क्रियतां॥
रुसंहतः शीघ्रं। परिवादबहलदोषान्न यस्य रक्षां परिहरामि॥ वयस्य मैत्रेय॰ भवतापिकृपणशो
डीर्यमभिधातव्यं॥ विदू भो दलिद्दोकिं अकिविणं मंतेदि॥ चारु॥ अदरिद्रोस्मि सखे। यस्य मम
॥विभवानुगता भार्येत्यादि पुनःपठति तद्गच्छतु भवान्। अहमपि कृतशौचः संध्यामुपासे इति नि

४४

ष्क्रांताः सर्वे संधिच्छेदोनाम तृतीयोंकः समाप्तः॥ अथ चतुथोंकः॥ ततः प्रविशति चेटी। चेटी। आणत्तस्मि
॥अन्ताए॰ अज्जआस आसं गंतुं एसा अज्जआ चित्तफलहणिसण्णदिट्ठीमद्दणिआ ए सह किंपि
मंतअंती चिट्ठदि ता जाव उवसप्पामि॥ इति परिक्रामति॥ ततः प्रविशति यथानिर्दिष्टा वसंतसेना
मदनिका च॥ वसं। हंजे मअणिए॰ अवि सुसदिसी इअं चित्ता किदी अज्जचारुदत्तस्स॥ मद
॥सुसदिसी वसं कधं तुमं जानासि॥ मद जेण अज्ज आए सुसिणित्था दिट्ठी अणुलग्गा॥ वसं हं
जे किं वेसचासदक्खिण्णेण म अणिए एवं भणासि॥ मद अज्जए॰ किं जो जेव्व जणो वेसे पडिवसदि॰
सो जेव्व अली अदक्खिणो होदि॥ वसं हंजे॰ णाणापुरिससंगेण वेसा जणेण अलि अदक्खिणा होदि

॥महाजेहो दाव अज्ज आए दिट्ठो इध अभिरमदि, हि अज्जं च। तस्स कारणं किं पुणो अदि॥ वसं। हंजे, सही अणादो उवहसणी अदो दिक्खामि॥ मद॥ अज्जए एवं णोदं। सही जणा चिन्ताणुवंती अवलोअणो णोदि॥ प्रथमा चेटी॥ उपसृत्य॥ अज्जए अत्ता आणवेदि। गहिदावगुंठणं पक्खदु आरए सज्जे पवहणं ता गच्चेत्ति॥ वसं हंजे, किं अज्ज चारुदत्तो मे णइस्सदि॥ चेटी॥ अज्जए, जेण पवहणेण सह सुवण्णदसाहस्सिअ अलंकारअ अणुप्पेसिदो॥ वसं॥ को उण से॥ चेटी॥ एसो जेव्व राअसालसंठाणो॥ वसं॥ सक्रोधं॥ अवेहि, मा पुणो एवं भणिस्ससि॥ चेटी॥ पसीददु, पसीददु, अज्ज आ संदेसणस्सि॥ पेसिदा वसं अहं संदेसस्स जेव्व कुप्पामि॥ चेटी॥ ता किंति अत्तं विण्णविस्सं॥ वसं॥ एवं विण्णाइ- ४५

व्वा, जं मं जीअंतिमिच्छसि, ता एवं ण पुणो अहं अत्ताए आणाविदव्वा॥ चेटी॥ जधा देरोअदि॥ इति निष्क्रांता॥ अथ निष्क्रम्य शार्विलकः॥ दृष्ट्वा निशायावचनीयदोषं, निद्रां च जित्वा नृपतेश्च रक्ष्यान्॥ स एष सूर्योदयमंदरश्मिः क्षपाक्षयाच्चंद्रइवास्मि जातः॥१॥ अपिच॥ यः कश्चिदत्वरितगतिर्निरीक्षते मां, संभ्रांतः द्रुतमुपसर्पति स्थितं वा॥ तं सर्वे तुलयति दूषितोंतरात्माः स्वेदार्द्रोभवति हि शंकितोमनुष्यः॥२॥ मया खलु मदनिकायाः कृते साहसमनुष्ठितं परिजनकथासक्तः कश्चिन्नरः समुपेक्षितः, क्वचिदपि गृहं नारीनाथं निरीक्ष्य विवर्तितुम् नरपतिबले पार्श्वायातेस्थितं गृहसारवत् व्यवसितशतेरेवं प्रायेनिशाविरमो कृता॥ इति परिक्रामति॥ वसं॥ हंजे, इमं दाव चित्तफलअं मम सअणीए ठाविअ,

तालवेंटअं गेण्हिअ लहुं आ अत्त ॥ मद० । ओ; जं अज्ज आ आणवेदि ॥ इति फलकं गृहीत्वा निष्क्रा
ता शर्वि इदं वसंतसेनायागृहं तथावत्प्रविशामि ॥ प्रविश्यच मदनिका इष्ट्या ॥ ततः प्रविशति ता
लवृन्तहस्ता मदनिका; शर्वि० दृष्ट्वा अये, इयं मदनिका मदनमपि गुणैर्विशेषयंती रतिरिव मूर्तिमती
॥ बिभर्ति येयं; मम हृदयमनंगवह्नितप्तं, शशिव चंदनशीतलंकरोति मदनिके मद० ॥ दृष्ट्वा ॥ अंमो,
कधं, सव्विलओ; सव्विलअ सा अद्दे, कहिं तुमं ॥ शर्वि० ॥ कथयिष्यामि ॥ इति सानुरागमन्योन्यं पश्य
तः ॥ वसं० ॥ चिरअदि मदणिआ, ता कहिं णुहु सा ॥ गवाक्षकेण दृष्ट्वा ॥ कधं, एसा केनापि पुरिस
केण सह मंतअंती चिट्ठदि ॥ जधा अदिसिणिद्धाए णिच्चलदिट्ठिए आपिबंती विअ ॥ एदं णि

ज्जाअदि ॥ तधा तक्केमि, एसो सो जणेण एदं इत्तदि अणुजिस्सं कादुं ता ममदु; मा कस्सवि पी
च्चेरो भोदु, एहु सहाविस्सं ॥ मद० ॥ सव्विलअ कधेहि ॥ शर्वि० ॥ साशंकं दिशोवलोकयति ॥ मद० ॥ स
व्विलअ, किं एदं ससंको विअ लक्खीअसि ॥ शर्वि० वक्ष्ये त्वां किंचिद्रहस्यं, तद्विविक्तमिदं ॥ मद
० ॥ अधइं ॥ वसं० कधं परमरहस्सं, ता ण सुणिस्सं ॥ शर्वि० मदनिके, किं वसंतसेना मोक्ष्यति त्वां नि
ष्क्रयेण ॥ वसं० । कधं मत्संबंधिणी कथा, ता सुणिस्सं, इमिणा गवक्खेण उवारिदसरीरा मद सवि
लअ, अणिरा मए अज्ज आ; तदो भणादि, जइ मम संतेदो तदा विणा अत्थं च सव्वं परिअ
णं अणुजिस्सं करइस्सं ॥ अध सव्विलअ, कुदो दे एत्तिउ विस्सो, जेण मे अज्ज आ सअ

मृ० ना० ४७

सआसारो मो आइस्सदि ॥शर्वि॥दारिद्र्येणाभिभूतेन त्वत्स्नेहानुगतेन च ॥अथरात्रोमया भीरु
त्वदर्थे साहसं कृतम् ॥१॥वसं ॥पसण्णा से आकिदी साहसकम्मादए उण उव्वेअणीआ ॥मद
॥सव्विलअ इत्थी कहवृत्तस्स कालेण उहअं पि ससए विणिक्खित्तं शर्वि॥किं किं॥मद सरी
रं चारित्रंच ॥शर्वि॥अपंडिते साहसे श्रीः प्रतिवसति॥मद सव्विलअ अखंडिदचारित्तोसि ता एह
॥दे मम कारणाहो साहसं करेतेण अच्चंतविरुद्धमाचरितं ॥शर्वि॥नो मुष्णाम्यबलां विभूषणवतीं
॥फुल्लामिवाहं लतां विप्रस्वं न हरामि कांचनमथो यज्ञार्थमभ्युद्यतं ॥धान्यंगृहगतं हरामि
॥न तथा वाले धनार्थी कश्चित् कार्या कार्यविचारिणी मम मतिः श्रौर्यं पिनित्यं स्थिता ॥२॥

तद्विज्ञाप्यतां वसंतसेना ॥अयं तव शरीरस्य प्रसादादिव निर्मितः ॥अपकाशो त्यलंकारो मत्स्नेहा
॥ध्यार्यतामिति ॥१॥ मद सव्विलअ अप्पकासो अलंकारो अयंच जणो त्ति देवि ण सुल्लदि ता उ
वणेहि दाव पेक्खामि दाव एदं अलंकारअं ॥शर्वि॥इदमलंकरणं ॥इति साशंकं समर्पयति ॥मद॥नि
ण्ण ॥दिट्ठपुरुवोविअ अअं अलंकारओ ता अणेहि कुदो दे एसो शर्वि॥मदनिके किं तवानेन एत्य
ता ॥मद सरोषम् जइ मे पच्चअं ण गच्छसि ता किं णिमित्तं मे लिक्खिणासि ॥शर्वि॥अयि प्रभाते म
या श्रुतं श्रेष्ठिचत्वरे यथा सार्थवाहस्य चारुदत्तस्येति ॥वसंतसेना मदनिका च मूर्छां नाटयतः ॥शर्वि
॥मदनिके समाश्वसिहि किमिदानीं त्वं विषादस्रस्तसर्वांगी संभ्रमभ्रांतलोचना ॥नीयमानासु

जिष्या त्वं कंपसे नानुकंपसे ॥१॥मद०॥समाश्वस्य॥साहसिअ एव्वदु तुए मम कारणादो इमं अकज्जं करंतेण॰तस्सिं गेहे कोवि वावादिदो॰परिक्खदो वा॥शर्वि॥मदनिके॰भीते सुते न शर्विलकः प्रहरति॥तन्मया न कश्चिद्व्यापादितोनापि परिक्षितः मद०॥सच्चं॥शर्वि॥सत्यं॰सत्यं॥वसं॥सज्जो लब्ध्वा अम्हे पच्चुपजीविदुमि॥मद०॥पिअं॥शर्वि॥सेर्ष्यं॥मदनिके॰किं नाम प्रियमिति॥त्वत्स्नेहबध्यत्वरयाहि॥करोम्यकार्यं॰सद्भूतपूर्वपुरुषे॰पिकुले प्रसूतः॥रक्षामिमन्मथविपन्नगुणोदयमानं मित्रंच मो व्यपरिशस्यपरंच यासि॥१॥सा कूतम्॥इह सर्वस्वफलिनः कुलपुत्रमहाद्रुमाः॥निष्फलत्वमलं यांति ये द्यूता विहगभक्षिताः॥२॥अयंच सुरतज्वालः कामोऽग्निः प्रणयेन्धनः॥नराणांयत्र हूयंते यौ

वनानि धनानि च॥१॥वसं॥सस्मितं॥अहो से अत्थाणे आवजो॥शर्वि॥सर्वथा॥अपंडितास्ते पुरुषामतामे॰ये स्त्रीषु च श्रीषु च विश्वसंति॥श्रियोहि कुर्वंति तथैव नार्यो भुजंगकन्या परिसर्पणानि॰॥१॥स्त्रीषु न रागः कार्यो॰रक्ते पुरुषे स्त्रियः परिभवंति॥रक्तेहि रंतव्या विरक्तभावा नुन्हातव्या॥१॥कृष्णसर्पस्त्वरिमुच्यते॥एताहसंति च रुदंति च चित्तहेतो विश्वासयंति पुरुषं न तु विश्वसंति॥तस्मान्नरेण कुलशीलसमन्वितेन वेश्याश्मशानसुमनाइव वर्जनीयाः॥१॥अपिच॥समुद्रवीचीव चलस्वभावाः॰संध्याभ्रलेखेव मुहूर्तरागाः॥स्त्रियो हृतार्थाः पुरुषं निरर्थं॰निःपीडितालक्तकवत्यजंति॥१॥स्त्रियोनाम चपलाः॥अन्यं मनुष्यं हृदयेन कृत्वा॰अन्यं ततो हस्तिभिराकृषंति॥

अन्यत्र सुंचंति मद्गसेकमन्ये शरीरेण च कामयंते ॥१॥ सूक्तं खलु कस्यापि ॥ न पर्वताग्रे नलिनी
॥प्ररोहति, न गर्दभा वाजिधुरं वहंति, ॥ यत्रा: प्रकीर्णा नभवंति शालयो, नवेशजाता: शुचयस्तथा
गना: ॥२॥ आ: दुरात्मन् चोरदत्तहतक, अयं नगरवसि ॥ कतिचित्पदानि ॥ दासति ॥ मद ॥ अंचलेगृ
हीत्वा ॥ अरे असंबद्धप्रलापक, असंभावणीए कुप्पसि ॥ शर्वि ॥ कथमसंभावनीयं नाम ॥ मद ॥ एसो
॥ खु अलंकारओ अज्जआ केरओ ॥ शर्वि ॥ ततः किं ॥ मद ॥ सच तस्स अज्जस्स हत्थे विणिक्खि
त्तो ॥ शर्वि ॥ किमर्थम् ॥ मद ॥ कएं ॥ एवं विअ ॥ शर्वि ॥ सेवकस्यम् ॥ भोः कष्टं ॥ जायार्थं ग्रीष्मसंत ४९
तोयामेवाहं समाश्रितः ॥ अजानता मया सेव पेत्रेः शारवा वियोजिता ॥ २ ॥ वसं ॥ कधं एसोवि

संतप्पहि जेव्वा ता, अआणंतेण एदिणा एव्वमणुचिट्ठिदं ॥ शर्वि ॥ मदनिके, किमिदानीं युक्तं ॥ म
द ॥ एत्थ तुमं जेव्व पंडिओ ॥ शर्वि ॥ नैवं पश्य ॥ स्त्रियोहि नाम खल्वेतानिसर्गादेव पंडिताः ॥ पुरुषा
णांतु पांडित्यं शास्त्रेरेवोपदिश्यते ॥ २ ॥ मद ॥ सव्विलअ, जइ मम वअणं सुणीअदि, ता तस्स जेव्व
महाणुभावस्स पडिणिज्जादेहि ॥ शर्वि ॥ मदनिके, यद्येसो राजकुले मां कथयति ॥ मद ॥ एसचेरा
दो आरवो होदि ॥ वसं ॥ साहु मअणिए, साहु ॥ शर्वि ॥ मदनिके ॥ न खलु मम विषादःसाहसेऽस्मिन्
॥ भयंवा, कथयसि हि किमर्थं तस्य साधो गुणास्त्वम् ॥ जनयति मम वैरं कुत्सितं कर्म लज्जां, नृप
तिरिह शठानां माहशां किं नु कुर्यात् ॥ २ ॥ तथाप्यन्युपायश्चिंत्यतां मद सोअअं अवरो उवाओ

॥वसं॥को क्खु अवरो उवाओ हु विस्सदि॥मद॰तस्स जेव्व अज्जस्स केरको भविअ॰एदं अलंका
रअं अज्जआए उवणेहि॥शर्वि॰एवं कृते किं भवति॥मद॰तुमं दाव अचोरो॰सोवि अज्जो अरि
णा अज्जआ एसके अलंकारअं उवगदं णोदि॥शर्वि॰नन्वतिसाहसमेतत्॥मद॰अइ उवणेहि
॥अंणधा अदिसाहसं॥वसं॰साहु॰मदणिए॰साहु॰अणुजिस्सा ए किल मंतिदं॥शर्वि॥मयासा
॥महती बुद्धिर्भवतीमनुगच्छता॰॥निश्चायां नष्टचेष्टायां दुर्लभोनाम दर्शकः॥१॥मद॰तेण तुमं इ
मस्सिं कामदेवगेहे मुहुत्तं चिट्ठ॰जाव अज्जआए तुहा गमणं णिवेदेमि॥शर्वि॰एवं भवतु॥म
द॰उपसृत्य॰अज्जाए एसो क्खु चारुदत्तस्स सआसादो वत्तणो आअदो॥वसं॰हंजे॰तस्स के

रअं त्ति कधं तुमं जाणासि॥मद॰अज्जाए अन्तेकरअं विणा जाणामि॥वसं॰स्वगतं सशिरःकंपं
विहस्य॥ऊहि॰जुदि प्रकाशं पविसदु॥मद॰जं अज्जआ आणवेदि उपगम्य॥पविसदु सचि
लओ॥शर्वि॰उपसृत्य॥स्वस्ति भवत्यै॥वसं॥अज्ज वेदामि॰समाविसदु अज्जो॥शर्वि॰सार्थ
वाहस्यो विज्ञापयति॰अर्जरत्वाद्गृहस्य दूरस्थमिदं भांडं तद्गृह्यतां इति मदनिकायाः समर्प्य प्रस्थि
तः॥वसं॰अज्ज॰ममावि दाव पडिसंदेसं तहिं अज्जो णेदु॥शर्वि॰स्वगतम्॥कस्तत्र यास्यति
॥प्रकाशम्॥कः प्रतिसंदेशः॥वसं॥पडिच्छदु अज्जो मदणिअं॥शर्वि॰भवति॰न खल्ववगच्छा
मि॥वसं॥अहमवगच्छामि॥शर्वि॰कथमिव॥वसं॰अदं अज्जचारुदत्तेण भणिदा॰जो इमं अलं

कारअं समप्प इस्सदि, तस्स तुए मद्दणिआ दादव्वा ॥ ता सो जेव्व एदं दे दिवि एवं अज्जेण अवग
च्छिदव्वे ॥ शर्वि ॥ स्वगतं ॥ अये, विज्ञातो ऽहमनया ॥ प्रकाशं ॥ साधु, चारुदत्त, साधु ॥ गुणेषवश्यं हि
कर्तव्यः प्रयत्नः पुरुषैः सदा ; ॥ गुणयुक्तो दरिद्रो ऽपि नेश्वरैरगुणैः समः ॥ २ ॥ अपिच ॥ गुणे
षु यत्नः पुरुषेण कार्यो न किंचिदाप्यतमं गुणानां ; गुणप्रकर्षा दुडुपेन शैलो लंघितं लंघित
सुत्तमांगं ॥ २ ॥ वेसं को एत्थ पवहणिओ ॥ प्रविश्य स प्रवहणश्चेटः ॥ अज्जए, सज्जम्पवहणं ॥ वसं
तसेणए, मअलिए, सुदिअं से करेहि, दिण्णासि, आरुह पवहणं, सुमरेसि मं ॥ मदनिका रुदती परिष्वज
त्यि अज्जआए ॥ इति पादयोः पतति ॥ वसं ॥ संपदं तुमं जेव्व वंदणीआ संवुत्ता ता गच्छ सुहिओ

रुहपवहणं ॥ सुमरेसि मं ॥ शर्वि ॥ स्वस्ति भवतेऽयं मदनिके ॥ सुदृष्टः क्रियतामेष शिरसा वंद्यतो
जनः, यत्ते दुर्लभं प्राप्तं वधू शय्यावगुंठनं ॥ २ ॥ इति मदनिकया सह प्रवहणमारुह्य गंतु प्रव
त्तः ॥ नेपथ्ये ॥ कः कोत्र भोः राज्ञियः समाज्ञापयति । एष खल्वार्यको गोपालदारको राजा भ
विष्यतीति सिद्धादेशप्रत्ययपरिश्रद्धेन पालकेन राज्ञा घोषादानीय घोरे बंधनागारे क्षिप्तः
॥ ततः स्वेषु स्वेषु स्थानेषु अप्रमत्तमत्तैर्भवद्भिर्भवितव्यं ॥ शर्वि ॥ आकर्ण्य ॥ कथं राज्ञा पालके
न प्रियसुहृदार्यकोमेवध्यः । कलत्रवोध्यासि संरक्तः कृष्टम् । अथवा ॥ दृश्यमिदमतीव लोके
प्रियं प्राणा, सुहृच्च वनिताच ; ॥ संपद्यंते रुरूणां शतादपि सुदुर्लभतमः ॥ १ ॥ भवतेव

तु

तरामि॥इत्यवतरति॥भट॥सास्रं अंजलिं बध्वा॥एवं एदं; ता परं एदु मे अज्जउत्तो समीवं गु
रुअणाणं॥शर्वि॥साधु, प्रिये, साधु; अस्मच्चित्तसदृशमभिहितं॥चेटमुद्दिश्य॥भट, ज्ञानीषे रोहि
लस्य सार्थवाहस्य उद्यसितं॥चेटः॥अधइं॥शर्वि॥तत्रापय प्रियां॥चेटः॥जं अज्जो आ
णवेदि॥भट॥जधा अज्जउत्तो भणादि॥अप्पमत्तेण दाव अज्जउत्तेण होदव्वं॥इतिनि
ष्क्रांता॥शर्वि॥अहमिदानीं॥ज्ञातीन्, विज्ञान्, स्वभुजविक्रमलब्धशब्दान्, राजोपमा
नकुपितांश्च नरेंद्रभृत्यान्॥उत्तेजयामि, सुहृदः परिमोक्षणाय, योगंधरायणइवोदयनस्य
॥राज्ञः॥२॥अपिच॥प्रियसुहृदमकारणे गृहीतं रिपुभिरसाधुभिराहितात्मशंकैः॥सरभ

समभिपत्य मोचयामि, स्थितमिव राहुमुखे शशांकबिंबं॥२॥इतिनिष्क्रांतः॥प्रविश्य चेटी
॥अज्जए, दिट्ठिआ वड्ढसि; अज्जचारुदत्तस्स सआसादो वंभणेण आअदा॥वसंअहो रम
णीअदा अज्जदिवसस्स ता हंजे, सादरं, बंधुलेण समं पवेसिहि एं॥चेटी॥जं अज्जआ आ
णवेदि॥इतिनिष्क्रांता॥विदूषकोबंधुलेन सह प्रविष्टः॥विदू॥हीहो भोः तवच्चरणकिलेस
विणिज्जिएण रत्तवसराओ रावणो पुप्फकेण विमाणेण गच्छदि; अहंउण बम्हणो अ
किदतवच्चरणकिलेसोवि ण अरण्णारोज्जेण गच्छामि॥चेटी॥पेक्खदु अज्जो अत्तकेरके
गेहदुआरं॥विदू॥अवलोक्य, सविस्मयं॥अहो सलिलसित्तमज्जिदकिरहरिदोवलेवणस्स

विविहसुअंधकुसुमोवहारचित्तलिअभूमिआभाअस्स॰गअणअलालो अणकोदूहलदुरणाभिदंसीस
स्स॰दोलायमाणावलंवलंविदेरावणहत्थप्पमाइदमल्लिआदामगुणालंकिदस्स॰समुत्थदंतिदंतंतोर
णावभासिदस्स॰महारअणावरागसोहिणा पवणावलंदोलणालल्लंतचंचलग्गहत्थेण॰इदाणिहत्ति वा
हरंतेण॰विअ॰मे सोहग्गपडाआणिवहेणावसोहिदस्स॰तोरणाधूरणाक्खंभवेदि आणिक्खित्तस
मुक्खंत हरिदचूदपल्लवलालामफलिहमंगलकलसाभिरामोह अवासस्स॰महासुरवक्खत्थल दु
म्मज्ज वज्जणिरंतरपडिवत्थकणअकवाडस्स॰दुग्गअजणमणोरहा आसअरस्स॰वसंतसेणा
भवणदुआरस्स॰सस्सिरीआरा॰जं सव्वं मज्जत्थस्स विजणस्स वल्लाहिट्ठिं आआरेदि॥चेटी।

एदु॰एदु॰इमं पढमं पओढं पविसदु अज्जो॥विदू॥प्रविश्यावलोक्य च॥ही॰ही॰भो:॰इधवि पढमे
पओढे॰ससिसंखमुणालसण्णाओ॰विण्हुहरुणोमुट्ठि पंडुरा ओविहरअणपडिच्छंदकेचणस्स
वालसोहिदाओ॰पारादपंक्तिओ॰ओलम्बंत विंदमुत्तादामेहिं फलिहवारा अणुहअंदेहिं णि
ज्जा अंतीक्ख उज्जइणिं॰सोत्तिओ विअसुहोवविट्ठो णिद्दाअदि दोवारिओसदहिणा फलमो
दएणं॰पलोहिदाणं भक्खेदि वा असावलिं सुधासवण्णदाए आदरेदु भोदी॥चेटी॥एदु॰एदु॰
अज्जो॰इमं दुदिअं पओढं पविसदु अज्जो॥विदू॥प्रविश्यावलोक्य च॥ही॰ही॰भो:इध वि दु
दियपओढे॰पज्जंतोवणीदजवसबुसकवल्लसुपक्को तेलुभंगिदविसाणबत्था॰पवहणवइल्लो

BHARATIYA VIDYA BHAVAN

॥अअं अंणादरो अवमाणिदो विअ कुलिएण दीहं णीसरदि सेरिहो। इदो अ अवणीदङ्गज्जस्स
॥मङ्गुस्स विअ महीअदि गीवा मेसस्स। इदोइदो अवराणं अस्साणं केसकय्यणा करीअदि। अअं
अवरो पाङ्चरो विअ दठबत्थो मंदुराए साहामिअओ॥ अन्यतोवलोक्य॥ इदो अ कूरच्चुअ तेहु
मिस्स पिदं हत्थी पडिच्छावीअदि मेत्थ पुरओसहिं। आदीसदु भोदी॥ चेटी। एदु एदु अज्जो। इमं
तइअं पओट्ठं पविसदु अज्जो॥ विदू॥ प्रविश्य दृष्ट्वा च॥ हीं हीं भोः इधवि तईए पओट्ठे इमाइं
दाव कुलउत्तजणोववेसणाणिमित्तं विरइदाइं आसणाइं। अध्वा चिरो पासअपीठं चिट्ठदु पोत्थ ५४
ओ एदं अम्हाणिमं असारिअासहिदं पासअपीठं। इमे अ अवरे मअणसंधिविग्गहचदुरा विविहे

वेलिआविलित्तचित्तफलअ अग्गहत्था इदो तदो परिभमंति गणिआ वुड्ढिदा। आदीसदु भोदी
चेटी॥ एदु एदु अज्जो इमं च उट्ठं पओट्ठं पविसदु अज्जो॥ विदू॥ प्रविश्यावलोक्य च॥ हीं हीं
भोः। इधवि च उट्ठे पओट्ठे जुवदिकरताडिदा जलधरा विअ गंभीरं णदंति मुरआ झाणपुंणा
ओ विअ गअणादो तारआओ णिवदंति वंसतालआ मधुअर विरं अमहुरं वज्जदि वंसो।
इअं अवरा ईसापण्णअ कुविदकामिणीविअ अंकारोविदा करग्गहपरिमासेण सारिज्जदि वीणा।
इमा ओ अंबराओ कुसुमरसमत्ताओ विअ मह अरीओ अदिमुहर अरं पगीदाओ गणिआ
दारिआओ एच्चीअदि एहअं पढीअदि सरिंगारओ ओवागदा गवक्खेसु वादं गेक्क

ति सलिलगंगरीओ।ओदरेसु भोदी।।चेटी।एदु,एदु,अज्जो इमं पंचमं पओट्ठं पविसदु अज्जो।।विदू।।
प्रविश्य दृष्ट्वा च।।हीं,हीं,भोः इधवि पंचमे पओट्ठे अअं दलिद्दजणलो हुप्पादणकेरो आहरइ उवचिरो हिं
गुलेलुगंधो।विविहसुरहिधूमुग्गारेहिं णिच्चसत्ताविज्जमाणि णासंसदि विअ महानसं दुवार मुहेहिं अ
धिअं ऊसुसावेदि मं सालिज्जमाणवहुविहभक्खओ अणो गंधो।अअं अवरो पउच्चरं विअ पोट्टिं धो
अदि रूपिदारिओ।वहुविहाहारविओरं उवसाहेदि सूव आरो।वसंति मोद आ,पच्चंतिचे।पूवआ।।
आत्मगतं।।अवि दाणिं इह वड्ढिअ गुजसुत्ति पादोदअं लहिस्सं।।अन्यतोऽवलोक्य च।।इदो गंधव्व सु
रगणेहिं विअ विविहालंकारसोहिदेहिं गणिआ जणेहिं वंधुलेहिं सद्धं सग्गीअदि एदं गेहं।गो,के

तुल्मे वंधुला णाम।।वंधुलाः।वयं खलु।।परगृहलिलेताः,परान्नपुष्टाः,परपुरुषेर्जनिताः परांगनासु,
।।परधननिरता गुणैश्चवाच्या,गजकलभाइव वंधुलाललामाः।।१।।विदू।आदेसदु भोदी।।चेटी।एदु,
अज्जोः इमं छट्ठं पओट्ठं पविसदु अज्जो।।विदू।।प्रविश्यावलोक्य च।।हीं,हीं,भोः।इधवि छट्ठे पओट्ठे,
अअं दाव सव्वंणार अणाणं कम्म तोरणाइं णीलर अणा विणिक्खित्ताइं इंदा उहट्ठाणं विअ दरिसं
ति;वेरुलिअ,मोत्तिअ,पवाल,पुस्सराअ इंदणील कक्केतर अपरमरा अमरगअ पहुदि आइं र अ
णाविसेसाइं,अंणोणं विओरंति सिप्पिणो वलंति आदरूवेहिं,माणिक्काइं घडिज्जंति,सुवंणालंका
रा रत्तसुत्तेण गत्थीअंति मोत्तिआभरणाइं,वसीअंति धीरं वेडुरिआइं,उट्टीअंति संखआ,सा

णिज्जंति पवालआ सुक्खविअंति अविदकुमपत्थरा खाल्लीअदि सेरलज्जअं विस्साणीअदि ॥
चंदणारसो संजोईअंति गंधजुत्तीओ दीअदि गणिआ कामुकाणं सकप्पूरं तंबोलं अवलोईअदि
सकडक्खअं पअट्टदि हासो वीअदि अ अणवरअं ससिक्कारं मइरा इमे चेडाओ इमा चेडिआ
ओ इमे अवरे अवधीरिदपुत्त दारवित्तामणुस्सा आसवकरआ पीदमदि रहिं गणिआजणेहिं जे मु
क्का तेपि अंति आदेसेदु भोदी ॥ चेटी एदु एदु अज्जो इमं सत्तमं पओट्ठं पविसदु अज्जो ॥ विदू ॥
पविश्यावलोक्य च ॥ ही ही भोः इधवि सत्तमे पओट्ठे सुसिलिट्ठविहंगवाडीसुहणिसण्णाइं अंणो
ण्णुचुंबणपराइं सुहमणुभवंति पारावदमिहुणाइं दहिभत्तपूरिदोदरा बंधणा विअ सुत्तं पढदि पंजर

॥ सुओ इअं अवरा सामिसंमाणणा लद्धपसरा विअ घरहासी अधिअं कुरु कुराअदि मरणसारि
आ अणेअप्फलरसाहेसोपठुट्ठकेंग कुंभदासी विअ कूअदि परउट्ठा आलविदा णागदंतेसु पंजरप
रं पराओ जोधीअंति लाचओ आलविअंति पंजरकविंजरकवोदाः ॥ इदो विविहमणिवित्तलिहेवि
अ अअं सहरिसंणच्चंतो रविकिरणसंतत्तं पक्खक्खेवेहिं विधुवेदि विअ पासादं घरमोरो ॥ अन्यतो
वलोक्य ॥ इदो पीढिकिदा विअ चंदपादा पदगदिं सिक्खंता विअ कामिणीणं पत्तादो परिभामंति
॥ राअहंसमिहुणा एदे अवरे वुड्ढहत्थिका विअ इदो तदो संचरंति घरसारसा ही ही भोः पसार
अं किदं गणिआए णाणापक्खिसमूहेहिं जं सव्वं सु णंदणवणं विअ मे गणिआ घरं पडिभास

दि। ओरसेदु भोदी। चा। चेटी। एदु अज्जो; इमं अदुमं पओहुं पविसदु अज्जो॥ विदू॥ प्रविश्यावलोक्य च॥ भोदि; को एसो पडुपावार अपा उदो अधिअदरं अच्चंभुदपुण्णरुत्तालंकारालंकिदो अंग भंगे हिं परिक्खलंतो इदो तदो परिभ्भमदि॥ चेटी। अज्ज, एसो अज्जआ ए अअं भादा भोदि॥ विदू॥ के त्तिअं तवच्चरणं कदुअ वसंतसेणा ए भादा भोदी। अथवा। मा दाव; जदिवि एसो उज्जलो सि णित्थो असु अंधो अ तहवि पमसाणावी धीए जादो किअ चंप अरुक्खेवा, अणहिगमणीओ सो अस्स॥ अन्य तोवलोक्य॥ भोदि, एषा उण का फुल्लपादारअ पाउदा, उवाणहजुअलणिक्खित्त तेल्ल चिक्कोहिं पा देहिं, उच्चारणेण उवविट्ठा चिट्ठदि॥ चेटी। अज्ज, एसा खु अत्ताणं अज्जआ ए अत्तिआ॥ विदू। अहो।

से करट्ठहा इणीए पोट्ठ वित्थारो; ता किं एदं पवेसिअ महादेवं किअ दुआरसोहा इहु घरे णिमि दा॥ चेटी॥ हदास मा एवं उवहस अंत्ताणं अत्तिअं। एसा खु चाउत्थिएण पीडिअदि॥ विदू॥ सपरि हासं॥ भअवं चाउत्थिअ एदिणा उवआरेण मंपि बंभणं आलो एहि॥ चेटी॥ हदास, मरिस्ससि॥ विदू॥ सपरिहासं॥ दासीए धीए, वरं इदिसो सूणापीणा जठरो मुहो जेव्व, सीहसुरासव मत्तिआ ए आवत्थं गदा हिंगत्तिआ जइ मरदि, एत्थ अत्तिआ भोदि सिआलसहस्सजत्तिआ। भोदि किं तुम्हा एं जानवत्ता वहंति॥ चेटी। अज्ज; एहि, एहि॥ विदू॥ किं वा एत्थ पुत्ती अदि, तुम्हाणं खु पेम्मणि म्मलजले, मअणसमुद्दे, थणाणीअं वजहणाएव जाणवत्ता मणहरणा। एवं वसंतसेणा ए वहुवुत्तंतं।

अट्ठ पओट्ठभवणं पेक्खिअ जं सच्चं जाणामि एक्कं विअ तविट्ठअं दिट्ठं पसंसिदुं णत्थि मे वा आविह
वो। किं दाव गणिआघरो आदु कुवेरभवणपरिल्लेहोत्ति। कहिं तुत्ताणं अज्ज आ॥ चेटी। अज्ज एसा क
क्खवाडिआ ए चिट्ठदि ता पविसदु अज्जो॥ विदू॥ प्रविश्य॥ दृष्ट्वा च॥ ही ही भोः! अहो रुक्खवाडि
आए सस्सिरीअदा अच्छरी अकुसुमा जत्थ रोविदाणं अवारवा णिरंतरपादवतलणिमिदा ऊव
तिजणजहणपमाणा पट्टदोला सुवण्णजूहिआ सेहालिआ मालई मल्लिआ णोमालिआ कुरवआ
अरि मोत्तअप्पहुदिकुसुमेहिं सअं डिवडिदेहिं जं सच्चं लहु करेदि विअ णंदणावणासा सस्सिरीअदं
॥ अन्यतोवलोक्य॥ इदो अ उद्दंतसूरसमपत्तेहिं कमलरत्तोप्पलेहिं संसाअदि विअ दिट्ठिआ

अविअ एसो असो अवुत्तो णवणिग्गअकुसुमपल्लवो भादि सुहदोव्व समरमज्झे घणलोहिदपंकचच्चि
क्को। भोदु ता कहिं तुत्ताणं अज्ज आ॥ चेटी॥ अज्ज ओणमहि दिट्ठिअं पेक्खव अज्जअं॥ विदू॥ दृष्ट्वा
उपसृत्य॥ सोत्थि भोदीए॥ वसं अये मैत्रेय॥ उत्थाय॥ स्वागतमिदमासनमत्रोपविश्यतां विदू॥ उपवि
सदु भोदी॥ उभावुपविशतः॥ वसं अपि कुशलं सार्थवाहपुत्रस्य। विदू॥ भोदी कुसलं॥ वसं आर्य मै
त्रेय अपीदानीं॥ गुणप्रवालं विनयप्रशाखं विस्रंभमूलं महनीयपुष्पं॥ तत्साधु रक्षं स्वगुणैः फलाढ्यं
सुतद्विहंगाः सुखमाश्रयंति॥ ९॥ विदू॥ स्वागतं॥ उवलक्खिदं दुक्खिलासिणीए॥ प्रकाशं॥ अधइं॥ वसं।
अये किमागमनप्रयोजनं॥ विदू॥ सुणादु भोदी। तत्रभवं चारुदत्तो सीसे अंजलिं कदुअ भोदिं विण्ण

चेटि ॥ वसं अंजलिं बध्वा ॥ किमाज्ञापयति ॥ विदू मए तं सुवण्णमंडअं विस्संभादो अत्तणो केरके त्तिकदु
अ अज्जे हारिदं सो अ सहिओ मा आवत्थ आरीणं आणी अदि कहिं गदो त्ति ॥ चेटी ॥ अज्जाए दिट्ठिआ
वट्टसि अज्जो जूदि अरो संवुत्तो ॥ वसं ॥ स्वगतं ॥ कधं चोरेण अवहरं सोंडीरहाए जूदे हारिदो त्ति भ
णादि अरो जेव्व कामीअदि ॥ विदू ॥ ता तस्स कारणादो गेहदु भोदी इमं रअणावलिं ॥ वसं ॥
आत्मगतं ॥ किं देसेमि तं अलंकारअं ॥ विचिंत्य ॥ अधवा एदाव ॥ विदू ॥ किं दाव ण गेण्हदि भोदी
॥ एदं रअणावलिं वसं ॥ विहस्य सखीमुखं पश्यंती ॥ मित्ते अ कधं ण गेण्हिस्सं रअणावलिं ॥ इ ५१
ति गृही त्वा पार्श्वे स्थापयति स्वगतं कधं सीणकुसुमादो वि सह आरपादचादो मअरंदविंद

ओ णिवडंति ॥ प्रकाशं ॥ अज्ज विण्णवेसि तं जूदि अरं मम वअणेण अज्ज चारुदत्तं अहं वि परोसे ॥
अज्जं पेक्खिदु आगमिस्सामित्ति ॥ विदू ॥ स्वगतं ॥ किं अंणं तहिं गदुअ गेण्हिस्सदि ॥ प्रकाशं ॥
भोदि भणामि ॥ स्वगतं ॥ णीअत्तीअदु इमादो गणिआ पसंगा दो त्ति ॥ इति निष्क्रांतः ॥ वसं हंजे
गेह एदं अलंकारअं चारुदत्तं अहिरमिदं गच्छ ॥ चेटी ॥ अज्जाए पेक्ख पेक्ख उण्णमदि अं
कालेदुद्दिणं वसं ॥ उदयंतु नाम मेघा भवतु निशा वर्षमविरतं पततु ॥ गणयामि नेव सर्वं दयि
तामिलषन् हृदयेन ॥ ९ ॥ हंजे हारं गेण्हिअ लहुं आअच्छ ॥ इति निष्क्रांता ॥ सर्वे ॥ मदनिकाशर्वि
लकश्चतुर्थांकः ॥ अथ पंचमांकः ॥ ततः प्रविशति आसनस्थः सोल्कंठश्चारुदत्तः ॥ चारु ऊर्ध्वमव

लोक्य ॥ उन्नमत्यकालदुर्दिनं ॥ यदेतत् ॥ अलोकितं गृहशिखंडिभिरुत्कलापे हंसैर्यियासुभिरपाङ्
तमुन्मनस्कैः ॥ आकालिकं सपदि दुर्दिनमंतरीक्षमुत्कंठितस्य हृदयं च समंसणत्थि ॥ २ ॥ अपिच
॥ मेघोज्जलार्द्रमहिषोदर भृंगनीलो विद्युत्प्रभा रचितपीतपटोत्तरीयः ॥ आभाति संहतबलाकगृहीत
शंखः सकेशव इवार्जुनमिंतु मुद्यतः ॥ २ ॥ अपिच ॥ केशवगात्रश्यामः कुटिलबलाकावलीरचित
शंखः ॥ विद्युद्गुणकोदंडः श्यामघरश्चोन्नतोमेघः ॥ २ ॥ एतानिषिक्तरजनद्यसंनिकाशा धारा जवेन
पतिताजलदोदरेभ्यः ॥ विद्युत्सहापशिखया क्षणनष्टदृष्टाश्चिन्नाइवांबरपटस्य दशाः पतंति ॥ २ ॥
संसक्तैरिव चक्रवाकमिथुनैर्हंसैः पडीनैरिव व्याविद्धैरिव मीनचक्रमकरैर्हर्म्यैरिव प्रोक्षितैः तैस्तै

राकृतिभिस्तैरनुगतैर्मेघैः समभ्युन्नतैः पत्रच्छेद्यमिवेह भाति गगणं विश्लेषितैर्वायुना ॥ २ ॥ एतत्त
प्तराष्ट्रचक्रसदृशं मेघांधकारं नभो दृष्ट्वागर्जति चातिदर्पितबलो दुर्योधनोवा शिखी ॥ अस्यू
तजितो युधिष्ठिरइवारण्यं गतः कोकिलो हंसाः संयति पांडवा इव वना दज्ञातचर्यं गताः ॥ २ ॥ वि
चिंत्य ॥ चिरःखलु कालो मैत्रेयस्य वसंतसेनायाः सकाशं गतस्य नाद्याप्यागच्छति ॥ प्रविश्य विदूष
कः ॥ अहो गणिआए लोभोअ दक्खिण्णदाअ जदो न कधा कदा अंणा अणाअरेण जेव्व अ
णिअ किं वि एअमे अ गहिदा रअणावली एत्तिआए रत्तीए णतए अहं भणिदो अज्ज मि
त्तेअ वीसमीअदु मल्लकेण पाणीअं पिविअ गच्छीअदु त्ति ता मा दाव दासीए धी आए गणिआ

ए सुट्ठु खु वुच्चदि। अकंद समुत्थिदा पदुमिणी। अवं च ओ वाणि ओ। अचोरो सुवंणआरो। अ
कलहो गामस्समागमो। अलुद्धागणिअत्ति। दुक्करं एदे संभावीअंति। ता पि अव अस्सं गदु अ। इमा
दो गणिआपसंगा दोणिवत्ता वेमि ॥ परिक्रम्य दृष्ट्वा ॥ कधं पिअवअस्सो रुक्खवाडिआए उवविट्ठो
चिट्ठदि। ता जाव। उवसप्पामि ॥ उपसृत्य ॥ सोत्थि भोदे। वट्टदु भवं चारु॰ विलोक्य ॥ अये सुहृन्म
मैत्रेयः प्राप्तः। वयस्य स्वागतमास्यतां ॥ विदू ॥ उवविट्ठोम्हि ॥ चारु ॥ वयस्य। कथयतु कार्यं ॥ वि
दू ॥ तं खु कज्जं विणट्ठं ॥ चारु ॥ किं तया न। गृहीता रत्नावली ॥ विदू ॥ कुदो अत्थाणं एत्ति
अं गआ अधेअं। णावणलिणीकोमलं अंजलिं मत्थएं कदुअ पडिच्छिआ ॥ चारु ॥ तत्किं ब्रवीषि न

ष्टमिति ॥ विदू ॥ भो। कधं ण विणट्ठं। जं अभुत्तपीदस्स। चोरेहिं अवहरिदस्स। अप्पमुक्कस्स सुवंणगंडअस्स का
रणादो। चदुस्समुद्दसारभूदा रअणमाला हारिदा ॥ चारु ॥ वयस्य मा मैवं ॥ यं समालंब्य विश्वासेन न्यासः
स्मासु तया कृतः। ॥ तस्येतन्महतोमूल्यं प्रत्ययस्येव दीयते ॥ २ ॥ विदू ॥ भो। वअस्स। एदं पि मे दुरिअं संता
वकारणं। जं सही अणदिंणस्सणा ए पइंतावधारिदं मुहं कदुअ। अहं उवहसिदो। ता अहं वत्तणो भवि
अदाणिं भवंतं सीसेण पडिअविणवेमि णिवत्तीअदु अप्पा इमादो वहुपच्चवाआ गणिआ पसंगादो। ग
णिआ णाम पादु अंतरप्पविट्ठा किअ लेट्ठु आ दुःखेण उण णिक्कड्ढीअदि। अविअ। भो। वअस्स। गणिआ।
हत्थी। काअद्दओ। णिक्खु। चारो। रासहो अ जहिं एदे णिवसंति तहिं दुट्ठावि एआ जाअंति ॥ चारु। वयस्य।

अलमिदानीं सर्वं परिवादमुक्ता अवस्थेयेवास्मि निवारितः।पश्य।वेगं करोति तुरगस्त्वरितं प्रयातुं,प्रा
णव्ययान्न चरणास्तु तथा वहंति;सर्वत्र यांति पुरुषस्य चलाःस्वभावाः,खिन्नास्ततो हृदयमेव पुनर्विशं
ति॥१॥अपिच॥वयस्य॥यस्यार्थास्तस्य साकांता धनहार्योत्यसौ जनः॥स्वगतं॥नः गुणहार्योत्यसौ
जनः॥१॥प्रकाशं॥वयमर्थैः परित्यक्ता,ननु त्यक्तैव सा मया॥१॥विदू॥अधोवलोक्य स्वगतं॥जधा ए
सो उत्थं पेक्खिअ अद्दीहं णिस्ससदि;तधा तक्केमि म ए विणिवारि अंतस्स अधिअदरं वड्ढिदा से उक्कंठा;
ता सुट्ठु खु एवं वुच्चदि,वामोकामोत्ति॥प्रकाशं॥भो वअस्स,भणिदं चतार,भणेहि चारुदत्तं,अज्ज प
ओसे म ए एत्थ आगंतव्वं त्ति ता तक्केमि रअणावलीए अपरितुट्टा अपरं मग्गिदुं आ अमिस्सदि त्ति॥चे ६२

ट वयस्य,आगच्छतु,परितुष्टा यास्यति॥चेटः॥प्रविश्य॥अवेध माणहे॥जधा जधा वस्सदि अब्भखंडे,
तधा तधा तिम्मदि पुट्ठिचम्मे जधा जधा लग्गदि शीदवादे,तधा तधा वेवदि मे हलक्के॥प्रहस्य॥वंशो वा ए
सन्नद्धिदं सुसद्दं वीणं वा ए सन्नतंतिं णादंति॥गीअं गाए गद्दहस्साणुरूवं को मे गाणे तुंबरू णारदो वा
अणत्तलि अज्ज आए वसंतसेणा एकुंगीलआ गछ तुमं,ममागमणं अज्ज चारुदत्तस्स णिवेदेहि त्ति;ता जा
वे अज्ज चारुदत्तस्स गेहं गछामि॥परिक्रम्य प्रविश्यैकेन॥दृष्ट्वा॥एसे चालुदत्त लुक्खवाडिआए चिट्ठदि।एसे
वि से दुट्ठवडुके;ता जाव उवसप्पामि।कधं दक्खिदे दुवाले लुक्खवाडिआए;भोदु,एदस्स दुट्ठवडुकस्स संणं
देमि॥गुटिकां क्षिपति॥विदू॥अए,को दाणिं एसो पा आरवेट्टिदं विअ कट्ठत्थं मं लोट्टकेहिं ताडेदि चा

रु॥आरामप्रासादवेदिकायां क्रीडद्भिः पारावतैः पतितं भवेत्॥विदू॥दासीए उत्त॰ दुट्ठपारावअ॰ चिट्ठ॰ चिट्ठ॰ जाव एदिणा दंडअट्ठेण॰ सुपक्कं विअ चूअफलं॰ इमादो पासादादो भूमीए पाडइस्सं॥इति दंडकाष्ठमुद्यम्य धावति॥चारु॥यज्ञोपवीतं आकृष्य॥वयस्य॰ उपविश॰ किमनेन॰ तिष्ठतु दयितासहितस्तपस्वी पारावतः॥चेटः॥कधं॰ पारावदं पेक्खसि॰ मए पेक्खदि॥भोदु॰ अवराए लोट्ठगुडिआ एपुणोवि ताडइस्सं तथा करोति॥विदू॥दिशो॰ वलोक्य॥कधं॰ कुम्मीलओ॰ ता जाव उवसप्पामि॥उपसृत्य॥द्वारमुद्घाट्य॥अरे॰ कुम्मीलआ॰ पविस॰ सा॥अदंदे॥चेटः॥प्रविश्य॥अज्ज॰ वंदामि॥विदू॥अरे कहिं तुमं ईदिसे दुद्दिणे अंधआरे आअदो॥चेटः॥अले॰ एशा शा॥विदू॥का एसा का॥चेटः॥एशा शा॥विदू॥किं दाणिं दासीएउत्ता॰ दुभिक्खकाल वुद्दूरं को

विअ॰ उत्थकं सासा असि एशाशाशेति॥चेटः॥अले॰ तुमं पि दाणिं इंदमहका मुको विअ सुट्ठु किं काका॥असि॰ काके त्ति॥विदू॥ता कहेहि॥चेटः॥स्वगतं॥भोदु॰ एवं भणिस्सं॥प्रकाशं॥अले॰ पङ्कदेदइस्सं॥विदू॥अहंते मुंडे गोदं दइस्सं॥चेटः॥अले॰ जाणाहि दाव तेण हि कस्सिं काले चूआ मोलेंति॥विदू॥अरे॰ दासीएउत्ता गिल्ले॥चेटः॥सहासं॥अले॰ णहि णहि॥विदू॥स्वगतं॥किं दाणिं एत्थ कहिस्सं विचिंत्य॥भोदु॥चारुदत्तं गदुअ पुच्छिस्सं॥प्रकाशं॥अरे॰ मुहुत्तअं चिट्ठ॥चारुदत्तमुपसृत्य॥भो वअस्स पुच्छिस्सं दाव॰ कस्सिं काले चूआ मोलेंति॥चारु॰ मूर्खवसंते॥विदू॥चेटमुपगम्य॥मुक्ख वसंते॥चेटः॥दरिअं दे पङ्कदइस्सं॥सुसामिस्साणं गामाणं कोरक्खअं करेदि॥विदू॥अरे॰ रअ॥चेटः॥सहासं॥अरे॰ णहि णहि॥वि

दू॥भोदु॰संसए पडिहत्थि॥विचिंत्य॥भोदु॰चारुदत्तं पुणोवि पुच्छिस्सं॥पुनर्निरूप्य चारुदत्तं तथैवोदाहर
ति॥चारु वयस्य॰सेना॥विदू॥चेटमुपगम्य॥अरे॰दासीए पुत्ता॰सेणा॥चेटः॥दुवेवि एक्कुशि कदुअ॰शि
ग्घं भणाहि॥विदू॥सेनावसंते॥चेटः॥एं॰पडिअत्तिअ॰भणाहि॥विदू॥कार्येन॥परिक्रम्य॥सेणावसंते
चेटः॥अले॰मुक्खव बेडुडुका॰पहारं पडिवत्तावेहि॥विदू॥पादोपरिकृत्य॥सेनावसंते॥चेटः॥अले॰अक्खर॥
पहारं परिवत्तावेहि॥विदू॥विचिंत्य॥वसंतसेणा॥चेटः॥एशा शा आ अदा॥विदू॥ता जावे चारुदत्त
स्स णिवेदेमि॥उपसृत्य॥भो चारुदत्त॰धणिओ दे आ अदो॥चारु॥कुतोस्मत्कुले॰धनिकः॥विदू॥जइ कु
ले णत्थि॰ता दुवारे अत्थि एसा वसंतसेणा आ अदा॥चारु॰वयस्य॰किंमां प्रतारयसि॥विदू॥जइ मे बअ



ले ण पत्ति आ असि॰ता एदं कुम्मील अं पुच्छ॥अरे॥दासीए पुत्ता॰कुम्मीलअ उवसप्प॥चेटः॥उपसृत्य॥अ
ज्ज वेदामि॥चारु॥भद्द॰स्वागतं॰कथय सत्यं॰प्राप्ता वसंतसेना॥चेटः॥एसा सा आ अदा वसंतसेणा
॥चारु॥सहर्षं॥भद्द॰ न कश्चिच्चियवचनंनिष्फलीकृतं मया॰तद्गच्छतां परितोषिकं॥इत्युत्तरीयं भयव
ति॥चेटः॥गृहीत्वा॰प्रणाम्य सपरितोषं॥जाव अज्ज आए णिवेदेमि॥इति निष्क्रांतः॥विदू॥भो अवि
जाणासि॰किं निमित्तं ईदिसे दुद्दिणे आ अदत्ति॥चारु॥वयस्य न सम्यगवधारयामि॥विदू॥मए जाणि
दं॰अप्पमुल्ला र अणावली बहुमुल्लं सुवंणभंडअं त्ति एा परितुट्ठा अवरं मग्गिदुं आ अदा॥चारु॥स्वागतं
॥परितुष्टा यास्यति॥ततः प्रविशति उज्जयिनीसारिकावेशेन वसंतसेना॰सोत्कंठा॰दत्तधारिणी चिटश्च॥

विटः॥वसंतसेनामुद्दिश्य॥अपश्य श्रीरेषा ग्रहरणमनंगस्य ललितं कुलस्त्रीणां शोकोमदनवरराक्षस्य कुसुमं
सलीलं गच्छंती रतिसमयलज्जा गुणयिनी॥रतिक्षेत्रे रंगे प्रियपथिकसार्थैरनुगता॥वसंतसेने पश्य पश्य॥
गर्जंति शैलशिखरेषु विलंबिविंबा मेघाविमुक्तघनिता स्तदयानुकाराः॥येषां रवेण सहसोत्पतितैर्मयूरैः रंगी
ज्यते मणिमयैरिवतालवृंतैः॥१॥अपिच॥पंकक्लिन्नमुखाः पिबंति सलिलं धारा हता दर्दुराः कंठं मुंचति
बर्हिणः समदनो नीपः प्रदीप्यायते॥संन्यासं कुलदूषणैरिव जनैर्मेघैर्वृतश्चंद्रमा विद्युन्नीचकुलोद्गतेव युव
तिर्नैकत्र संतिष्ठते॥२॥वसं॥भाव सुष्ठु देभणिदं॥एषाहि॥मूढ निरंतर पयोधरा या भयेन कांतः सहागि ५५
रमते यदि किं तवान्यः॥मांगल्यितैरति मुहुर्धिनिवारयंती मार्गेरणार्थि कुपितेव निशा सपत्नी॥२॥विटः

॥भवत्वेवं तावदुपलभ्यतां तावदियं॥वसं॥भाव किमनया स्त्रीस्वभावदुर्विदग्ध गोपालभ्यया॥पश्यतु भावः॥
मेघा वर्षंतु गर्जंतु मुंचत्वशनिमेव वा गणयंति न शीतोष्णं रमणाभिमुखाः स्त्रियः॥विटः॥वसंतसेने पश्य॥अ
यमपरः पवन चपलवेगः स्थूलधाराशरौघः स्तनितपटहनादः स्पष्टविद्युत्पताकः॥हरति करसमूहं रवेश
शांकस्य मेघो नृपस्य पुरमध्ये मंत्रवीर्यस्य शत्रोः॥२॥वसं॥एवं णेदं ता कधं एसो अवरो॥एतेरव॥यदा
गर्जेद्मलिनेराध्मातलंबोरैर्गर्जद्भिः सतडिद्दुलाकशबलैर्मेघैः सशल्यं मनः॥तत्किं शोषितभर्तृबंधुपट
हो हा हा हताशोवकः प्रावृट् प्रावृडिति ब्रवीति शठधीः क्षारं क्षते प्रक्षिपन्॥२॥विटः॥वसंतसेने एव
मेतत्॥इदमपरं पश्य॥बलाकापांडुरोल्लीषं विद्युदुल्लिसचामरं॥मत्तवारणरासरूढ्यं कर्तुकामभिवांबरं॥२॥

वसं० भाव० पेक्ख पेक्ख ॥ एते राईतमालपत्रमलिनेरापीतसूर्येनभो० वल्मीकाः० शरताडिताइव गजाः सीदंति धारा हताः ॥ विद्युत्कांचनदीपिकेव रचिता प्रासादसंचारिणी० ज्योत्स्ना दुर्बलभर्तृकेव वनिता० प्रोत्सार्यमेघैर्हृता ॥ १ ॥ विटः । वसंतसेने पश्य० पश्य ॥ एते हि विद्युद्गुणवत्यः कक्षा गजा इवान्योन्यमभिद्रवंतः ॥ शक्राज्ञया ॥ वारिधराः सधारा० गा रूप्यरज्जव इव समुत्थरंति ॥ २ ॥ अपिच ॥ पश्य ॥ महाघातोध्मातैर्महिषकुलनीलैर्जलधरैश्चलैर्विद्युत्पट्टैर्जलधिभिरिवांतःप्रचलितैः ॥ इयं गंधोद्गामानवहरितशस्यांकुरवती धरा धारा पोतैर्मणिमयशरीरैर्भियतइव ॥ ३ ॥ वसं । भाव० एसो अवरो ॥ एत्यहो ति शिखंडिनां पटुतरं केकाभिराक्रंदितः प्रोद्भेदेव बलाकया सरभसं सोत्कंठमालिंगितः ॥ हंसैरुज्झितपंकजैरतितरां सोद्वेगमुद्वीक्षितः कुर्वेनं जनमेव ६५

कांक्ष दिशो मेघः समुत्तिष्ठते ॥ २ ॥ विटः । एवमेतत् । तथाहि० पश्य ॥ निष्पंदीकृतपद्मखंडनयनं नष्टक्षपावासरं० विद्युद्भिः क्षणदृष्टसुष्ठुतिमिरप्रच्छादितागमुखं० निश्चेष्टं स्वपितीव संप्रति पयो धारागृहांतर्गतं ॥ स्फीतांभोधरधामनेकजलदच्छद्मापिधानं जगत् ॥ ४ ॥ वसं । भाव० एवं एदं ता पेक्ख पेक्ख ॥ गता नाशं तारा उपकृतमसाधाविव जने० वियुक्ताः कांतेन स्त्रियइव न राजंति कुकुभः ॥ प्रकामांतस्तप्तं त्रिदशपतिशस्त्र शिखिना० इवीभूतं मन्ये पतति जलरूपेण गगनं ॥ ५ ॥ अपिच ॥ पश्य ॥ उन्नमति नमति वर्षति गर्जति मेघः करोति तिमिरौघं० ॥ ग्रथमश्रीरिव पुरुषः करोति रूपाण्यनेकानि ॥ ६ ॥ विटः । एवमेतत् ॥ विद्युद्विर्ज्वलती च० संविहसतीवोच्चैर्बलाकाश्रेणिभिर्मोहं इवागतेव धनुषा धारा शतोद्धारिणा ॥ निष्पष्टाशनि निस्वनेनर

सतीवाधूर्णितोवानिलेनलिनैःसांद्रमिवाहिभिर्जलधरैर्धूपायतीवांबरं॥१॥वसं०।जलधर निर्लज्जस्त्वं यन्मो द
यितस्य वेश्म गच्छंती स्तनितेन भीषयित्वा धाराहस्तैःपरामृशसि॥भोः शक्र॥किंते त्यहं पूर्वरतिप्रसक्ता
यत्तं नदस्यबुद सिंहनादैः॥नयुक्तमेतत्प्रियकांक्षितायां मार्गं निरोद्धुं मम वर्षपातैः॥२॥अपिच॥यद्दर्दुरा
हेतोर्मृषा वर्षसि शक्र गोतमोऽस्मीति॥तद्दुःखमप्यपि दुःखं निरवेक्ष्य निवार्यतां जलदः॥१॥अपिच॥गर्ज
वा वर्ष वा शक्र मुंच वा शतशोऽशनिं॥न शक्यते हि स्त्रियोरोद्धुं प्रस्थिता दयितं प्रति॥२॥यदि गर्ज
ति वारिधरोगर्जतु तन्नाम निष्ठुराः पुरुषाः॥अपि विद्युत्प्रदानं त्वमपिच दुःखं न जानासि॥२॥विटः॥ ६७
भवति अलमलमुपालंभेन। उपकारिणी तवेयं॥एरावतोरसि चलेव सुवर्णरज्जुः शैलस्य मूर्ध्नि निहि

तेव सिता पताका॥आखंडलस्य भवनोदरदीपिकेव मारुह्यति ते प्रियतमस्य हि संनिवेशं॥२॥वसं०।भाव
एवं तं जेव एदं गेहं। विटः। सकलकलाभिज्ञाया नकिंचिदिह तवोपदेश्यमस्ति। तथापि स्नेहः प्रलापयति।
अत्र प्रविश्य कोपोत्पत्तिं न कर्तव्यः॥यदि कुप्यसि नास्ति रतिः कोपेन विनाथवा कुतः कामः कुप्य च कोपय
च त्वं प्रसीद च त्वं प्रसादय कांतं। भवत्येवं तावत्। भोभोनिवेद्यतामार्यचारुदत्ताय। एषा कुहुकदंबनीपसुरभौ
कालेघनोद्भासिते कांतस्यालयमागता समदना दृष्ट्वा जलार्द्रालकाः॥विद्युद्वारिदगर्जितैः स चकिता त्वद्
शंकाकांक्षिणी पादौ नूपुरलग्नकर्दमधरौ प्रक्षालयंतीस्थिता॥२॥चारु॥आकर्ण्य। वयस्य जानासि किं
मेतदिति। विद। जं भवं आणवेदि॥वसंतसेनामुपगम्य॥सादरं॥सादरं सोत्थि भोदीए वसं। अज्ज

वेदामि, सा अरं अज्जस्स। भाव, एसा वत्तधारिआ भावस्स जेव्व भोदु॥ विट:॥ स्वगतं॥ अनेनोपायेन नि
पुणं प्रेषितोऽस्मि प्रकाशं॥ एवं भवतु॥ भवति वसंतसेने॥ साटोपकूटकपटानृतजन्मभूमे: शाठ्यात्मकस्य
रतिकेलिकुलालयस्य॥ वेश्यापणस्य सुरतोत्सवसंग्रहस्य, दाक्षिण्यपण्य सुखनि:क्रयसिद्धिरस्तु॥१॥
इतिनिष्क्रांत:॥ वसं। अज्ज मित्तेअ, कहिं तुम्हाणं जूदि अरो॥ विद्॥ स्वगतं॥ ही ही भो, अद्धिजू अरोत्ति
भणंतीए अलंकिदो पिअवअस्सो॥ प्रकाशं॥ भो दि, एसो खु रुक्खवाडिआए॥ वसं। अज्ज का तुम्हाणं
सुक्खरुक्खवाडिआ वुच्चदि॥ विद्। भो दि, जहिं ण खाई अदिएण पीइ अदि॥ वसं॥ स्मितं करोति विद्। ६८
ता पविसदु भोदी॥ वसं॥ जनांतिकं॥ एत्थ पविसिअ किं मए भणिदव्वं॥ चेटी। जूदिअरअविसुहो दे पे

दोसोत्ति॥ वसं। अवि पारद्धस्सं॥ चेटी। अवसरो जेव्व दे पारद्धस्सदि। विद्। पविसदु भोदी॥ वसं॥ प्रविश्यापि
सत्य च॥ पुष्पैस्ताडयंती॥ अइ, जूदि॥ अर अवि सुहो दे पदोसो॥ चारु॥ अवलोक्य॥ अये वसंतसेना घा
सा सहर्षमुत्थाय॥ अपि प्रिये॥ सदा प्रदोषो मम याति जाग्रत:, सदा च मे निश्वसतो गता निशा:॥ त्व
या समेतस्य विशाललोचने, ममाद्य शोकांतकर: प्रदोष:॥१॥ तत् स्वागतं भवत्यै॥ इदमासनमत्रोपवि
श्यतां॥ विद्। इदमासणं उवविसदु भोदी, ॥ नाट्येनासीना: सर्वे उपविशंति॥ चारु। वयस्य, पश्य पश्य
॥ वर्षोदकमुद्गिरता, श्रवणांतविलंबिना करंबेन॥ एक: स्तनो, भिषिक्तो नृपसुतइव यौवराज्यस्थ:॥२॥
तद्यस्य किंचे वासरसीवसंतसेनाया:, अन्ये प्रधानवाससी समुपनीयेतामिति॥ विद्। जं भवं आणवे

दि ॥ चेटी । अज्ज मित्तेअ विदू तुमं अहं जेव्व अज्ज अं सुस्सूसइस्सं ॥ तथा करोति ॥ विदू । अपवारितकेन ॥ भो वअस्स पुच्छामि दाव तत्थभोदिं किं वि ॥ चारु ॥ एवं क्रियतां ॥ विदू । प्रकाशं ॥ अध किं णिमित्तं उन ईदिसे पणट्ठचंदालो एदुद्दिणे अंधआरे आ अदा भोदी ॥ चेटी । अज्जए उज्जओ वत्तणो वसं । एं णिउणोत्ति भणाही ॥ चेटी । एसा क्खु अज्जआ एवं पुच्छदु आ अदा केत्तिअं ताए र अणावली ए मुल्लेति ॥ विदू ॥ जनांतिकं ॥ भो भणिदं मए जधा अप्पमुल्ला र अणावली बहुमुल्ले सुवंणभंडअं ण परितुट्ठा अवरं मग्गिदुं आ अदा ॥ चेरी । सा क्खु अज्जआए अत्तणो करकेत्ति भणि अनुदेहारिदा । सोअ महिओ रा आवेत्थ आरीण आणीअदि कहिं गदोत्ति । विदू । भोदि मंतिदं जेव्व मंतीअ

दि ॥ चेटी । जाव सो अणेसीअदि । ताव एदं जेव गेल्ह सुवंणभंडअं । इति दर्शयति ॥ विदू ॥ विचारयति । चेटी । अदिमेत्तं अज्जो णिज्झा अदि । ता किं दिट्ठपुरुवो दे ॥ विदू ॥ भोदि । सिप्पकुसलत्तणे ओ बंधेदि दिट्ठिं ॥ चेटी ॥ अज्ज वंचिदोसि दिट्ठीए तं जेव्व एदं सुवंणभंडअं ॥ विदू ॥ सहर्षं ॥ भो वअस्स ॥ तं जेव्व एदं सुवंणभंडअं जं अत्माणं गेहे चोरेहिं अवहिदं ॥ चारु ॥ वयस्य ॥ योस्माभिश्चिंतितोन्याजः कर्तुन्यासप्रतिक्रियां ॥ स एव प्रसुतो स्माकं किंतु सत्यं विडंबना ॥ १ ॥ विदू ॥ भो वअस्स सच्चं सवामि वत्तणए ॥ चारु ॥ प्रियं नः प्रियं ॥ विदू ॥ जनांतिकं ॥ भो पुछामि एं कुदो एदं समासादि ॥ दंति ॥ चारु ॥ कोदोषः । विदू ॥ चेट्याः कर्णे ॥ एवं किअ ॥ चेटी ॥ विदूषकस्य कर्णे ॥ एवं किअ ॥ चारु ॥ किमिदं कथ्य

ले वशंतशेणिआ मालिदा; णमए। इत्यर्धोक्ते च मुखमावृणोति॥आधि॥अहो नगररक्षिणो प्रमादः; भो श्रे
ष्ठिकायस्थो नमयेति व्यवहारपदं प्रथममभिलिख्यतां॥कायस्थः। जं अज्जो आणवेदि॥तथा॥कृत्वा॥अ
ज्ज लिहिदं॥शकारः॥स्वगतं॥हीमारिके! उत्तला अत्तेण विअ पायशापिंडलकेण अज्ज मए अत्ता एव्व णिणा
शिदो। शोदु एवं दाव॥प्रकाशं॥अहो अधिअलणाशो इआणं णणामि। मए जेव्व दिट्ठा; किं कोलाहलं कलेध॥
इतिपादेनलिखनं शोंउंति॥आधि। कथं त्वया ज्ञातं यथा खल्वर्थनिमित्तं वाहुपाशेन व्यापादिता॥शकारः २०५
।हंहो; णूणं शरणशूणा एमोघठाणा एगीवालिआ एणिसुवणकेहिं आहल्लणेट्ठाणेहिं तेक्के मि॥श्रेष्ठिकाय

स्थो। ऊल्लविविओ॥शकारः॥स्वगतं॥हिट्ठिआ पत्युज्जीविदस्सि अविदमारिके! श्रेष्ठिकाय। भो के एसो ववहारो
अवलंवदि?॥आधि॥इह हि द्विविधो व्यवहारः॥श्रेष्ठिकाय। केरिसो?॥आधि। वाक्यानुसारेण अर्थानुसारेण च।
यस्तावद्वाक्यानुसारेण स खल्वर्थिप्रत्यर्थिनोः यश्चार्थानुसारेण सचाधिकरणिकबुद्धिनिष्पाद्यः॥श्रेष्ठिकाय ता
वसंतसेणामादरं अवलंवदि ववहारो॥आधि। एवमिदं; भद्द शोधनक वसंतसेनामातरमनुद्रुजयन्नाकृय। शोधन
कः॥तथेति॥निष्क्रम्य गणिकामात्रा सह प्रविश्य॥एदु एदु अज्जा का वृत्था गदा मे दारिआ मित्तघरं अत्तणो
जोव्वणमणुभविउं; एसो उण दीहाऊ गणादि आअच्छु आधिअलणिओ सद्दावेदि; ता मोल्परवशमिव अ
त्ताणं अवगच्छामि हिअएं मे थर हरेदि। अज्ज आदसेहि मे अधि अरणमंडवस्स मग्गं। शोधनकः। एदु

एदु अज्जा । अओ परिक्कामतः ॥ शोधनकः । एदं अधिअलणमंडवं एत्थ पविशदु अज्जा ॥ इत्युभौ प्रविशतः ॥ वृत्था उपसृत्य ॥ सुहं तुम्हाणं भोदु भाव मिस्साणं ॥ आधि । भद्रे स्वागतमास्यतां ॥ वृत्था तथेत्युपविष्टा ॥ शकारः ॥ साक्षेपं ॥ आगदासि बुड्ढकुट्टणि आगदाशि? । आधि । अये त्वं किल वसंतसेनायामाता? । वृत्था । अधए? । आधि । अथेदानीं वसंतसेना क्व गता? । वृत्था मित्तघरअं ॥ आधि । किंनामधेयं तस्या मित्रं? । वृत्था ॥ स्वगतं ॥ हत्थी हत्थी अदिलज्जणीयं क्खु एदं प्रकारं ॥ जणस्स पुच्छणीओ अज्जे अत्थो एउण आधिअरणिअस्स । आधि । अलं लज्जया । व्यवहारस्त्वां पृच्छति । श्रेष्ठिकाय । ववहारो पुच्छदि णत्थि दोसो कधेहि । वृत्था । कधं ववहारो जइ एवं ता सुणंतु अज्ज मिस्सा ॥ सो क्खु सत्थवाहणेविय दत्तस्स णत्तिओ ।

सा अरदत्तस्सेत्ते तणओ सुगिहिदणामहेओ अज्ज चारुदत्तो णाम सेट्ठिचत्तेरे पडिवसदि तहिं मे दारिआ जोव्वणसुहमणुभवदि ॥ शकारः ॥ सुदं अज्जेहिं लिहीयंतु एदे अक्खला चारुदत्तेण सह मम विवादे ॥ श्रेष्ठिकाय । चारुदत्तोमित्तेत्ति णत्थि दोसो ॥ आधि । व्यवहारोयं चारुदत्तमवलंबते । श्रेष्ठिकाय । एवं किअ ॥ आधि । धनदत्त वसंतसेना आर्यचारुदत्तस्य गृहं गतेति लिख्यतां व्यवहारस्य प्रथमः पादः । कथमार्यचारुदत्तोप्यस्माभिराक्षयितव्यः । अथवा व्यवहारस्तमाक्षयति । भद्रशोधनक गच्छ आर्यचारुदत्तं त्वेरं असंभ्रांतमनुद्विग्नं सादरमाक्षय प्रस्तावेनाधिकरणिकस्त्वां द्रष्टुमिच्छतीति । शोधनकः । जं अज्जो आणवेदित्ति निष्क्रांतः चारुदत्तेन सह प्रविश्य च ॥ एदु एदु अज्जो ॥ चारु ॥ विचिंत्य परिजनस्य मे राजा शीलेन च कुलेन च यत्सत्यमिदमाक्षानमवस्थामभिशंकते ॥ सचिंतकं ॥ स्व

गतं ॥ ज्ञातो नु किं स खलु बंधनविप्रयुक्तो मार्गं गतः प्रवहणेन मयापनीतः ॥ चोरक्षणस्य नृपतेः श्रुतिमागतो वा
येनाहमेवमभियुक्तश्च यामि ॥ १ ॥ अथवा किं विचारितेन । अधिकरणमंडपमेव गच्छामि । भट्ट शोधनक, अधिक
रणस्य मार्गमादेशय । शोधनकः । एदु एदु अज्जो ॥ इति परिक्रामतः ॥ चारु । सशंकं ॥ तत्किमपरं ॥ रूक्षस्वरं वासति
वायसोयममात्यभृत्या मुहुराकृष्यंते ॥ सव्यं च नेत्रं स्फुरति प्रसह्य ममानिमित्तानि हि खेदयंति ॥ १ ॥ शोधनकः । एदु ए
दु अज्जो ॥ चारु ॥ खेदमसंभ्रांतं परिक्रम्यायतोवलोक्य च ॥ शुष्कवृक्षस्थितोध्वांक्षआदित्याभिमुखस्तथा ॥ म
यिचोदयतेवामं चक्षुर्घोरमसंशयं ॥ २ ॥ पुनरन्यतोवलोक्य ॥ अये कथमयं सर्पः । मयि विनिहतदृष्टिर्भिन्नी २०७
लांजनाभः स्फुरितविततजिह्वः शुष्कदंष्ट्राचतुष्कः ॥ अभिपतति सरोषो जिह्मितोध्मातकुक्षिर्भुजगपतिरयं

मे मार्गमाक्रम्य सुप्तः ॥ २ ॥ अपिचेदं स्खलति चरणं भूमौ न्यस्तं नचाईतमा महीः ॥ स्फुरति नयनं वामो बाहुर्मु
हुश्च विकंपते शकुनिरपरश्चायं तावद्विरौति हिनैकशः ॥ १ ॥ कथयति महाघोरं मृत्युं नचात्र विचारणा ॥ सर्व
था देवताः स्वस्ति करिष्यंति ॥ शोधनकः । एदु एदु अज्जो इमं अधिअरणमंडवं पविसदु अज्जो ॥ चारु ॥ प्रवि
श्य समंतादवलोक्य अहो अधिकरणमंडपस्य परा श्रीः इह हि ॥ चिंतासक्तनिमग्नमंत्रिसलिलं दूतोर्मिशंखः
कुलं पर्यंतस्थितचारचक्रमकरं नागाश्च हिंस्राश्रयं ॥ नानावाशकंकपक्षिरुचिरं कायस्थसर्पास्यदं नी
तिक्षुण्णतटं च राजकरणं हिंस्रैः समुद्रायते ॥ २ ॥ भवतु प्रक्षिप्य शिरोघातमभिनीय सवितर्कं ॥ अहह्रदमप
रं ॥ सव्यं मे स्पंदते चक्षुर्विरौति वायसस्तथा ॥ पंथाः सर्पेण रुद्धोयं स्वस्ति चास्मासुदेवतः ॥ १ ॥ तावत्प्रवि

शामि ॥इति प्रविशति॥आधि०अयमसौ चारुदत्तो, यस्य: ॥घोणोन्नतं मुखमपांगविशालनेत्रं, नेतद्विभाजन
मकारणादूषणानां॥ नागेषु, गोषु, तुरगेषु, तथा नरेषु, नत्यात्मकृति: सुसदृशं विजहाति रत्नं ॥१॥चारु०भो
अधिकृतेभ्य: स्वस्ति हंहो नियुक्ताअपि कुशलं भवतां।आधि।ससंभ्रमं॥स्वागतमार्यस्य॥इद शोधनक,
आर्यस्यासनमुपनय॥शोधनक:॥आसनमुपनीय॥एदं आसनं, एत्थ उवविसदु अज्जो॥चारु०प्रउपविशति॥
शकार:॥सक्रोधं॥आगदेशिरे इत्थिआधारआ, आगदेशिर अहो णाए ववहाले, अहो धम्मे ववहाले, जे
ए अअंणा हइत्थि आधातुका ह आसणे दीअदि सगव्वं, भोदु, णं दीअदु॥आधि।आर्य॥चारुदत्त, अस्ति
भवतास्या आर्यायां दुहित्रा सह प्रसक्ति: प्रणय: प्रीतिर्वा?॥चारु॥कस्या:॥आधि।अस्या:॥इति प्रसंतमे

नामांतरं दर्शयति॥चारु॥उत्थाय॥आर्ये, अभिवादये।वसन्तसेना॥अज्जे चिरं मे जीव॥स्वगतं॥अअं सो चारुदत्तो;
सुणिक्खित्तं क्खु हरिआए जोव्वणं॥आधि।आर्य, गणिका तव मित्रं?॥चारु॥लज्जां नाटयति॥शकार:।
लज्जा ए, आदु गीसुदा एवा, चालित्तं अत्ति एणिगूहिदुं, सअंइत्थिअं मालिअ अत्थकालणा एणिगूहदि;न
तं हि भट्टको॥श्रेष्ठिकाय।अज्ज चारुदत्त, भणाहि; अलं लज्जा ए, ववहारो खु एसो॥चारु॥सलज्जं॥भो।
अधिकृता, मया कथमीदृशं वक्तव्यं।यथा गणिका मम मित्रमिति; अथवा; योवनमत्रापराध्यति, न चारित्र्यं।
आधि।व्यवहार: सन्निधेयं, त्यज लज्जां हृदि स्थितां;॥ब्रूहि सत्यमले धैर्ये, छलमत्र न गृह्यते॥अले लज्जे
या, व्यवहारस्त्वां पृच्छति।चारु।अधिकृते, केन सह मम व्यवहार:?शकार:।अले मए सह ववहालो॥चारु॥

त्वया॥ सह ममेव्यवहारः सुदुःसहः॥ शकारः। अए इत्थिआधारआ, ते तादिशिं तआरिशदभूषणिषं वशंत
सेणिअं मालिअ, संपदं कवडकावडिके भविअ णिग्गहेसि॥ चारु। असंबद्धः खल्वसि। आर्ये॥ आर्य चारुद
त्त, अलमनेन; ब्रूहि, सत्यं अपि गणिका तवमित्रं॥ चारु। एवमेवं॥ आर्ये, वसंतसेनाक। चारु। गृहंग
ता। श्रेष्ठिकाय। कथं गदा कदा गदा, गछंती वा केण। अणुगदा? चारु॥ स्वगतं॥ किं प्रच्छन्नं गतेति ब्रवीमि
श्रेष्ठिकाय। अज्ज। कधेहि॥ चारु॥ गृहं गता; किमन्यद्ब्रवीमि। शकारः। मम केलकं पुष्पकरंडकं जिं
णुज्जाणं पवेसिअ, अत्थणिमित्तं वाहुपासवलक्कारेण मालिदा, अए शंपदं वदशि घलं गृहेति॥ चा २०९
रु॥ आः। असंबद्धप्रलापिन्॥ अभ्युक्षितोसिसलिलेनेवलाहकानां, चापाग्यपक्षसदृशंभृशमंतरालेऽ॥

मिथ्येतदानमिरंभवतस्तथाहि हेमंतपद्ममिव निःप्रभतामुपेति॥१॥ आर्ये॥ जनांतिके॥ तुलनं
चाद्रिराजस्य, समुद्रस्य चतारणं, ॥ग्रहणं चानिलस्येव, चारुदत्तस्यदूषणं॥१॥ प्रकाशं॥ आर्य चारु
दत्तः; स्वल्पसो कथमिदमकार्यं, करिष्यति॥ शकारः॥ किं पक्षवादेण ववहारे दीशदि?॥ आर्ये॥ अ
येहि मूर्ख वेदार्थान् प्राकृतस्त्वं वदसि, नच ते जिह्वा, निपतिता? मध्याह्ने वीक्षसेर्कं न तवसहसा दृष्टि
र्विचलिता? दीप्ताग्नेः पाणिमंतः क्षिपसि न च ते तत्क्षणं दह्यतेसो?॥ चारिव्या॥ चारुदत्तं चलयसि न ते
देहं हरति भूः; आर्य चारुदत्तः कथमयमकार्यं करिष्यति॥ कृत्वा समुद्रमुद्रोछ्रयमात्रशेषं, दत्तानि
येन हि धनान्यनपेक्षितानि॥ सश्रेयसः कथमिवैकनिधिर्महात्मा पापं करिष्यति धनार्थमवीक्ष्यदुष्टं॥१॥

शकारः। किं पक्वशरीरेण वधहालेदीसदि?। रत्धा हदाश। जो दाणिं णाशीकदं सुवेणगंडओ रत्ति चो
रेहिं अवहरदत्ति। तस्स कालणादो चदुःसमुद्दसारभूदं रअणावलिं देदि। सो दाणिं अत्थकहुवत्त
स्स कारणादो इमं अकज्जं करेदि। हा जादे। एहि मे पुत्ति॥ इतिरोदति॥ आधि॥ आर्य चारुदत्त।
किमसौ पञ्चत्वं गतो उतप्रवहणेनेति॥ चारु॥ नु मम प्रत्यक्षं न गतो, तन्न जाने किं पञ्चत्वं गतो
उतप्रवहणेनेति॥ अवित्थ सामर्षोवीरकः॥ पादप्पहारपरिभवविमाणिणा बंधगरुओवरस्स। अणु
सोअंतस्स इयं कधंपि रत्ती पभाहामे॥ ता जाव अधिअरणमंडवं उवसप्पामि॥ अवेक्ष्यके न सुहं अज्ज
मिस्साणं॥ आधि॥ अये नगररक्षाधिकृतोवीरकः॥ वीरक। किमागमनप्रयोजनं?। वीरकः। ही। वं

धणेण अणसंभमे अज्ज के अणेसंतो। ओ वाडिदं पवहणं वच्चदिति विआरं करंतो अंणेसन्तो अरे तु
एवि आलोइदे मएवि आलोइदव्वोत्ति भणंतो जेव। चेडणमहत्तलएण पादेण तोडिदोस्मि। एदं। सुणिअ
अज्जमिस्सापमाणं॥ आधि॥ भद्र। जानीषे कस्य तत्प्रवहणमिति॥ वीरकः। इमस्स अज्ज चारुदत्तः
स। वसंतसेणा आउदा। पुप्फकरंडकजिण्णुज्जाणं कीलिदुं एी अदिति पवहणवाहएणा कहिदं॥ शा
कारः। पुणोवि सुदं अज्जेहिं। आधि॥ एष भो निर्मलज्योत्स्नो राहुणा ग्रस्य ते शशी॥ अले कूलाव
पातेन प्रसन्ने कलुषायते॥ १॥ वीरकः। पश्चादिह भवतोन्यायं द्रक्ष्यामः। यएष अधिकरणं हा
र्यश्चस्तिष्ठति, तमेनमारुह्य गत्वा पुष्पकरंडकोद्यानं द्रक्ष्यतः; अस्ति तत्र काचिद्विपन्ना स्त्री नवेति

वीरकः। जे अज्जो आणवेदि इतिनिष्क्रांतः॥ प्रविश्यच॥ गदो त्ति तहिं दिट्ठं च मए इत्तिआकलेवरं सावदेहिं।
विलुप्पं। श्रेष्ठिकायाकधं तुए जाणिदं इत्थि आकलेवरत्ति॥ वीरकः। सावसेसेहिं केसहत्थपाणिपादेहिं उवल-
क्खिदं मए। आधि। अहो धिक्त्वेषम्यं लोकव्यवहारस्य॥ यथा यथेदं निपुणं विचार्यते तथा तथा संकटमेव
दृश्यते॥ अहो सुसंन्ना व्यवहारनीतयोमतिस्तु गोः पंकगतेव सीदति॥ चार॥ स्वगतं॥ यथैव पुष्पं प्रथमं वि
कासे समेत्य पातुं मधुपाः पतंति। एवं मनुष्यस्य विपत्तिकाले क्लिष्टेष्वनर्थाबहुलीभवंति॥ आधि॥ आर्य। चा
रुदत्त। सत्यमभिधीयतां। चार॥ दुष्टात्मा परगुणमत्सरी मनुष्यो रागांधःपरिमिहंतुकामबुद्धिः॥ किं यो ११२
यद्वदति मृषैव जातिदोषा तद्भ्रात्य भवति। नतद्धि चारणीयं॥ २॥ अपिच॥ योहं लतां कुसुमितं कुसुमि

तामपि पुष्पहेतो रारुष्य नैव कुसुमावचयं करोमि॥ सोहं कथं भ्रमर पश्यसि दीर्घ केशे प्रगृह्य रुदतीं
भ्रमरीनिहन्मि॥ २॥ शकारः। हंहो। अधिअलणभोइआ; किं तुम्हे पक्खवारेण ववहालं पेक्खध जेण।
अज्जावि एसो हदासचारुदत्ते आसणे धालीअदि। आधि। भद्र शोधनक एवं क्रियतां शोधनः तथाकरोति॥ चा
रु। विचार्यतां। गो अधिकृता। विचार्यतां॥ इति। आसनादुत्तीर्य भूमौ उपविशति॥ शकारः। स्वगतं; सहर्षं
नर्तित्वा॥ हीअ अणाहा मए करे पावे अणाहा मत्थके निवडिदे; ता जहिं चारुदत्तके उवविशादि तहिं हगे उव
विशामि। तथा कृत्वा॥ चारुदत्ता, पेक्ख पेक्ख मं; ता भण भण, भण मए मोडिदत्ति। चार। गो अधिकृता॥ दु
ष्टात्मेति पूर्वोक्तं पठति॥ सनिश्वासं। स्वगतं॥ मैत्रेय गोः किमिदमद्य ममोपघातो! हा ब्राह्मणि। हिजकु

ले विमले प्रसूता ॥ हारोहरेन नहि पश्यसि मे विपत्तिं । मिथ्यैव नंदसि परव्यसनेन नित्यं ॥ २ ॥ प्रेषितश्च मया ते
ह्यातान्वेषणाय मैत्रेयो वसंतसेनासकाशं । शकटिकानिमित्तं च तस्य प्रस्तान्यलंकरणानि प्रत्यर्पयितुं । तत्कथं
चिरयते ॥ ततः प्रविशति गृहीताभरणो विदूषकः ॥ विदू० पेसिदो हि अज्जचारुदत्तेण वसंतसेणा सआसं । तं
हिं अलंकरणाइं गेण्हिअ ज़धा अज्ज मित्तेअ । वसंतसेणा एव्व ओरोहसेणो अलंकारेण अलंकरिअ । अणणी
सआसं पेसिदो इमस्स आहरणं दादव्वं एअं गेण्हिदव्वं । ता समप्पेहिन्ति ॥ ता जाव वसंतसेणा सआसं जेव्व
गच्छामि । परिक्रम्यावलोक्य च । आकाशे कधं भावरेभिलः । भो भावरेभिल । किं निमित्तं तुमं उव्विग्गो उव्विग्गो ११२
विअ लक्खीअसि । आकर्ण्य ॥ किं भणासि । पिअव अस्सो चारुदत्तो अधिअरणमंडवं सद्दावी अदित्ति । ता

एहु अप्पेण कज्जेण होदव्वं ॥ विचिंत्य ॥ ता पच्छा वसंतसेणासआसंगमिस्सं । अधिअरणमंडवं दाव गमिस्सं ॥
परिक्रम्यावलोक्य च ॥ इदं अधिअरणमंडवं । ता जाव पविसामि ॥ प्रविश्य सुहं अधिअरणगोइ आणं । क
हिं मम पि अवअस्सो ॥ आर्धि । नन्वेष तिष्ठति । विदू० कधं अस्स सो त्थि दो चारु० भविष्यति । विदू० अक्किसे मं
दे । चारु० एतदपि भविष्यति । विदू० गो वयस्स किं णिमित्तं उव्विग्गो उव्विग्गो विअ लक्खीअसि । कुदो वा स
द्दाइदो । चारु० वयस्य । मया खलु नृशंसेन परलोकमजानता ॥ स्त्री रतिर्वा विशेषेण शेषमेषोपिधास्यति
॥ २ ॥ विदू० किं किं ॥ चारु० कर्णे ॥ एवमेवं विदू० को एवं भणादि ॥ चारु० संज्ञया शकारं दर्शयति ॥ नन्वेष त
स्करो हेतुभूतः इतीतोमां व्याहरति । विदू० जनांतिकं । एवं । कीरिसो भणीअदि गेहं गदेण ॥ चारु० उच्यमान

मपि अवस्थारोषान्न गृह्यते। विदू। भो भो अज्जा; जेन दाव पुरत्थावणविहारारामदेउलतडागकूवज्जेवेहिं
अलंकिदा एअरी उज्जेअणी। सो अणोसो अत्थ कलुवत्तकारणदो ईदिसं अकज्जं अणुट्ठिदहित्ति।।स
क्रोधं। अरे रे कोणेली सुदा, रा असालमंडाणणआ, दुःसंस्थाणआ किदज्जणदोसमंडआ, बहुसुवण्णमंडिद
मक्कडआ! भणाहि मम अग्गदो, जो दाणिं मम पि अवअः सो कुसुमिदं माधवीलदं पिआ अंबिअ कुसुमा
वचयं ण करेदि, कदावि आ अधत्ताए पल्लवेऊ भोदित्ति; सो कधं एरिसं अकज्जं उहअ लोअविरुद्धं क
रेदि; चिट्ठ रे कुट्टणिउत्ता, जाव एदिणा तवेहि अअकुडिलेण दंडअंडेण मत्थअं दे सदसंडं करेमि।।श ११३
कारः।सक्रोधं।। सुणंतु सुणंतु अज्जमिः सा चारुदत्ता केण शह मम विवादे ववहारे वा,ता कीशएशो

काकपक्षीशमस्तका दुट्ठबदुका ममशिले शदखंडे कलेदि। मा दाव ले दासीए उत्ता, दुट्ठबदुका। विदू।दं
डकाष्ठमुद्यम्य पूर्वोक्तं पठति।।शकारः।।सक्रोधमुत्थाय ताडयति।। विदू।प्रतीपं ताडयति।।अन्योन्यं ताडय
तिः विदूषकस्य कक्षादेशादाभरणानि पतंति।।शकारः।।तानि गृहीत्वा दृष्ट्वा समाधसं।।पेक्खंतु,पेक्खंतु,
अज्जा; एदे खु ताए तवस्सिाए केलका अलंकारा।। चारुदत्तमुद्दिश्य।। इमशो अत्थ कलुवत्तस्स कालएण
एशा मालिदा वावादिदा अ।।अधिकृताः सर्वे अधोमुखाः स्थिताः।। चारु।।जनांतिकं।।अयमेवंविधे काले द
ष्टाभरणविस्तरः।।अस्माकं भाग्यवैषम्यात्पतितः पतयिष्यति।।१।। विदू।भो कीश भूदत्थं ण लिवेदीयदि;
चारु।वयस्य।दुर्बलं रूपतेश्चक्षुर्नैतत्तत्वं निरीक्षते।।केवलं वस्तोरैन्यमश्लाघ्यं मरणं भवेत्।।१।।आधि।

मृ०ना० ११४ कष्टं भोः। कष्टं अंगारकविरुत्थस्य प्रदीप्तस्य वृहस्पतेः॥ ग्रहोयमरः पार्श्वेधूमकेतुरिवोत्थितः॥१॥ श्रे
श्रेष्ठिकाय विलोक्य वसंतसेनामातरमुद्दिश्य॥ अवहिरा दाव अज्जा, एदं सुवण्णभंडअं अवलोअदु सो जे
व्व एसो णवेत्ति॥ स्वगतं॥ अवलोक्य॥ सरिसोएसो, एसो एउणसो। शकारः॥ अं वुद्दकुट्टणि, अवत्थीहिं
मंतिदं वा आए मूकिदं। स्वगतं हदास, अवेहि। श्रेष्ठिकाय अप्पमत्तं कधिदं हि, सो जेव्व एसो जेव्व एसो णवे
त्ति। स्वगतं अज्ज, सिप्पिकुसलदाए ओ वंधे दिट्ठिं, एउनसो॥ आधिगदं, अपि जानास्येतान्याभरणा
नि। स्वगतं भणामि एदु अणारो, अहवा कदावि, केणावि सिप्पिणा घडिदा भवे। आधि। पश्य श्रेष्ठिन्
॥ वस्त्वंतराणि सदृशानि भवंति नूनं, रूपस्य भूषणगुणस्य च कृत्रिमस्य॥ दृष्ट्वाक्रियामनुकरोति हि शिल्पमेव ११४

र्गः सादृश्यमेव कृतहस्ततया चरंतं॥२॥ श्रेष्ठिकाय अज्ज चारुदत्तः स केरकाणि एदाणि॥ चारु न खलु, न खलु।
श्रेष्ठिकाय ता कः सः। चारु। इहा लाभवत्या दुहितुः। श्रेष्ठिकाय कधं एदाइं ताए विआअं गदाइं। चारु। एवं गता
नि, ओ इदं। श्रेष्ठिकाय। अज्ज चारुदत्त, एत्थ सव्वं वत्तव्वं। पेक्ख, पेक्ख, सव्वेण सुहं खु लब्भइ, सव्वालावेण होइ
। पावं, सज्जंति वेवि अक्खला मा सव्वं अलिएण गुहेहि। चारु। आभरणान्याभरणानीति न जाने, किं खल्वहं
हा। हा नीतानीति जाने। शकारः। उज्जाणं पवेशिअ पठमं मालेशि, कवडकावडिआए संपदं णि गूहेशि। आ
धि। आर्य चारुदत्त, सत्यं मणिधीयतां॥ इदानीं कुसुमारेस्मिन्निःशंककेशाः कशाः॥ तव गात्रे पतिष्यंति स
हास्माकं मनोरथैः॥१॥ चारु। अपापानां कुले जाते मयि पापं न विद्यते॥ यदि संभाव्यते पापं, अपापेन च किं

मया ॥१॥ स्वगतं ॥ न च मे वसंतसेनाविरहितस्य जीवितेन कृत्यं । भवतु शोभनः किं बहुना ? ॥ मया किल नृशंसेन लोकद्वयमजानता ॥ स्त्रीरतिश्च विशेषेण शेषमेषा भिधास्यति ॥१॥ शकारः । वावादिदा ; अले तुमं पि भण, मए वावादिदंति । चारु ॥ स्वयमेवोक्तं । शकारः । शृणोषि, शृणोषि, भट्टालकः एदेण मालिदा । एदेण जेव्व शंशए छिण्णो एदश्श दलिद्दचारुदत्ता ह शालीले । दंडे धालीअदु । आधि । शोधनक यथाह राष्ट्रियः । भो राजपुरुषा गृह्यतामयं चारुदत्तः ॥ राजपुरुषा गृह्णंति ॥ वृत्था पसीदंतु पसीदंतु अज्जमिस्सा जो दाव चोरेहिं अवहदस्स ॥ इत्यादि पूर्वोक्तं पठति । ता जदि वावादिदा मम सरिआ, वावादिदा ; जीवदु मे दीहाऊ । अणं च । अत्थिपच्चत्थिणं ववहारो णअ अहं अत्थिणी ; तामुंचध एदं । शकारः । अवेहि गश्चोहाशि ; गश्चे किं तव एदिणा ? । आधि । आर्य गम्यतां । हे राजपुरुषा निष्क्रामयतैनं । वृत्था हा जादम्हा

पुत्तअ । इति रुदती निष्क्रांता ॥ शकारः । स्वगतं ॥ कष्टं मया एतस्य अत्तणो सलिसं ; संपदं गच्छामि । निष्क्रांतः ॥ आधि । आर्य चारुदत्त ; निर्णीतमेतत् प्रमाणं शेषे तु राज्ञा ; तथापि शोधनकं विज्ञाप्यतां राजा पालकः ॥ अयं हि पातकी विप्रो न वध्यो मनुरब्रवीत् ; ॥ राष्ट्रादस्मात्तु निर्वास्यो विभवैरक्षितैः सह ॥१॥ शोधनक जं अज्जो आणवेदि ॥ इति निष्क्रम्य पुनः प्रविश्य सास्रं ॥ अज्जा, गदं हि ताहं लाआ पालओ भणादि, जेण अत्थ कहवत्तश्श कारणादो वशंतसेणा वावादिदा, तेहिं तेजेव आहरणाइं गले बंधिअ डिंडिअ रक्खिएण मसाणं णाइय, शूले भल्लेधत्तो जो को वि अवरो एरिसमकज्जमणुचिट्ठदि सो एदिणा संणिआरदंडेण वासिज्जदि । चारु ॥ अहो अविवेकोविमृष्यकारी राजा पालकः । अथवा ॥ ईदृशो व्यवहारो राज्ञो मंत्रिभिः परिपातितः ॥ स्थाने खलु महीपाला गच्छंति कृपणां श्रियं ॥१॥ अपिच । ईदृशैः

श्वेतकाकोयेः राज्ञः शासनदूषकैः ॥ अपापानां सहस्राणि हन्यंते चरतानि च ॥१॥ सरवे मैत्रेय गल्ल महूचना देवामपश्चि
ममभिवादयस्व। पुत्रंचमे रोहसेनं परिपालयस्व। विदू। मूले छिन्ने कुतो पादवस्स पालणं। चारु॥ मामेवं॥ रणो लोकांत
रस्थानां देहप्रतिकृतिः सुतः ॥ मयि योयस्तव स्नेहो रोहसेने सयुज्यतां ॥२॥ विदू। भो अवैस्स, अहंते पि अव अस्सो
भविअ, तुए विरहिदं पाणाइं धारेमि? चारु॥ रोहसेनमपि तावद्दर्शय॥ विदू। एवं करुज्जदि। आधि। भद्द शोधनक,
अपरायैतामयं गोहकः॥ शोधनकस्तथा करोति॥ आधिकः कोत्र भो चांडालानां दीयतामादेशः॥ इतिचारुद
त्तं विसर्ज्य निष्क्रांताः सर्वे राजपुरुषाः॥ शोधनकः इदो आ अज्जु अज्जो। चारु॥ सकरुणाममैत्रेय, योयमेवं विधे
कालीं इत्यादि ओकोशे पेक्षते॥ विषसलिलतुलाग्निप्रार्थिते मे विचारे, क्रकचमिह शरीरे वीक्ष्य दातव्य मद्यः॥ अथ

रिपुवचनाद्वा ब्राह्मणं मा निहंसि, पतसि नरकमध्ये पुत्रपौत्रैः समेतः॥२॥ अयमागतोस्मीति निष्क्रांताः सर्वे॥
व्यवहारो नामनवमोंकः समाप्तः॥ अथदशमोंकः॥ ततः प्रविशति चांडालद्वयेनानुगम्यश्वासदत्तः। अहो तलिकए
कलअर कालए णववहबंधणं अणे णिअणा, अइलेण सीसछे अणसूलालो वेसु कुशल सु, ओशालध, अज्जा,
ओशालध। एशे अज्ज चारुदत्ते दिण्ण कलवीडए मे गहिदे, अत्तेहिं वत्थापुलिसेहिं, दोवेजेव मंदएहे थोअंथो
अं खअं जाइं॥ चारु॥ सविषादं॥ नयनसलिलसिक्तं पांशुरूषीकृतांगं, पितृवनसुमनोभि वेष्टितं मे शरीरं॥ विर
समिहरदं तोरक्तगंधानुलिप्तं, बलिमिव परिभोक्तुं वायसास्तर्कयंति॥१॥ चांडालौ। ओशालध, अज्जा, ओशालध।
किं पेक्खध? छिज्जंतं शस्त्रपुलिकां कालपरशुधाराहिं, शरअणसउणाधिवासं शज्जाणपुलिशदुमं एदं आअउ

ले चारुदत्ता, आअच्छ॥ चारु०। पुरुषभाग्यानामविचिंत्याः खलु व्यापाराः। यदहमादृशो दशामनुप्राप्तः॥ सर्वगात्रेषु विन्यस्तैरक्तचंदनहस्तकैः॥ पिष्टचूर्णावकीर्णश्च, पुरुषोहं पशूकृतः॥२॥ अयतो निरूप्य॥ अहो नारतम्य नराणां॥ सकरुणं॥ अमीहि दृष्ट्वा मदवस्थितिमेतन्मर्त्यं धिगस्त्वित्युपजातबाष्पाः॥ अशक्नुवंतः परिरक्षितुं मां, स्वर्गं लभंते नि वदंति पौराः॥१॥ चांडालो। ओशालध, अज्जा, जोशालध, किं पेक्खध? इदे पराहिअंते, गोप्पशवे, शंकमं च तालाणं, शप्पुरिशपाणविपत्ती, चत्तालि इमे एदहुवा। एक्कं हं दु, आहीता; पेक्ख, पेक्ख। एआलीपधाण भूज्जी अत्ते करंत अंणाए, किं, लुअदि अत्तलिकेव; आदु अणाधे पडदि वज्जे?॥ द्वितीयः। अले, गोहा एअ लुअदि अंतलिक्खेव णेअ णेअ अणाधे पडदि वज्जे, महिलासमूहमेहे निवडइ एअणंवुधारहिं। अविअ॥ बरसं

मि णीअमाणे अणाशे शच्चशे लोरमाणाशे, एअणशालिलेहिं सित्ते लछादो ण उणमइ लेणु। चारु॥ निरूप्य स करुणं॥ एताः पुनर्हर्म्यगताः स्त्रियोमां यातायनार्थेन विनिःसृतास्याः॥ हा चारुदत्ते त्यभिभाषमाणा, वाष्पग्रहास्त्री भिरिवोत्सृजंति॥ चांडालो। आ अज्ज, ले चालुदत्ता, ओअच्छ; इमं घोसणट्ठाणं। आहणेध डिंडिमं, घोसेध घोसणं॥ अभो शुणाध, अज्जा, शुणाध; ऐशे शत्थवाहविण अद्दत्तशे णत्थिके शागरदत्तशे पुत्तके, अज्ज चारुदत्ते णाम; एदिणा किल अकज्जकालिणा, गणिआ वसंतसेना अत्थकलत्तशे कालणदो, रंणो पुप्फकलंड अजिंणु ज्जाणं पवेशिअ, बाहुपाशबलक्कालेण मालिअत्तिं एशो शेलोत्ति गहिदे शअंअ पडिवंणे तदो रंणा पा लणे अरे आणत्ता, एदं मालेदुं। जदि अवेले इच्छिशे उभओलोअविलुत्थं अकज्जं केलदि, तंपिलाओ पालए

एवंजेव्व शाशदि॥चार॥सनिर्वेदं स्वगतं॥भरवशतपरिपूतं गोत्रमुद्भासितं मे, सदसि निविडैश्चेत्यवत्सघोषैः पुरस्तात्; मम मधुरदशायां वर्तमानस्य पौरैः स्तदसदृशमनुष्यैर्घुष्यते घोषणायां॥१॥उद्घाट्य कर्णौ पिधाय॥प्रियेवसंतसेने॥शशिनिमलशुभ्रदंति, सुरुचिरविद्रुमसन्निभाधरोष्ठि, तव वदन भवामृतं निपीय, कथमवशोत्स्य वशाविषं पिबामि॥१॥ओ ओशलध, अज्जा, ओशलध॥एरीगुणल्ल अणणिही, सज्जनदुःखाणं उत्तलणसदू, अशुवेणमंडणअं अवणीअदि अज्जा एआलिहो॥अणंच॥सव्वकलु होइ लोए लोए सुहसंधिदाणं तन्तिल्लो, विणिवडिदाणं एलाणं पिअ आली दुल्लहो होदि॥चार॥सर्वतोवलोक्य॥अमीहि वस्त्यांतररूपवक्त्राः, प्रयांतिमे दूरतरं वयस्याः॥परापि बंधुःसमसंस्थितस्य मित्रं नरश्चिद्विषमस्थितस्य॥२॥चेडाले॥ओशलएण कदं विवत्ते लो अमग्गः ता आणेप

एदं दिण्णवज्जचिण्हं॥चार॥निश्चित्य॥मैत्रेय, ओः किमिदमित्यादिपठति॥नेपथ्ये हा तात, हापि अव अः सः॥चारु॥आकर्ण्य सकरुणं॥भोः स्वजातिमहत्तरइत्याख्यां भवतः संकाशात्प्रतिग्रहं कर्तुं॥चेडाले किं अस्माणं इत्यादो पडिग्गहं कलेसि॥चारु॥शांतं पापं; नापरीक्षितकारी दुराचारः पालकइव चेडालः; तत्परलोककार्यं पुत्रमुखं द्रष्टुमभ्यर्थये॥चेडाले एवं करीअदु॥नेपथ्ये हा तात, हा आवुक॥चारु॥श्रुत्वा सकरुणं॥भोः स्वजातीत्यादि पठति॥चेडाले॥अले पउत्ति, खणं अंतले देक्खएसो अज्ज चारुदत्तस्स पुत्तमुखं॥पेक्खदु नेपथ्यामिमुखं॥अज्ज इदो आ अउ, लेहालआ आ अउ॥ततः प्रविशति दारकं मादाय विदूषकः॥विदू॥तुवरदु, तुवरदु, गदूमुहो; पिदा दे मारिदुणीअदि॥दारकः॥हा आवुक, हा तात!॥विदू॥हा पि अव अः सः, कहिं मये तुमं पेक्खिदव्वो॥चारु॥पुत्तं मि

शं च वीक्ष्य ॥ हा पुत्र हा भैत्रेय ॥ सकरुणं ॥ भो: कष्टं ॥ चिरं खलु भविष्यामि परलोके पिपासित: ॥ अत्यन्तमिदम्
स्माकं निवापोदकं भो जनं ॥ १ ॥ किं पुत्राय प्रयच्छामि ॥ आत्मानमवलोक्य ॥ यज्ञोपवीतं दृष्ट्वा आइदं तावदस्ति
मम च ॥ अमोक्तिकमरेखावर्णं ब्राह्मणानां विभूषणं देवतानां पितृणां च भागोयेन प्रदीयते ॥ २ ॥ इति यज्ञो
पवीतं दर्शयति ॥ चांडाल: ॥ आ अज्ज ले चारुदत्ता आ अज्ज ॥ द्वितीय: ॥ अले अज्जे चारुदत्ते णिलुवदेरणं णा
मेण आलवेशि ॥ अले पेक्ख ॥ अभ्युदय अवसाणे तहअ लत्तिं दिवं अहरमग्गा उद्दामेव किशोली णिअडी कुपडि
विदुं आदि ॥ अणेन च ॥ शक्यावबोधशो किं पणामिअ मस्तेण का अधं लाहुग्गाहिदे विअ चंदे ण वदणीओ
अणपदेशा ॥ बालक: ॥ अले अले चांडाला कहिं आवुके णेध ॥ चारु ॥ वत्स ॥ अंसेन विभ्रत्करवीरमालां स्कंधे

न शूले हृदयेन शोकं आघातमद्याहमनुप्रयामि शाम्यित्रमालंब्योमवाधरेज: ॥ १ ॥ चांडाल: ॥ दालआ णहु अ
ज्जे चांडाला चांडाल उल्लम्मि णादपुव्वा जे अहिभवंति साहुं ते पावा तेअ चांडाला ॥ दारक: ॥ ता कीस मालेध
आवुकं ॥ चांडाल: ॥ हीहो जो अस्स लाअणिओ ओ कदु अक्खलइस्सदि ण हु अज्जे ॥ दारक: ॥ वावादेध मूमुंचध
आवुकं ॥ चांडाल: ॥ हीहाओ एवं भणंते चिलं मे जीव ॥ चारु ॥ सास्रं पुत्रं कंठे गृहीत्वा ॥ इदं तेऽहं सर्वस्वं स
मर्पयामि इत्यो: ॥ अंचलेन मनोशीरं हृदयस्यानुलेपनं ॥ २ ॥ अंसेन बिभ्रदित्यादि पुन: पठति अवलो
क्य स्वगतं ॥ अमी हि वस्त्रांतरनिरुद्धवक्त्रा इत्यादि पुन: पठति ॥ विदू ॥ भो महमुहा मुंचध णिअवअ: सं चा
रुदत्तं मे वावादेध ॥ चारु ॥ शांतं पापं दृष्ट्वा स्वगतं ॥ अद्यावगताऽस्मि समस्थितेत्यादि पठति ॥ प्रकाशं ॥ एता:

पुनर्हर्म्यगतास्त्रियोमामित्यादि पुनः पठति ॥ चांडालः ओशलध अज्जा ओशलध । किं पेक्खध? शण्मुद्रिशं अजशविशेण पंणट्ठजीवाशं कूवंमि कवुड्डिदपाशं कंचणकलशं वड्ढंते ॥ चारु ॥ सकरुणं ॥ शशि विमलमयूखेत्यादि पठति ॥ अपरः ॥ अले पुणोवि घोसेहि चांडालः ॥ तथा करोति ॥ चारु ॥ प्रासादं व्यसनकृतां दृशमनार्यो यत्रेदं फलमपि जीवितावमानं ॥ एषा न त्यजति घोषणामि नोमे श्रोतव्यं यदिदमसो त्वया हेतति ॥ १ ॥ ततः प्रविशति प्रासादस्थावत्यः स्थाविरकः । घोषणामाकर्ण्य सवेकृत्यं ॥ कधं अपावे चारुदत्ते वावारीअदि । होदु इमाशोधणगर वालगप्पोलिकोहा एदिणा जिणगवकेरण अत्ताणअं लिक्खिवामि । वले होउअलदेण अणणो कुलउत्तविहगाणं वाशपारवे अज्ज चारुदत्ते एवं जदि विवज्जामि लत्थे मए पलत्तोए ॥ इत्यात्मानं पातयितुमारब्धा उच्चैरिति; भगे मे डंडणीअदे; ता चांडालघोसं समणो सामि ॥ दृष्ट्वापसृत्य ॥ हंहो चांडाल अंतरं अंतरं चांडालो । अले के अत्तलअं मग्गदि ? । चेटः ॥ शृण्वंतु इतिपूर्वोक्तं पठति ॥ चारु ॥ अये ॥ कोयमेवं विधे काले कालपाशस्थिते मयि ॥ आनार्यहतशस्य द्वेणमप

शंतशेणा णीदा तदो मम शामिणा मं णकोमशित्ति कदुअं वाहुपाशवलक्का माक्खिदाए उणा एदिणा अज्जेण । कधं विदूलदाए अकोवि शरणादि ता किंकलेमि ? अत्ताणअं पातेमि ॥ विचिंत्य जदि एवं कलेमि तदा अज्ज चारुदत्तेण वावारीअदि । होदु इमाशोधणगर वालगप्पोलिकोहा एदिणा जिणगवकेरण अत्ताणअं लिक्खिवामि । वले होउअलदेण अणणो कुलउत्तविहगाणं वाशपारवे अज्ज चारुदत्ते एवं जदि विवज्जामि लत्थे मए पलत्तोए ॥ इत्यात्मानं पातयितुमारब्धा उच्चैरिति; भगे मे डंडणीअदे; ता चांडालघोसं समणो सामि ॥ दृष्ट्वापसृत्य ॥ हंहो चांडाल अंतरं अंतरं चांडालो । अले के अत्तलअं मग्गदि ? । चेटः ॥ शृण्वंतु इतिपूर्वोक्तं पठति ॥ चारु ॥ अये ॥ कोयमेवं विधे काले कालपाशस्थिते मयि ॥ आनार्यहतशस्य द्वेणमप

दुखोदितः ॥१॥ अहो श्रुतं भवद्भिः । न मीतो मारणादस्मि केवलं दूषितं यशः । विशुद्धस्य हि मे मृत्युः पुत्रजन्मस
मो भवेत् ॥२॥ अन्यच्च ॥ तेनास्म्यकृतवैरेण क्षुद्रेणात्यल्पबुद्धिना ॥ शरेणेव विषाक्तेन दूषितो नापि दूषितः ॥१॥
चांडालो यावत्तज्ज० अवि सच्चं भणासि ॥ चेटः । सच्चं हगेवि मा कश्शवि कधं दृश्शिस्सिन्ति पाशादबालगपदोलिकाए
देउलिअलेण वंधिअ णिक्खित्ते । प्रविश्य ॥ शकारः ॥ सहर्षं मंशेण तिक्तवित्तेण भत्ते । शाकेण शूपेण समुत्तेके
ण । भुत्ते मए अत्तणअ सगेहे शालिशाकूलेण गुलोदणेण ॥ कर्णं दत्त्वा ॥ भिन्नसरवरणाए चांडालणाया ए श
लशंजोए । जधा अ एशो उरकालिदे वस्सडिंडिमशद्दे पडहाणअ शुणीअदि । तधा तक्केमि । दलिद्दचालुदत्ताके व
स्सट्ठाणणी अदिति ता पेक्खिस्सं । रिद्धुविणाशेण महंते हलअशे पडिदाशे होदि । शुदं च मए जेवि किल श

त्तुं वावारयंते पेक्खदि तशा अणिशिशे जंमंतले अक्खिलोगेण होहिमए कधु विषगंदि गब्भपविट्ठेण विअ कीडए
ण किंवि अंतले मग्गमाणेण उप्पाडिदे ताह दलिद्द चालुदत्ताह विणाशे शंपदं अत्तणके लिकाए पाशादबालगपदो
लिआ ए अहिलुहिअ अत्तणो पडक्कं पेक्खामि तथा दृष्ट्वा च ॥ हीएदाह दलिद्द चालुदत्ताह वस्सणीअमाणाह ए
शे वट्टे जणासंमद्दे जे वेले अन्हालिशोपवेडे वडमाणुशे वस्सं णीअदि तं वेले कीदिशं भवे ॥ निरीक्ष्य ॥ कधं एशो
शे णववलद्दकविअ मंडिदे दक्खिणं दिशं णीअदि । अध किं णिमित्तं मम केलिकाए पाशादबालगपदोलिकाए समी
वे घोषणा णिवुडिदा णिवालिदा अ । विलोक्य ॥ कधं थावडेके चेडे विणत्थि दुध माणम तेण इदो गदुअ मंत
णेदे कडे भवीअदि ता जाव एं अणे शामि ॥ इति अवतीर्य पिसर्पति ॥ चेटः ॥ दृष्ट्वा ॥ अट्टालका एशो शे आगदे ॥

चांडालो। ओशलध, देव्व मग्गं, दालं दक्केध, होध तुएहीआ;।अविणअं तिक्खविशाणं दुव्ववहेउं इदो एदि।शकारः। अले, अले, अंतलमंतलं देध।।उपसृत्य।।पुत्तका थावडका, चेडा,एहि गच्छम।।चेटः।हीं, अणज्ज वसंतशेणिअं मालिअ एा पलितुद्दशि; शंपदं पणइजणकप्पपादपं अज्ज चारुदत्तं मालइदुं ववशिदेशि।शकारः। एा हिएदएणकुंभशलिशो हगे इत्थिअं वावादेहि। सर्वे।अहो, तुए मालिदा;एा अज्ज चारुदत्तेण।शकारः।के एवं भणादि। सर्वे।।चेटमुद्दिश्य।।एं एसो साहु।।शकारः।अपवार्य सभयं।।अविहमाहिके, अविहमाहिके! कधं थावडअ चेडे सुट्ठु एा मए शंजदे एशो कदु मम अकज्जशश सक्कदी।।विचिंत्य।।एवं दाव कलइशं वका शं अलिअं भद्दालको, हो, एशो केण शंवणो चोलिआए मए गहिदे पिट्ठिदे मालिदे,वत्थेअ, ता किदवेल एशो,

अं भणादि, किं शद्दं शच्चं?।।अपवारितकेन चेटस्य कटकं प्रयच्छति।।स्वैरकं पुत्तका थावडक चेडा,एदं गेण्ह अ अनधा भणाहि।।चेटः।।गृहीत्वा।।पेक्खध, भट्टालका, हो सुवंणेण मं पलोभेदि।।शकारः।।कटकमालिंघ।।एशो शे शंवणके जश्श कारणा मए वद्धे।।सक्रोधं।।हंहो, चंडाला, मए कदुएशो शंवणो।अंडाले णिउत्ते शंवणचोलअंते मालिदे पिट्ठिदे।ता जदि एा पतिआ अधं,ता पिट्ठि दाव पेक्खध।।चांडालो।।दृष्ट्वा।।सोहणं भणादि।विडत्ते चेडे किंणप्पडवदि।चेटः।हीमादिके!ईदिशो दाशाभावे अं शद्दं कंपि णपत्ति आइ अदि।।सकरुणं।अज्ज चारुदत्त,एत्तिके मे विहवे।इति।पादयोः पतति।।चारु।।सकरुणं।उत्तिष्ठ,भोः पतितसाधुजनानुकंपिन्, निःकारणोपगतबांधवधर्मशीलः;।।यत्रः कृतोपि सुमहन्मम मोक्षणाय, दैवं न सं वरति, किं न कृतं त्व

याय॥१२॥ चांडालो॥भट्टके॥पिट्ठिअएदं चेडअं णिक्कालेहि॥शकारः॥णिअत्तालेहि॥इति निर्वासयति॥अले चांडा
डाला॥किं विलंबधं॥मालेध एदं॥चांडालो॥यदि तुवलशि तां शयंलेव्व मालेहि॥रोह अले चांडाला॥मंभारेध॥मुच
ध,आवुकं॥शकारः॥शपुत्तेजेच्च एदं मालेध॥॥चारु॥सर्वमस्य मूर्खस्य संभाव्येते तद्गच्छ पुत्र मातुःसमीपं॥रोह
किं मए गदेण कादव्वं॥चारु॥आश्वसं वत्स गतस्यूगृहं॥त्वंयेवमातरं॥॥मापुत्र पितृरोषेण त्वमप्येवं गमिष्य
सि॥१॥ तद्गृहीत्वेनं व्रज॥विटः॥भो वअः सः एषे तुए आनिदं तुए विणा अहं पाणाइं धारेमित्ति॥चा
रु॥वयस्य स्वाधीनजीवितस्य नयुज्यते तव प्राण परित्यागः॥विटः॥स्वगतं॥जेत्तेणं तधाविण सक्कुणो
मि पिअ वयःस्स विरहिदे पाणाइं धारेदुंति॥ तो वन्हणीए हारअं समप्पिअ माणपरिच्चाएण अत्तणोपि अव
अःसमणुगमिःसं॥प्रकाशं॥भो वअःस॥पराणेमि एदं लहु॥इतिसकंठग्रहं धारयाःपतति॥हारकोपि रुदन्प

तति॥शकारः॥अले एणभणामि शपुत्ताकं चारुदत्तंकं वाधारेधत्ति॥चारु॥अयं नाटयति॥चांडालो॥अले णहि अ
म्हाणं ईदिशी लाभणत्ती जधा शपुत्ते चारुदत्ते कावोदधत्ति॥ तानिक्कम्म ले दालअ॥इतिनिष्क्रामयतः॥चांडालो
॥इमं तद्दंडं घोसणथाणं,तोडध शिद्दिमं॥पुनर्घोषयतः॥शकारः॥स्वगतं॥कधं एशो ण पत्तिआअंति पोलाः॥
प्रकाशं॥हंहो चारुदत्ता,वदुवुड्ढका,खपुत्तेआ अरिएशे पोलजणे॥तां अत्तणकेनिकाए जीहाए भणाहि,मए व
शंतशेणिआ मारिदेत्ति॥चारु॥तूष्णीमास्ते॥शकारः॥अले चंडालगोहे,पा भणादि चारुदत्त वदुवके।ताअ
णावेध दुविएण जज्जरवंशारवंडेन शोरसलेन तालिअ॥चांडालः॥प्रहारमुद्यम्य॥भो चारुदत्त भणाहि॥चारु॥
सकरुणं॥प्राप्येतद्व्यसनमहार्णवप्रपातं न त्रासो न च मनसोस्ति मे विषादः॥एकोमां दहति जनापवादवह्निर्मल

य्यं यदिह मया हता धियेति ॥१॥ शकारः । पुनस्त्थेव ॥ चारु ॥ भो भो पौराः । मया खलु नृशंसेनेत्यादि पु
नः पठति ॥ शकारः ॥ वावादिदा ॥ चारु ॥ एवमस्तु । चेडा । अले । तव वत्थवालिआ । द्वितीयः । अले । तव । प्रथमः ।
अले । लेक्खअं कलेम्ह ॥ इति बहुविधं लेखकं कृत्वा ॥ प्रथमः । अले । अरिमम केलिका वत्थवालिआ । ता चिट्ठ
दाव मुहुत्तअं ॥ द्वितीयः । किं णिमित्तं ॥ प्रथमः । अले । णिरोहि पिदुणा शग्गं गत्तुंतेण । यथा । पुत्त वीरअ । ज
इ तुह वत्थवाली होदि । मा सहसत्ति वावादि अशी वस्सु ॥ द्वितीयः । अले । किं णिमित्तं । प्रथमः । कदावि
कोविशाधु अत्थं दइअवस्सं मोआवेदि । कदावि लेणं पुत्त भोदि तेण वत्थावेण शव्ववस्साणं मोकेदा होदि ।
कदावि हत्थी वेत्थं रुंडेदि तेण शोणमेण वस्से मुत्ते होदि । कदाविला अपडिवत्ते होदि तेन शव्ववस्साणं मो

केदा होदि । शकारः ॥ किं किंत्ता अप्पडिवत्ते होदि । चेडा । अले । वस्सवाडिआए लेखअं कलेम्ह । शकारः ॥ अ
ले । शिग्घं मालेध चालुदत्तकं ॥ इत्युक्त्वा ॥ चेटं गृहीत्वा एकांते स्थितः । चेडा । अज्जचालुदत्त । ता अणिओ
ओ क्खु अवरण्हदि । एक्कदु अम्हे चेडाल । ता सुमलेहि जं सुसलिद्धं चारु भणति यदिधर्मादूषितस्या
पिमद्य प्रबलपुरुषवाक्येभाग्यदोषात्कथंचित् ॥ सुरपतिभवनस्या यत्र तत्र स्थितावा व्यपनयतु कलंकं स्व
स्वभावनैव ॥ १ ॥ भो । कं तावन्मयागंतव्यं । चेडा ॥ अय्यतो दरीपिला ॥ अले । एदं दीशदि दक्खिणम
शग्गं । जेण पेक्खिअ वस्सा शत्ति पाणाइं मुंचंति । पेक्ख । अत्थकलेवरपडिवत्तं कट्ठंति दीहगोमाओ ।
अत्थंवि शूलल्लगं वेशं विअ अदूहाशशा । चारु ॥ हा हतोस्मि मंदभाग्यः ॥ इतिसावेगमुपविशति ॥

शकारः॥ण दाव गमिश्शं चारुदत्तावं वावादअंतं दाव पेक्खामि॥परिक्रम्य॥दृष्ट्वा॥कधं उवविट्ठे चोंडालः। चालुदत्ता, किं भीदेशिए॥चारु॥सहसोत्थाय॥मूर्ख! नभीरुर्मरणादस्ति केवलं दूषितंयशः। इत्यादि पुनः पठति॥चोंडा। अज्ज चारुदत्तगअणदले पडिवसंता चेदं सुज्जाविपत्तिं लहंति; किं पुण अणामलणभीलुआ माणवा वा; लोए केवि अविट्ठोपलद्धि, केवि पडिट्ठोवि उट्ठेहि, उट्ठंत पडंताह वशणपाछिआशावशा उण अत्थि, एदाइं हिअए कहुअ संधोलेहि अत्ताणअं॥चोंडालं प्रति॥एदं च उत्थघोषणा ढाणं ता उग्घोसह॥पुनस्तेथेवोद्घोषयति॥चारु॥हा प्रिये वसंतसेने॥शशिशकलमयूखेत्यादि पठति॥ततः प्रविशति ससंभ्रमा वसंतसेना भिक्षुश्च॥भिक्षुः॥हो माणहे! पत्थाणपडिःशत्तिं शमःशाशिअ वसंतशेणिअ णेणयंते अणुग्गिहिदहि पवज्जाए, ज्वाशिके कहिं तुमंणा

इःशं॥वसं॥अज्ज चालुदत्तःशेजेव गेहंतःसदं सणेणा मअलोउणःस विअ कुमुदिणिं आणंदेहिमं॥भिक्षुः॥ स्वगतं॥कदलेणा मग्गेण पविशामि॥विचिंत्य॥लाअमग्गेणजेव पविशामि॥उवाशिके, एहि इमं लो अमग्गं॥आकर्ण्य॥किंणु हु एशो लाअमग्गो महंते कलअले सुणीअदि॥वसं॥अग्रतोनिरूप्य॥कधं, पुरोमहाजणस्स मूहो; अज्ज, जाणाहि दाव किं णेदं त्ति॥विसमभरक्कंता विअ वसुंधराए आवासोणदा उज्जइणी॥ वट्टदि॥चोंडा। इमं अपच्छिमं घोशणद्वाणं; ता तालेध डिंडिमं उग्घोशेध घोषणं॥तथा कृत्वा॥भो चालुदत्त, पडिच्छदु जेव माली अशि॥चारु॥भगवत्योदेवताः॥भिक्षुः॥श्रुत्वा ससंभ्रमं॥उवाशिके; तुमं किल चालुदत्तेण मालिदा शित्ति, चालुदत्तो मालिदुएी अदि॥वसं॥ससंभ्रमं॥हध्धी, हध्धी; कधं मम मंदभाइणीए केरे अज्ज चालुदत्तो वावादी

अदि।भो तुरिदं,भो तुरिदं,आदेसेहि मग्गं। भिक्षुः।तुवलदु,तुवलदु,वुत्थोवाशिआ,अज्ज चालुदत्तं जी
अंतं शम:शदिदुं।अज्जा अंतलमंतलं देध।वसं।अंतलमंतलं॥चोडा।अज्ज चारुदत्त,सामिणिओ ओ
अवरइज्जदि,ता सुमलेहि नं सुमलिदव्वं।चारु॥किंवहुना॥भगवतीत्यादिश्लोकं पठति॥चोडा।खड्गआ
दृष्य॥अज्ज चारुदत्ता,उत्ताणेभविअ,समं चिट्ठ;एकपहालेण मालिअ तुमं शग्गं णेस्सं॥तथा॥तिष्ठति
॥चोडा।ग्रहर्तुमीहते खड्गपतनं हस्तादपिनयन्॥ही,कधं आ अद्दिदे शालोशं मुट्ठीए मुट्ठिणा गहीदे वि,
धत्तणाए कीश पडिदे शालुणके अशालिशंणिहे खग्गं। जधा एदं संवुत्तं तेधा तक्कमि,ण विवज्जदि अ
ज्ज चारुदत्तन्ति भअवदि सत्यवाशिणि,पशीद,पशीद,अधिणाम चारुदत्तःशा मोक्खो भवे तहो अणु

गिहिदुं तुए चोडाल॥उलंभवे।अपरः।जधाणेसमणुचिट्ठसु॥प्रथमः।मोदु,एवं केलेन्ह।इत्युभौ।चारुदत्तं शूले स
मारोपयितुमिच्छतः॥चारु॥भगवतीत्यादि।पुनःपठति॥भिक्षुः।वसंतसेना च।दृष्ट्वा॥अज्जा,मादावे;अज्जा,
एसा अहं मंदभाइणी जःसा कारणादो एसो वावादीअदि।चोडा।दृष्ट्वा॥तुलिदं काउण एशा अंशापलंतेण वि
उलभालेण,मा मेत्ति वा हलंती,उच्छिद्दूथा इरो एदि।वसं।अज्जा।चारुदत्त,किं एदंति।उरसि पतति।भिक्षुः
।अज्ज चारुदत्तःस किं णेदमिति॥पादयोः॥पतति॥चोडा।सभयमुपसृत्य॥कधं,वसंतसेणा;णं क्खु अन्नेहिं सा
हु णक्खादिदे।भिक्षुः।उत्थाय॥अले,जीवदि।चालुदत्तो।चोडा।जीवदि वस्मरसदं।वसं।सहर्षं॥पच्चुज्जीविद
म्हि।चोडा।ता जाव एदं वुत्तं राइणो अंतेवाडगदस्सणिवेदेम्ह।इतिनिष्क्रामतः॥शकारः॥वसंतसेनां दृष्ट्वा॥सत्रासं

हो मारिके। केण गब्भदासो जीवाविदो। उक्कंताइं मे पाणाइं। भोदु। पलाइस्सं। इतिपलायते ॥ चोडो। उपसृत्य। अ
लेएं अत्ताणं ईदिशं लाआणन्ती। जेण सा वावादिदा तं मालेध। ता लट्ठिं अशालअं जेव्व अंणेसत्थ इतिनिष्क्रांतो
॥ चारु॥ सविस्मयं॥ केयमभ्युद्यते शस्त्रे मृत्युवक्त्रगते मयि॥ अनावृष्टिहतेशस्ये सम्यग्वृष्टिरिवागता॥ अथवा
क्व चा वसंतसेना किमियं द्वितीया समागता। सेवदिव: किमित्थंभ्रांतं मन: पश्यति वामेना। वसंतसेनानम
त्तापसेव॥ २॥ अथवा॥ किं नु स्वर्गात्पुन: प्राप्ता। मम जीवातुकाम्यया॥ तस्यारूपानुरूपेण किमुतान्येयमाग
ता॥ २॥ वसं॥ सास्त्रं उत्थाय पादयोर्निपत्य॥ अज्ज चारुदत्त। साज्जेवाहं पावा जाए कारणादो इअं तुए अस
रिसी अवत्था पाविदा। नेपथ्ये॥ अज्जरिअं। अज्जरिअं। जीवदि वसंतसेणा इति सर्वे पठंति॥ चारु॥ आकर्ण्य॥ स

१२७

हर्षोत्थाय। सस्पर्शसुखनिमीलिताक्षएव हर्षगद्गदाक्षरं॥ प्रिये वसंतसेना त्वं। वसं॥ सा जेवाहं मंदभा आ। चारु।
निरूप्य सहर्षं॥ कथं वसंतसेनेव॥ सानंदं॥ कुतोवाप्यंबुधाराभि: स्नपयंती पयोधरौ॥ मयि मृत्युवशं प्राप्ते वि
द्योवरमुपागता॥ २॥ प्रिये वसंतसेने॥ तदर्थमेतद्विनिपात्यमानं देहं त्वयैव प्रतिमोचितंमे॥ अहोप्रभाव: प्रियसंग
मस्य। मृतोपि कोनाम पुनर्जीवेयं॥ २॥ अपिच। प्रिये। पश्य॥ रक्तं तेदेव वरवस्त्रमियंचमाला। कांतागमेनहिवरस्य
यथाविभाति॥ एतेव वध्यपटहध्वनयस्तथैव जाता विवाहपटहध्वनिभि: समाना:॥ २॥ वसं॥ अदिदक्खिणहाए
किं णोदं ववसिदं अज्जेण॥ चारु॥ प्रिये त्वं किल मया हतेति। पूर्वानुबंधवैरेण शत्रुणा प्रभविष्णुना। नरके पतता ने
न मनागस्मि निपातित:॥ वसं॥ कर्णौ॥ पिधाय॥ शांतं। पावं। तेणहि राअसालेण वावादिदा॥ चारु॥ शिरो दृष्ट्वा॥

अयमपि कः? ॥वसं॥तेण अणज्जेण वावादिदा एदिणा अज्जेण जीवाविदन्हि॥चारु॥कस्त्वमकारणबंधुः।भि
क्खाए पच्चूसिआए आगदो मे अज्जो? अहं शे अज्जः। चलणसंवाहचिंतए शंवाहके। जूदि अले हिंगहिदे, एदाए
उवाशिआए अज्जशश केलके त्ति अलंकालपणाणिक्की दे न्हि तेण अ जूदणिवेदेण शक्कशमणके संवुत्तेन्हि एशा
वि अज्जा पवहणविअज्जाशेण पुप्फकरंडअजिंणुज्जाणं गदा,तेण अजणज्जेण अमंबुहु मणेशित्ति वाहुपा
शवलक्कालेण मालिदा। मए दिट्ठा नेपथ्येकलकलः॥जयतिवृषभकेतुर्दैत्यशत्रस्यहंता, तदनु जयति भेत्ता प
णमुरः क्रौंचशत्रुः॥तदनुजयतिकल्की शुभ्रकैलासकेतुर्विनिहतवरवैरा चार्यकोगांविशल्यां॥९॥प्रविश्य
सहसा शर्विलकः।शर्वि॥हत्वा तं कुनृपमहिपालकं गोस्तद्रोज्यं द्रुतमभिषिच्यचार्यकं तं॥तस्याज्ञांशि

रसि निधायशेषभूतो मोक्ष्येहं व्यसनगतं चचारुदत्तं॥२॥हत्वा रिपुं तं बलमंत्रहीनं,घोरानलंसमाश्वस्य पुनः प्रकर्षान्
॥त्रासं समयं वसुधाधिराज्यं,राज्यं बलोरिवशत्रुराज्ये॥२॥अग्रतोनिरूप्य॥भविष्यत्तेन भवितव्यं॥यत्रायं जन
परमवायः अपि नामायं वारंभः,क्षितिपतेरार्यकस्यार्यचारुदत्तस्य जीवितेन सफलः स्यात्॥त्वरिततरमुपसृत्य
॥जयपाल जात्मा॥दृष्ट्वा॥सहर्षं॥अपि ध्रियते चारुदत्तः सह वसंतसेनया,संपूर्णाः सत्वरं स्वामिनोमनोरथाः
॥हिष्या गो व्यसनमहार्णवपारा दुत्तीर्णगुणधृतया सुशीलवत्या॥तावेव प्रियतमया चिरांधिरार्ये ज्योत्स्ना
ढ्यं शशिनमिवापरागमुक्तं॥२॥तत्क्षेत्रमहापातकः कथमिवैनं उपसर्पामि अथवा सर्वत्रार्जवं शोभते प्रकाशं
उपसृत्य बद्धांजलिः॥आर्य॥चारुदत्त।चारु ननु कोभवान्?।शर्वि।येन ते भवनं भिक्षा न्यासापहरणं कृतं,सो

हंकृतमहापाप त्वामेवशरणंगतः॥२॥चारु॰सरवे मैवं॰त्वयासो प्रणयः कृत इति कंठे गृह्णाति॰शर्वि॰अन्यच्च॰ अन्यच्च॥आर्यकेणार्यवृत्तेन कुलं मानं च रक्षिता॥पशुवधुजवाटस्थो दुरात्मा पालको हतः॥२॥चारु॰किं शर्वि॰॥त्वयानं यः समारुत्य गतस्त्वां शरणं पुरा॥पशुवद्धितते यज्ञे हतस्तेनाद्य पालकः॥२॥चारु॰शर्विलक॰ योसो पालकेन घोषादानीय निष्कारणं कूटागारे बंधने बद्धः आर्यकनामा त्वया मोचितः?॰शर्वि॰॥यथाह तत्रभवान्॥चारु॰प्रियं नः प्रियं॰शर्वि॰प्रतिष्ठितमनेन तव सुहृदा आर्यकेण उज्जयिन्यां वेणातटे कुशावत्यां राज्यमतिसृष्टं॰तस्मतिमान्यतां प्रथमः॥सुहृल्लक्षणायः॥परिक्रम्य अरेरे आनीयतामयं पापोयराष्ट्रियशठः॥ नेपथ्ये॰यथाज्ञापयति॥शर्वि॰आर्य॰ननवयमार्यको राज्ञा विज्ञापयति;इदं मया युष्मद्गुणोपार्जितं तदुपयुज्यतां॥ १२९

चारु॰अस्मद्गुणोपार्जितं राज्यं॥नेपथ्ये॰॥अरेरे राष्ट्रिय गृहालक एत्येहि स्वस्याविनयस्य फलमनुभव॰ततः प्रविशति पुरुषैरधिष्ठितः पश्चाद्बाहुबद्धः शकारः॥शकारः॥हीमादिके! एवं दूलमदिकंते उद्दामे विअ गद्दहे॰ आणीदे कयु हगे बद्धे हुदे अणो वदुक्कले॥दिशोऽवलोक्य॥समंतदो उवट्ठिदे शोलट्ठिअबंधु॰ताकं दाणिं अशरणो शरणं पवज्जामि॥विचिंत्य॥भोदु;तं जेव अज्जुवदंणशरणलक्कणं गच्छामि॥इत्युपसृत्य॥अज्जचारुदत्त॰पलित्ताणेहि पलित्ताणेहि इतिपादयोः पतति॰नेपथ्ये॥अज्ज चारुदत्त॰मुंच॰मुंच;वावादेहि एदं शकारः॥चारुदत्तं प्रति॥भो अशरणशरणो पलित्ताणेहि चारु॥सानुकंपं॥अहह्यभयं भयं शरणागतस्य। शर्वि॥सावेगं॥आः!अपनीयतामयं॥चारुदत्तः पश्यति॥चारुदत्तं प्रति॥नमुच्यतांकिमयस्य पापस्यानु

घीयतामिति।। आकर्षतु सुबुध्येनं श्वपिः संवाह्यतामथ।।२।। शूले वा तिष्ठतामेष पाल्यतां ककचेन वा।।२।।
चारु।। किमहं यद्ब्रवीमि तल्लिख्यते।। शर्वि।। कोत्र संदेहः।। शकारः।। अट्टालआ चालुदत्त शब्बणागदेहि; ता पहिन्ताएहि; जं तुए शब्बिशं तं कलेहि; पुणो एएहिं जं कारिश्शं।। नेपथ्ये; पौरा।। वावादय; किं णिमित्तं पातकी जीवा जीआदि। वसं।। बध्यमालां चारुदत्तस्य कंठादपनीय शकारस्योपरि क्षिपति शकारः।। गब्भदासी धीदे पशीद; एसो पुणो मालइश्शं ला पडित्ता आहि शर्वि।। अरे रे अपनयत; आर्य चारुदत्ताज्ञाप्यतां, किमस्य पापस्यानुष्ठीयता। चारु। किमहं यद्ब्रवीमि तल्लिख्यते, शर्वि। कोत्र संदेहः। चारु। सत्यं? शर्वि। सत्यं।। चारु। यद्येवं; शीघ्रमयं। शर्वि। किं हन्यतां चारु। नहि, नहि; मुच्यतां। शर्वि। किमर्थं? चारु। शत्रुः कृतापराधः। शरणमुपेत्य पादयोः पतितः शस्त्रेण नहंतव्यः। शर्वि। एवं तर्हि श्वपिः संवाह्यतां। चारु। नहि उपकारहतस्तु कर्तव्यः। शर्वि। अहो आश्चर्यं! किं करोमि; वदार्यः। चारु। तन्मुच्यतां। शर्वि। इति मुक्तः। शकारः। हो माधिके! पच्चुज्जीविदे म्हि।। इति पुरुषैः सह निष्क्रांतः।। नेपथ्ये।। कलकलः। पुनर्नेपथ्ये एशो अज्ज चारुदत्तः सवहुआ अज्जा धूआ, पदे वसनंचलेविलग्गंतं दारअमा किवंती, वाहरिदएणाअणेहिं जणेहिं णिवारिज्जमाणा, पज्जलिदे पावए पविसदि। शर्वि। आकर्ण्य। नेपथ्याभिमुखमवलोक्य।। कथं; चंदनकः, चंदनकः, किमेतत्? प्रविश्य।। चंदनकः।। किं एपेक्खदि अज्जो महारा अप्पासादं दक्किणेण महंतो जणसंमद्दो वट्टदि। इत्यादि पुनः पठति, कधिदं अमए तीए, जधा अज्जे मा साहसं करेहि, जीवदि अ

अज्जे चारुदत्तोत्ति; परंतु दुक्खावुद्दाए को सुणेदि को पत्तियादि ॥ चारु० ॥ सोदुगं ॥ हा प्रिये जीवत्येपि मयि किमेतद्व्यवसितं ॥ ऊर्ध्वमवलोक्य दीर्घं निश्वस्य च ॥ न महातलस्थितिसाहसानि भवन्ति चारुचरिते यद्यपि; उचितं तथापि परलोकसुखं न पतिव्रते तव विहाय पतिं ॥ इति सोहमुपगतः ॥ शर्विल० हो प्रमादः ; ॥ त्वरायाः सर्पयन्त्र मोहमायोत्र चागतः ॥ हा धिक् वयस्य वेफल्यं दृश्यतेसर्वतोमुखं ॥ १ ॥ वेसं० समः ससिदु अज्जो० तत्थ गदुअ० जीवावेदु० अज्जो० अंणाधा अधीरत्तणेण अणत्थो संभावीअदि० चारु० समाश्वस्य सहसोत्थाय हा प्रिये क्वासि देहिमे प्रतिवचनं चेदइदो इदो अज्जो इतिसर्वपरिक्रामति ॥ ततः प्रविशति यथा निर्दिष्टा धूता चेलांचलमाकर्षन् विदूषकेणानुगम्यमानो रोहसेनो रदनि

२२३

निका च धूता सारंभं जादं मुंचेहिमं; मा विग्घं करेहि; भो आमि अज्ज उत्तःस अमंगला कंणादो इत्युत्थायो क्रमेण पावकाभिमुखं परिक्रामति ॥ रोहदाव अज्ज पडिवोले सुमं तुवं विणा ण सक्कणोमि जीविदं धारेदुं इति तं रितमुपसृत्य पुनरंचलं गृह्णाति ॥ विदू० भोदीए दाव वत्थणीए णिअत्तणेण चिदाधिरोहणं पावमुदाहरंति रि रीओ धूतावरं पावाचरणो ए उणो अज्ज उत्तःस अमंगलाकंणाणं शर्वि० पुरोवलोक्य ॥ आसन्नहुतावहार्या त त्वर्यतां चारु० त्वरितं परिक्रामति धूता रअणिए० अवलंब दारअं जाव अहं सम्मादिदं करेमि० चेडी० सक्कणं अहंवि यथोवदेसिणित्ति अद्दिणा ए धूता विदूषकमवलोक्य अज्जो० दाव अवलंबेदु विदू० सावगं संणा दिदसिद्धिए पउत्तेण वत्थणोअग्गदो कादवो अदो भोदी ए अहं अग्गली होमि० धूता कहं पच्चुदिट्ठसि दुवहिं

बालकमालिंग्य जाद तुमं जेव पज्जाधावेहि अत्ताणं अत्ताणं तिलोदअ दाणाअ अरिक्केते किं मणोरहेहिं स
निश्वासं एहु अज्जउ चोतुमं पज्जावधावि:सदि चारु।आकर्ण्य सहसोपसृत्य।।अहमेव पर्यवस्थापया
मि यालिश्मिति बालकं बाहुभ्यामुत्थाप्य वक्षसालिंगति।।धूता।।विलोक्य।।अत्महे; अज्ज उत्त:स जे
व्व सरसंजोओ पुनर्निपुणं निरूप्य सहर्षं दिष्ठिआ अज्ज उत्तो जेव्व एसो पिअंमे पिअंमे बालक:।विलो
क्य सहर्षं अत्तो आवुत्त,संपरिवज्जदि।।धूतो।प्रति।।अज्जाए वधावीअसि,आवुत्त जेव मं पज्जा वधावेहि
।।इतिप्रत्यालिंगति।।चारु।धूतां प्रतिहा ज्ञेयसि,ज्ञेयसि,विद्यमाने कोयं कठोरोव्यवसायआसीत्।।अंगोजि २२२
नीलोचनमुद्गं किंभानावनस्तंगमिते करोति।।९।।धूता।अज्ज उत्त,अदो जेव्व सा अचेतणत्ति चुंबीअ

दिट्ठ।।दृष्ट्वा सहर्षं हीओ;एदेहिं जेव्व अंगीहिं पिअ वअ:सो पवखीअदि; अहोसदाए पहावो,जेदो, जलनष्प
वेसव्ववसाएण जेव्व पि असमागमं पाविदा।।चारुदत्तं प्रति।।जेदु,जेदु पिअवअ:सो।चारु।एहि मैत्रेय।।इत्या
लिंगति।।चेटी।अहो संविधाणअं;अज्ज वंदामि।इति चारुदत्तस्य पादयो:पतति।।चारु।।पृष्ठं करं देरे निक्षे, दत्वा
उत्तिष्ठ इत्युत्थापयति।।धूता।।वसंतसेनां दृष्ट्वा।दिष्ठिआ,कुसलिनी वहिणिआ वसं अहुणा कुसलिनी
संवुत्तेत्ति।।इत्यन्योन्यमालिंगत:।।शर्वि।।दिष्ठ्या जीवितसुदुर्गआर्य:।चारु।युष्मत्प्रसादेन शर्वि।
आर्यं वसंतसेने परितुष्टोराजा भवंती बंधुशब्देनानुगृह्णाति।वसं अज्ज करत्थत्ति।शर्वि।।वसंतसे
नावगुंठ्य चारुदत्तं प्रति।।आर्य किमस्य शिशो:क्रियतां।चारु।शिशो किं तव बहुमतं शिशु:इ

मं इदिसं अलिच्चत्तणं पेक्खिअ दिउणादले मे पवज्जाय बहुमाणे संवुत्ते चारु। सखे दृढोस्य निश्चयः त
त्पृथिव्यां सर्वविहारेषु कुलपतिरयं क्रियतां ॥शर्वि। यथाह आर्यः॥भिक्षुः। प्रियं नः॥स्थावरकस्य किं क्रि
यतां चारु॥सुरक्त अद्दासोभवतु। ते चांडालाः सर्वचांडालाधिपतयोभवंतु॥चंदनकः पृथिवीदंडपालको
भवतु; तस्य राष्ट्रियबृहद्बालस्य यथैवक्रिया। पूर्ववर्तमाना तथैवास्तु॥शर्वि। एवं यथाह आर्यः। तदुच्यतां
किं ते भूयः प्रियं करोमि। चारु। अतःपरं प्रियमस्ति॥लब्धा चारित्र्यशक्तिश्चरणनिपतितः शत्रुरप्ये
षमुक्तः। प्रोत्खातारातिमूलः प्रियसुहृदचलामार्यकः शास्ति राजा॥॥आस्तां भूयः प्रियेयं प्रियसुहृ
दिभवान् संगतो मेऽनघस्यो ह्यन्यं किंचातिरिक्तं यदपरमधुना प्रार्थयेहं भवंतं॥९॥कश्चिद्दूषयति

DR BHAU DAJI LAD MUSEUM

प्रपूरयति वा। कांश्चिन्नयत्युन्नतिं। कांश्चित्पातविधौ करोतिच पुनः कांश्चिन्नयत्याकुलान्॥अन्योन्यं प्रतिपक्षसं
हतिमिमां लोकस्थितिं बोधयन्नेष क्रीडति कूपयंत्र घटिकान्यायप्रसक्तो विधिः॥१॥ तथापीदमस्तु॥ईतिभ्यः
संतुगावो भवतु वसुमती सर्वसंपन्नशस्या, पर्जन्यः कालवर्षी सकलजनमनोनंदिनो वांतुवाताः॥॥मोदंतांजन्म
भाजः सततमभिमता ब्राह्मणाः संतुसंतः श्रीमंतः पांतुपृथ्वीं प्रशमितरिपवो ब्रह्मनिष्ठाश्च भूपाः॥१॥इतिनि
ष्क्रांताः सर्वे॥ संहारोनामदशमोंकः॥समाप्तोयंग्रंथः॥श्रीगणेशायनमः॥इतिमृच्छकटिकनाटकस्य भूमिका
अनेकदेशप्रचलितासु राजावलीषु कोपि राजा शूद्रकोनाम विक्रमादित्यात्प्राचीनतरः प्रतिसिध्यति अपि तु
प्रद्योतोत्पन्नानां मगधदेशराजानां प्रथमोभवत् मगधदेशस्य राजधानी पाटलिपुत्रनामनगरं किंतु कामंदकी

ग्रंथकारेण शूद्रकस्य राजधान्यवंती निर्णीता; केषुचित् पुस्तकेषु च यत्र शूद्रकस्य नाम लिखितं तत्र शिप्रकः शूरकः सिंधुकएव पाठो दृश्यते; तत्र तुना शूद्रकस्य नामनगरयोर्निश्चयो नास्ति, केवलं चेतदनुष्ठितं यन्मृच्छकटिकस्य पूर्वरंगे निर्दिष्टं॥ स राजा गुणवान् गुणवतां पालकश्च; तेन श्रीविक्रमादित्यसमयपूर्वं सार्धशतवत्सरे मृच्छकटिकनामधेयमपूर्वं नाटकं विरचितं। अनंतरं बहुकालवशात्तन्नाटकं प्रायशोदुर्लभमेवासीत्केवलं दशरूपकादिग्रंथेषु प्रमाणत्वेनोपन्यस्तस्य क्वचिदेकश्लोकस्य क्वचिदर्धश्लोकस्य वा पठनोत्तेनाम नहि विस्मृतं; किंतत्काले गते श्रीमता उज्जयिनीसाहसेनकारीपुरीमधितिष्ठताश्रीलब्धप्रतिष्ठपंडितसकाशादेकं पुस्तकमासादितं पुनः कलिकातानगरमानीतं। इदानींच मुद्राक्षरेण तस्य बहुत्वेबहुकालस्थायित्वंच संस्थापितं॥ अस्मिन् ग्रंथे अतिप्राचीनसमयस्य रीतयोद्रष्टव्याः यथा पूर्वं भरतदेशस्थैरनुष्ठिताः; एवंच रूपकाणां ये गुणाः प्रशंसनीयाः ते सर्वत्र संगृहीताः संति॥ विश्रामचिन्हानि पाठकवर्गाणां सुबोधनाय मुद्राकरणसमये नवीनारीतिरनुसृता॥ यदा संधिः शिथिलो भवति तदा पादानां किंचिदंतरं कृत्वा; एवंच यदा वाक्यानामर्थः संपूर्णः, किंवा किंचिद्वक्तिनोभवति, गद्यपद्यपठने च स्वरस्य विश्रामोयुज्यते, तदा तत्स्थाने विश्रामपरिमाणस्य चिन्हं मुद्रितमस्ति यथा, एकमात्रं द्विमात्रं; त्रिमात्रं। किंवा वाक्यसंपूरणं प्रश्नः आवेगः अथवा॥ कष्टं कष्टं भोः भोः चिरसंगतोपासनेन शुष्कपुष्करनालानीव मम बुभुक्षया म्लानानि अंगानि; तत् यावत् गेहं गत्वा जानामि अस्ति किमपि कुटुंबिन्या उपपादितं नवा; इति। एतत् तत् अस्माकं गेहं, तत् प्रविशामि

आश्चर्यं किं नु खलु अस्माकं गेहे अपरमिव संविधानकं वर्तते आयामि तंडुलोरुकप्रवाहा रथ्या लोहक
टाहपरिवर्तनरुक्षस्वारा कृतविशेषकाइव युवती अधिकतरं शोभते भूमी स्निग्धगंधेन उद्दीप्यमानेव
अधिकं बाधते मां बुभुक्षा तत्किं पूर्वार्जितं निधानं उत्पन्नं भवेत् अथवा अहमेव बुभुक्षातः ओदन
मयं जीवलोकं पश्यामि नास्ति किल प्रातराशोस्माकं गेहे प्राणाधिकं मां बुभुक्षा बाधते इह सर्वं नव
मिव संविधानकं वर्तते एका वर्णकं कस्तूर्यादिकं समालेभनं पिनष्टि अपरा सुमनसः गुंफति किं चेदं
भवतु कुटुंबिनी शब्दाप्य परमार्थज्ञास्यामि॥आर्ये इतः तावत्। आर्य इयं अस्मि आर्ये स्वागतं ते आ
ज्ञापयतु आर्यः कः नियोगः अनुष्ठीयतामिति। आर्ये; चिरसंगतोपासनेन, पुष्करनालानीव मे बुभुक्षया

म्लानानि अंगानीति पठित्वा; अस्ति किमपि अस्माकं गेहे अत्तव्यं नवा इति॥आर्यः; सर्वं अस्ति॥किं किं अ
स्ति तत् यथा॥गुडोदनं घृतं दधि तंडुलाः, आयणअत्तव्यं रसायनं सर्वं अस्ति इति। एवं ते देवा आशंसंतु॥
आर्ये; किं अस्माकं गेहे सर्वं अस्ति; अथवा, परिहससि। परिहसिष्यामि तावत् आर्यः अस्ति यणिग्वाभ्यां॥
आः आनार्ये! एवं तव आशा छेत्स्यति। आगावं च गमिष्यसि। यत् इदानीं अहं वरंडलेबुकइव दूरं उत्क्षिप्य पाति
तः। वरंडोरीर्घकाष्ठं तस्य लंबुकः तत्प्रोतनिबद्धोमृत्तिकास्थूणः। मृष्यत्यायः परिहासः खलु मया कृतः। तत् किं
पुनरिदं नवमिव संविधानकं वर्तते; एकावर्णकं पिनष्टि अपरा सुमनसो गुंफति इयंच पंचवर्णकुसुमोपहारशोभि
ता भूमी। अद्य उपवासो गृहीतः॥किं नामधेयोयमुपवासः॥अभिरूपपतिर्नाम। आर्ये इहलोकिकः अथवा पा

रलौकिकः॥ आर्य पारलौकिकः। प्रेक्षेतां प्रेक्षेतां आर्यमिश्राः; मदीयेन भक्तपरिव्ययेन पारलौकिको भर्ता अन्विष्य
ते। आर्य प्रसीद प्रसीद त्वमेव मम जन्मान्तरेपि भर्ता भविष्यसीति उपोषितास्मि॥ अथ अयमुपवासः केन उपदि
ष्टः। आर्यस्येव प्रियवयस्येन चूर्णवृद्धेन आः। आक्षेपे। दास्याः पुत्र चूर्णवृद्ध; कदा ननु खलु त्वां कुपितेन राज्ञा पाल
केन क्षेधमानं प्रेक्षिष्ये नववधूकेशकलापमिव ससुगंधं। अस्मीत्यार्यः; ननु आर्यस्येव पारलौकिकोयमुपवासः
अनुष्ठीयते इति। आर्ये; उत्तिष्ठ, उत्तिष्ठ; कथय कथय अत्रोपवासे केनकार्यं। अस्मादृशजनयोग्येन ब्राह्मणेनउ
पनिमन्त्रितेन। तेन हि गच्छत्वार्यः; अहमपि अस्मादृशजनयोग्यं ब्राह्मणं उपनिमन्त्रयामि। यत् आर्य आज्ञापय २३५
ति॥ तस्मात् कथं मया ईदृश्यामुज्जयिन्यां समृद्धायां अस्मादृशजनयोग्यो ब्राह्मणान्वेषितव्यः। एष चारुदत्तस्य

मित्रं मैत्रेयः इतएव आगच्छति; भवतु प्रत्यभिज्ञामि तावत्। अयं मैत्रेयः अस्माकं गेहे अन्नं अयाचितं भवतु आर्यः। भोः
अन्यं ब्राह्मणं उपनिमन्त्रयतु भवान् व्यापृतोहं इदानीं। अद्य संपन्नं भोजनं निःसपत्नं च विपक्षस्याभावात् अ
पिच दक्षिणा कापि ते भविष्यति॥ भो यत् इदानीं प्रत्यादिशसि तत्कः इदानीं ते निर्बंधो ममोपदेशं अनुस
र्तुं प्रत्यादिशसि जनेन; भवतु; अन्यं ब्राह्मणं उपनिमन्त्रयामि मयामैत्रेयेण परस्य आमंत्रणानि अस्थितव्या
नि; हा अवस्थे तुलयसि यः इदानीमहंतस्य भवतः चारुदत्तस्य कृत्स्ना अहोरात्रप्रयत्नसिद्धेः उद्धारसुरभिगं
धिगिर्मादकैरवाशितः आर्यंतरचतुःशालकद्वार उपविष्टः कलकलशतपरिवृतः चित्रकरइव अंगुलीभिः स्पृष्ट्वा
अपनयामि नगरचत्वरस्थइव रोमंथायमानः तिष्ठामि। सः इदानीं अहं तस्य दरिद्रतया यत्र कुत्रापि चरित्वा

गेहपारावतरुवावासनिमित्तमवागच्छामि। एष चारुदत्तस्य प्रियवयस्येन चूर्णवृत्येन जातीकुसुमवासितोनुप्रेषि
तः प्रावारकः सिध्यीकृतदेवकार्यस्य आर्यचारुदत्तस्योपनेतव्यइति। तद्यावत् आर्य चारुदत्तं पश्यामि एष चा
रुदत्तः सिध्यीकृतदेवकार्यः गृहदेवतानां बलिं कुर्वेनितएवागच्छति। एष आर्यचारुदत्तः तत् यावत् संप्रतं उपस
र्पामि। स्वस्ति भवते; वर्धतां भवान् यत् भवान् आज्ञापयति भो वयस्य। एष ते प्रियवयस्येन चूर्णवृत्येन जाती
कुसुमवासितः प्रावारकः अनुप्रेषितः सिध्यीकृतदेवकार्यस्य आर्यचारुदत्तस्य त्वया उपनेतव्यइति भो किंइदं
चिंत्यते भो वयस्यामरणात् दारिद्र्याद्वा कृतरत् रोचते। भो वयस्य; अलं संतापितेन अणयिजनसंक्रामितवि
भवस्य सुरजनपीतशेषस्य प्रतिपद्येदृस्येव परिक्षयोपि ते अधिकतरं रमणीयः एते खलु दासीपुत्राः अर्य

रूपप्रातरासः चरन्तीभीताः इव गोपालदारका अरण्ये यत्र यत्र नखादंति तत्र तत्र गच्छंति।। भो वयस्य; तमेव
अर्थकल्पवंतं स्मृत्वा अलं संतापितेन। नगमिष्यामि। यतएवं पूज्यमानाअपि नत प्रसीदंति तत् कोगुणार्चि
तेषु देवेषु। भो नगमिष्यामि; अन्यः कोपि प्रयुज्यतां। मम पुनर्मैत्रेयस्य सर्वमेव विपरीतं परिणमति। आ
दर्शगता इवछायाः वामतो दक्षिणा दक्षिणतो वामा। अन्यंच; एतस्यां प्रदोषवेलायां इह राजमार्गे गणिका
विटाश्चेडाश्च राजवल्लभाः पुरुषाः संचरंति तस्मात् मंडूकलुब्धस्येव कालसर्पस्य अहिमुखापतितोमूषकइ
व वध्यः इदानीं भविष्यामि त्वं इह उपविष्टः किंकरिष्यसि। तिष्ठ वसंतसेनिके तिष्ठ किं यासिधावसि, पला
यसे, प्रस्खलंतीवासु प्रसीद न मरिष्यसि, तिष्ठ तावत् कामेन दह्यते खलुमे हृदयं तपस्वि अंगारराशिप

तितं इव मांसखंडं आयके तिष्ठ तिष्ठ। अत्रासिता गत्वसि अंतिका मम संपूर्णपुत्रेव ग्राम्यमयूरी: संभ्र
ममागच्छति स्वामी भट्टारको मम वने गत: कुक्कुरशावकइव। तिष्ठ वसंतसेने तिष्ठ। मम मदनमनोरं मन्म
थं वर्धयंती निशि च शयनीये मे निर्दयं श्लिष्यंती; प्रसरसि भयभीता अस्खलंती स्खलंती। मम वशमनु
याता रावणस्येव कुंती शिवोंकटंका नामौषिकाभरण ताडनी। मत्स्यभक्षिका। नर्तकी निम्ननासिका।
वेशाणाशिणी। अनायत्ता। कामस्यपात्रविशेष: एषा वेशवधू वेशस्य वेश्याजनाश्रयस्य वध: सुवेशानां भूषणा
नां आश्रय: वेशोस्याअस्तीति वेशिका; एतान्यस्या दश नामकानि मया श्रुतानि अद्यापि मां नेच्छति राणा १३८
ल्लाणमिति बहुभूषणशब्दमिश्रं किं शैलूषइव पलायसे रामभीता; एषहरामि सडिति यथा हनूमान् विश्वा

वसोर्गर्भिनीमिव तां सुभद्रां। रमय राजवल्लभेन; तत: खादिष्यसि मत्स्यमांसकं। एताभ्यां मत्स्यमांसाभ्यां
कुक्कुरामृतं नसेवंते। अस्माभि: शीघ्रं अभिसार्यमाणा वने शृंगालीव कुक्कुरै:। पलायसे शीघ्रं त्वरितं सवेगं
समूलबंधं ममहृदयं हरंती पल्वलिके। पल्वलिके। परभृतिके। परभृतिके। हे विदूषक। हे विदूषक। मनुष्या। मनुष्या:
माधविके। माधविके। विदूषक। विदूषक; स्त्रियमन्विच्छति। स्त्रीणां शतं हन्मि शतेनाहं। हा धिक्। हा धिक्। कथं
परिजनोपि परित्रष्ट: अत्र मयात्मा स्वयमेव रक्षितव्य:। वसंतसेनिके विलप विलप। परभृतिका वा पल्व
लिका वा। सर्वे वा वसंतमासं। मया अभिसार्यमाणा लोक: पवित्रायिष्यते। किं भीमसेनोजमदग्निपुत्र:
कुंतीसुतोवा। दशकंधरोवा। एषोहं केशपाशं गृहीत्वा। दु:शासनस्यानुकृतिं करोमि मनु प्रेक्षस्व ननु प्रेक्षस्व

असिः सुतीक्ष्णः वलितेन च मस्तकं छिनत्ति शीर्षं उत मारयामि वा। अले तवैतेन पलायितेन मुमूर्षुर्यो भवति न स खलु
जीवति आर्यः अबला खल्वहं। अतएव न भार्यसे कथं अनुनयोपायस्य भयमुत्पादयति। भवत्येवं तावत्। आर्य, अस्मा
त् किमपि अलंकरणं तर्क्यते। तत्किं खलु इदानीं। अहं देवपुरुषः मनुष्यो वासुदेवः कामयितव्य शांतं! शांतं! अपेहि
अनार्ये मंत्रयसि। विद्वन् विद्वन् प्रसस्व तावत्; मां अंतरेण सुस्निग्धा एषा गणिका दारिका ननु येन मां भणतिः ए
हि शांतोसि क्लांतोसीति। अहं न ग्रामांतरं न नगरांतरं वा गतः। भट्टालिके, शपामि विटस्य शीर्षेण आत्मीयाभ्यां
पादाभ्यां, तवैव पृष्ठानुपृष्ठिकया उद्भाम्यन् श्रांतः क्लांतोस्मि संवृत्तः। गुणः खलु अनुरागस्य कारणं, न पुनर्बला
त्कारः। एषा गर्भदासी कामदेवायतनोद्यानात् प्रभृति, तस्य दरिद्रचारुदत्तस्य अनुरक्ता न मां कामयते, वा

WELLCOME LIBRARY
DR BHAU DAJI

अतस्तस्य गृहं; यथा तव मम हस्तात् न एषा प्रत्यर्प्यति, तथा करोतु भावः। घाटं गमितस्तस्य गृहं। आश्चर्यं; गमितस्तस्य
गृहमिति यत्सत्यं। अपराध्यतापि दुर्जनेनोपकृतं, येन प्रियसंगमः प्रापिता। भाव, भाव; बलवति अंधकारे, माषराशि
प्रविष्टेव मसीगुटिका दृश्यमानेव प्रनष्टा वसंतसेना भाव, भाव, अन्वेषयामि वसंतसेनिकां। भाव, भाव, किमिव। शृ
णोमि माल्यगंधं, अंधकारपूरितया पुनर्नासिकया सुव्यक्तः पुनर्न पश्यामि भूषणशब्दं। आश्चर्यं; निश्चिपरामर्शसू
चितं पश्यद्वारकं खल्वेतत्, जानामि च संयोगेन गेहस्य संवृतं पश्यद्वारकं भो न गमिष्यामि। भो वयस्य; यदि मया
गंतव्यं, तस्मादेषापि मम सहायिनी रदनिका भवतु। यत् आर्य आज्ञापयति। भवति रदनिके, गृहाण बलिं, अहं
पंच; अपावृतं पश्यद्वारकं करोमि। मम आत्युपपत्तिनिमित्तं अपावृतं पश्यद्वारकं; तत् यावत् प्रविशामि हा धिक्! हा

धिक्! कथं प्रदीपः। अपास्तपक्षद्वारेण पिंडीकृतेन वातेन निर्वापितः प्रदीपः। भवति रदनिके निष्क्रम्य त्वं पक्षद्वारकेण;
अहमपि अभ्यंतरचतुःशालके प्रदीपं प्रज्वाल्य आगमिष्यामि। भाव भाव; अन्वेषयामि वसंतसेनां। भाव भाव; गृही
ता गृहीता। इतस्तावत् भूत्वा एकांते भाव तिष्ठतु। भाव भाव; गृहीता गृहीता। भट्टारकचेटोहं। इतोभाव इत
श्चेटः भावश्चेटः चेटीभावः; युवां तावत् एकांते तिष्ठतं भाव संप्रतं गृहीता वसंतसेनिका अंधकारे पत्लाय्यमाना
मालतीगंधेन सूचिता केशवृंदे परामृष्टा चानवद्येनेव द्रौपदी। एषासि बाला शिरसि गृहीता केशेषु, बालेषु, शिरो
रुहेषु; आकोश, विकोश, लपाधिचंडं, शंडं, शिवं शंकरमीश्वरं वा किमार्यमिश्रैर्व्यवसितं। भाव भाव; यथा दधि २५
भक्तेनुध्याया मार्जारिकाया; स्वरपरिवृत्तिर्भवति, तथा दास्याः स्वरपरिवृत्तिः कृता। आश्चर्यं! भोः, प्रदोषमंदमारु

तेन पशुबंधोपनीतस्येव छागलस्य तरदयं स्फुरस्फुरायते प्रदीपः भो रदनिके। भाव भाव; मनुष्यो; मनुष्यः। युक्तं नेदं,
सदृशं नेदं, यत् आर्यचारुदत्तस्य दरिद्रतया संप्रतं परपुरुषो गेहं प्रवेक्ष्यते। आर्य मैत्रेय, प्रेक्षस्व मे परिभवं। किं
तव परिभवः, अथवा अस्माकं। ननु युष्माकमेव। किमेष बलात्कारः। वाढं। सत्यं। सत्यं। मा तावत्; भोः; स्वकेगे
हे कुक्कुरोपि चंडो भवति; किं पुनरहं ब्राह्मणः। ततएतेनारब्धजनभागधेयकुटिलेन दंतकाष्ठेन दुष्टस्येव शु
ष्कवेणुकस्य मस्तकं तेप्रहारैः कुट्टिष्यामि। नास्त्येष अपराध्यति एष खलु अत्रापराध्यति। अरेरे राजश्यालक, संस्थानक, दुर्जन, दुर्मनुष्य; युक्तं। नेदं; यद्यपि नाम तत्रभवान् आर्यश्चारुदत्तोदरिद्रः संवृत्तः तत्। किं त
स्य गुणैर्नालंकृता उज्जयिनी येन तस्य गृहं प्रविश्य परिजनस्य ईदृशमुपमर्दः क्रियते मादृगतइति परिभवो

नास्ति कृतांतस्य दुर्गतोनाम॰चारित्र्येण विहीन आढ्योपिच दुर्गतोभवति किमयं सत्पुरुष॰उत्तिष्ठ॰उत्तिष्ठ।अजानता मया त्वमुपालब्धः सांप्रतं पुनर्जीवन्नेननुनयामि।गणतु भवान्।न कथयिष्यामि।किं निमित्तं पुनर्भाव॰एतस्य दुष्टवटुकस्य॰विनयांजलिं कृत्वा॰पादयोर्निपतितः।कस्मात् त्वं भीतः।कइव तस्य गुणा॰यस्य गृहं प्रविश्य भोक्तव्यमपिनास्ति।कः स गर्भदासो गर्भदास्याः पुत्रः शूरोविक्रांतः पांडवः॰श्वेतकेतुः॰पुत्रोराधायाः॰रावण॰इंद्रदत्तः॰अहोकुंत्यास्तेन रावणेन जातः अश्वत्थामा धर्मपुत्रो जरायुः।अगृहीत्वा वसंतसेनां।कथमिव॥अगृहीत्वा वसंतसेनां न गमिष्यामि।गतः खलु यदि गत्वासि॰गच्छ त्वं अहं न गमिष्यामि।गतः खलु भावोदर्शनं।अरे काकपक्षार्धमस्तकादुष्टवटुका॰उपविशत॰उपविशत उपविष्टएव वयं।केन कृतांतेन।उत्तिष्ठ उत्थास्यामि।कदा।यदा पुनरपि देवमनुकूलं भ

विष्यति।अरे रोदिहि॰रोदिहि।रोदिता एवं वयं।केन अरे हस॰हस।हसिष्यामः कदा।पुनरपि क्रुध्या चारुदत्तस्य।च अरे॰रे॰दुष्टवटुक॰भविष्यसि मम वचनेन तं दरिद्रचारुदत्तं एषा ससुवर्णा॰नवनाटक दर्शनोत्थिता सूत्रधारिणीव॰वसंतसेना॰गणिका दारिका॰कामदेवायतनोद्यानात् प्रभृति॰त्वामनुरक्ता अस्माभिर्बलात्कारानुनीयमाना तवगेहं प्रविष्टा॰तद्यदि मम हस्ते स्वयमेव प्रस्थाप्य एनां समर्पयसि॰ततोधिकरणे॰व्यवहारं विना शीघ्रं॰निर्यातयतस्तव मयानुबंधा प्रीतिर्भविष्यति।अथवा॰अनिर्यातयतः आमरणांतिकं वैरं भविष्यति।अपिच प्रेक्षस्व॰प्रेक्षस्व।कुंभीगोमयलिप्तशाकंच॰शुष्कं तन्तितं खलु मांसं॰भक्तंच हैमंतिकरात्रिसिक्थं॰लीनायांच वेलायां न खलु भवति पूतिः।शोभनं भणिष्यसि॰लघुकं भणिष्यसि॰तथा भणिष्यसि यथाहमात्मनः केलिकायां प्रासादवालायकपोतपालिकायामुपविष्टः शृणोमि।अन्यथा॰य

दि न भणसि, तदा कपाटतलप्रविष्टं कपित्थगुलिकमिव मस्तकेते मडमडइति शब्दं कृत्वा भक्षयिष्यामि। भणिष्यामि। हे चेट गतः सत्यमेव भावः। वाढं। तत् शीघ्रमपक्रमावः। तत् गृह्णातु भट्टारकोसिं तेनैव हस्ते तिष्ठतु। एष भट्टारकस्वामिकः गृह्णात्वेनं भट्टारकोसिं॥ निर्वल्कलं मूलसंवृतं स्कंधेन गृहीत्वा च कोपसंज्ञं कुक्कुरैः कुक्कुरीभिश्च शब्दायमानो, यथा शृगालः, शरणं व्रजामि। भो रदनिके, न खलु ते अयं अपमानः तत्रभवतश्चारुदत्तस्य निवेदयितव्यः, हो गत्यपीडितस्य मन्ये द्विगुणतरा पीडा भविष्यति। आर्य मैत्रेय, रदनिका खल्वहं संयतमुखी एवमेव कथं परिजनइति मामवगच्छति। आश्चर्यं जातीकुसुमवासितः प्रावारकः, अनुदासीन अस्य यौवनं प्रतिभास ते मंदभागिनी खल्वहं तवाभ्यंतरस्य। भो इयं सा रदनिका। ननु भूषिता। भो, अलं परकलत्रदर्शनशंकया, एषा व

संतसेना, कामदेवायतनोद्यानात्प्रभृति त्वामनुरक्ता। भो वयस्य एष खलु राजश्यालो भणति। एषा सखुवर्णेति। बलात्कारानुनीयमानाइति, परस्त्रियं अलंकृतास्मि। एतेरश्वैः तद्यदि मम हस्ते स्वयमेव प्रस्थाप्य एनां समर्पयसीति। एतेनानुचितभूमिकारोहणेनापराध्य, आर्ये शीर्षेण प्रणम्य प्रसादयामि। भो द्वावपि युवां सुखं प्रणम्य, कलमकेदारो अन्योन्यं शीर्षेण शीर्षं समागतौ, अहमपि अमुना करभुजानुसदृशेन शीर्षेण, द्वावपि युवां प्रसादयामि, उत्तिष्ठतमिति। चतुरोमधुरः अयं उपन्यासः नयुक्तं अद्य ईदृशेन इह आगतया मया प्रतिवसितुं, भवतु, एवं तावत् भणिष्ये। आर्य, यदि एवं अहं आर्यस्य अनुग्रहवती, नदिल्लामि अहं इमं अलंकारकं आर्यस्य गेहे निक्षेप्तुं, अलंकारस्य निमित्तं एते पापाअनुसरंति। आर्य, अलीकेषु पुरुषेषु न्यासानिःक्षिप्यंते न पु

नेर्गेहेषु। अनुगृहीतास्मि। स्वस्ति भवतेभ्यः। यद्येवं तदा चोरैरपहियतामिति। एषास्या अस्माकं विन्यासः। उ आर्य, इच्छाम्यहं, अनेन आर्येण अनुगम्यमाना, स्वकं गेहं गंतुं। त्वमेव एतां कलहंसगामिनीं अनुगच्छन् राजहंसइव शोभसे। अहं पुनर्ब्राह्मणः; यत्र तत्र जनेभ्यतुष्पथोपनीतइव उपहारः कुक्कुरैरिव खाद्यमानः विपत्स्ये। वर्धमानक, प्रज्वालय प्रदीपिकाः। अरेतैलेन विना, प्रदीपिकाः प्रज्वाल्यंते? भो, ताः खलु अस्माकं प्रदीपिकाः, अवमानित निर्धनका मुकाइव गणिका, निःस्नेहा इदानीं संवृत्ताः। यथा भवान् आज्ञापयति, मात्रा आर्यायाः सकाशं संदेशेन प्रेरितास्मि; तत् यावत् प्रविश्य आर्यां सकाशं गच्छामि। एषा आर्या, हृदयेन किमप्यालिखंती तिष्ठति। तत् यावत् उपसर्पामि। हे चेटि, ततस्ततः। नकिमपि मंत्रयसि; किं ततः। किं मया भणितं। ततस्ततइति। ओं एवं। आर्य, माता आ

दिशति, स्नाता भूत्वा देवतानांपूजां निवर्तयेति। चेटि, विज्ञापय मातरं, अद्य न स्नास्यामि, तत् ब्राह्मणइव पूजां निवर्तयत्विति। यत् आर्या आज्ञापयति। आर्ये, स्नेहः पृच्छ्यते, न पुराभागिता किं नेदं। मदनिके, कीदृशी मां मन्यसे। आर्यायाः शून्यहृदयत्वेन जानामि हृदयगतं कमपि, आर्यां गिलषतीति सुष्ठु त्वया ज्ञातं; परहृदयग्रहणपंडिता मदनिका खलु त्वं। प्रियं मे, प्रियं, कामः खलु नाम एष भगवान् अनुगृह्णातु महोत्सवः तरुणजनस्य, तेन भवतु आर्या, किं, राजा, राजवल्लभो वा सेव्यते। चेटि, रंतुमिच्छामि न सेवितुं। विद्याविशेषालंकृतः किं कोपि ब्राह्मणो युवा काम्यते पूजनीयोमे ब्राह्मणोजनः॥ किं अनेकनगरागमनजनित विभवविस्तरो वाणिजयुवा वा काम्यते। चेटि, उपारूढस्नेहं अपि प्रणयिजनं परिचर्य, देशांतरगमनेन वाणिजजनो महर्द्धिर्गजेंद्रः स्वमुत्सादयति।

आर्ये, न राजा, न राजवल्लभो, न ब्राह्मणो, न वाणिजजनः, तत्क इदानीं सा भर्तृदारिकया काम्यते। चेटि, त्वं मया सह कामदेवायतनोद्यानं गता आसीः। आर्ये, गतास्मि। तथापि मां उदासीनेव पृच्छसि। ज्ञातं; किं, सएव येनार्याशरणागता अभ्युपपन्ना किंनामधेयः खलु सः। स खलु श्रेष्ठिचत्वरे प्रतिवसति। अयि नामात्य पृष्टासि। स खलु, आर्ये, सुगृहीतनामधेयः आर्यचारुदत्तो नाम। साधु, मदनिके, साधु; सुष्ठु त्वया ज्ञातं। एवं तावत्। आर्ये, दरिद्रः खलु स श्रूयते। अतएव काम्यते; दरिद्रपुरुषसंक्रान्तमनाः खलु गणिका लोके अवचनीया भवति। आर्ये, किं हीनकुसुमं सहकारपादपं मधुकर्यः। पुनः सेवते। अतएव तामधुकर्यउच्यते। आर्ये, यदि स मनीषितस्तत् किमर्थमिदानीं सहसानागिरायते। चेटि, सहसा अभिसार्यमाणः प्रत्युपकार्दुर्बलतया, मा तावत् अनोदुर्लभदर्शनः पुनर्भविष्यति। ज्ञ किं अतएव सोलंकारस्तस्य हस्ते निक्षिप्तः। चेटि, सुष्ठु त्वया ज्ञातं। अरे भट्टारक, दशसुवर्णस्य कृते रत्नधूतकरः अपलायितः, तद्गृहाण, गृहाण; निष्ठ; दूरात् अदृष्टोसि। कष्टं धूतकरभाव; आश्चर्यं, नवबंधनमुक्तयाइव गर्दभ्या हा ताडितोस्मि गर्दभ्या, जंगराजमुक्तेया शक्त्याघोरलकुचइव घातितोस्मि शक्त्या। लेखकव्यापृतहृदयं सणिकं दृष्ट्वा सहसा प्रभ्रष्टः इदानीं मार्गनिपतितः कं नु खलु शरणं प्रपद्ये। तत् यावत् एतौ सणिकधूतकरौ अन्यतोमां अन्विष्यतः, तावत् इतोविपरीतां यां पार्श्वां एतत् शून्यं देवकुलं प्रविश्य, देवीभविष्यामि। अरे भट्टा, दशसुवर्णस्य कृते रत्नधूतकरः अपलायितः, गृहाण; निष्ठ, निष्ठ, दूरात् अदृष्टोसि। यदि व्रजसि पातालं, इंद्रं शरणं च संप्राप्तं यासि; सणिकं वर्जयित्वा एकरज्जोपि नरक्षितुं शक्नोति। कुत्र, कुत्र, सुस

१५४

१५५

गिक विप्रलंभक पलायसे, रे भयपरिक्षेपितोरुकपटे, पटे समविषमं स्खलन् कुलं यशः अतिकृच्छ्रं कुर्वन्। एष व्रजति इयं प्रणष्टा पदवी॥ अरे विप्रतीपो पोदो प्रतिमाशून्यं देवकुलं, धूर्तोद्यूतकरो विप्रतीपपादाभ्यां देवकुलं प्रविष्टः। तेनुसरावः। एवं भवतु। कथं, काष्ठमयी प्रतिमा। अरे, न खलु शैलप्रतिमा। एवंभवतु, एहि द्यूते न क्रीडावः। अरे, कत्ता शब्दो निर्णानकस्य हृदयं मनुष्यस्य, ढक्का शब्दइव नराधिपस्य प्रभ्रष्टराज्यस्य। जानामि न क्रीडिष्यामि; सुमेरुशिखरपतनसन्निभं द्यूतं; तथापि खलु, कोकिलमधुरः कत्ताशब्दो मनोहरति। मम पाठे मम पाठे। न खलु, मम पाठे मम पाठे। ननु मम पाठे। लब्धः पुरुषः। अरे लुप्तदंडक गृहीतोसि; प्रयत्न तद्दशसुवर्णं। अद्य दास्यामि अधुना प्रयत्न। दास्यामि; प्रसादं कुरु। अरे, ननु, सांप्रतं प्रयत्न। शिरः पतति। एष त्वं खलु द्यू

MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA CENTRAL LIBRARY

तकरमंडल्या बध्योसि। कथं द्यूतकरमंडल्या बध्योस्मि कष्टं एषोस्माकं द्यूतकराणां अलंघनीयः समयस्तस्मात्कुतोदास्यामि। अरे, गंडः कृतः। एवं करोमि। अर्धं तुभ्यं ददामि, अर्धं मह्यं मुंचतु। एवंभवतु। अर्धमस्य गंडं करोमि, अर्धमपि मह्यं आर्यो मुंचतु। को दोषः एवंभवतु आर्य, अर्धं त्वया मुक्तं। मुक्तं अर्धं त्वयापि मुक्तं। मुक्तं सांप्रतं गमिष्यामि। प्रयत्न तद्दशसुवर्णं, कुत्र गत्वसि। प्रेक्षध्वं प्रेक्षध्वं भट्टारकाः हा सांप्रतं एव एकस्य अर्धगंडः कृतः अपरस्य अर्धं मुक्तं, तथापि मां अबलं सांप्रतमेव याचते। धूर्तः माथुर अहं निपुणः, अत्र नाहं धूर्तयामि। ततः प्रयत्न तं लुप्तदंडकं सर्वं सुवर्णं सांप्रतं। कुतोदास्यामि। पितरं विक्रीय प्रयत्न। कुतोमेपिता मातरं विक्रीय, प्रयत्न। कुतोमे माता आत्मानं विक्रीय प्रयत्न कुरुत प्रसादं नयत

मां राजमार्गे। स०प्रसर एवंभवतु आर्यः। क्रीणीध्वं मां। अस्य सगिकस्यहस्तात् दशभिः सुवर्णकैः। किं भणतः
किं कलहं करिष्यसीति। गेहे ते कर्मकरीभविष्यामि। कथं। अदत्वा प्रतिवचने गतः। भवत्वेवं इमं अन्यं भ
विष्यामि। कथं एषोपि मामवधीर्यगतः। आः आर्य। चारुदत्तस्य विभवे विघटिते एषाहं वत्स्यमंदभाग्यः। नन्
देहि। कुतोदास्यामि। आर्य। परित्रायत परित्रायत। कुतोदास्यामि। अयं दशसुवर्णकं धारयति। पश्यत
पश्यत। जर्जरपटप्रावृतोयं पुरुषोदशसुवर्णं कल्मवर्तं भणति। तव दशसुवर्णं कल्मवर्तः मम एषविभवः। त

एवं

ल्किंभवतु। अथ न जयति। अथ नपुनः जल्पितुं आचक्षाणस्त्वं प्रयत्नः धूर्तक अहमपि नाम माथुरो धूर्तः
द्यूतं मिथ्या आदर्शयामि, अन्यस्मै अहं न विभेमि। धूर्तः खंडितवृत्तोसि त्वं त्वं खलु खंडितवृत्तः। वेश्यापु

त्रएवमेव द्यूतं त्वया सेवते। अरे, संवाहक, प्रयत्नं त्वं दशसुवर्णं। अद्य दास्यामि, तावत् दारयामि। अरे, अ
रे, दुष्टपुंश्चलीपुत्रक फलमपि प्राप्स्यसि। एष प्रेक्षिष्ये। एवं प्रेक्षिष्ये एतत्कृत्यापि अपावृतपरिहारकं गेहं,
तदत्र प्रविशामि। आर्ये शरणागतोस्मि। आर्ये शरणागतस्य; हे चेटि, पिधेहि परिहारकं। कुतस्ते भयं।
आर्ये, धनिकात्। चेटि, संयतं अपावृणु परिहारं। कथं, धनिकात् तुलितं अस्येव भयकारणं, सुष्ठु खलु ए
वं उच्यते। य आत्मबलं ज्ञात्वा भारं तुलितं वहति मनुष्यः, तस्य स्खलनं न जायते, न च कांतारगतोवि
पद्यते अत्र लक्षितोस्मि। अरे, देहि देहि। अ भट्टा यावदेव वयं दर्दुरेण कलहायिताः, तावदेव स पुरुषोप
क्रांतः। तस्य द्यूतकरमुष्टिप्रहारेण नासिका भग्ना, एहि रुधिरपथमनुसराम। भट्टा, वसंतसेनागेहं प

विष्टः सः।भृतानि सुवर्णानि राजकुले गत्वा निवेदयावः।एष धूर्तः अतोनिष्क्रम्य अन्यत्र गमिष्यति।तस्मादुपरोधेन
चलामः।कुतआर्य,कोवा आर्यः,कस्य वा आर्यः,किंवावृत्तिं आर्य उपजीवति,कुतोवा भयं शृणोतु आया;आर्ये,
पाटलिपुत्रे मे जन्मभूमिः गृहपतिदारकोहं,संवाहकस्य वृत्तिं अंगमर्दनरूपां उपजीवामि।सुकुमारा खलु कला
शिक्षिता आर्येण।आर्य,कलेति शिक्षिता,आजीविका इदानीं संवृत्ता।अतिनिर्विण्णा आर्येण प्रतिवचने दत्ते,
ततस्ततः।ततआर्ये,एष निजगृहे आहिण्डकानां मुखात् श्रुत्वा अपूर्वदेशदर्शनकुतूहलेन,इहागतः,इहापि
मया प्रविश्य उज्जयिनी,एकआर्यः शूद्रःश्रूषितः,यस्मादशः प्रियदर्शनः,प्रियवादी,दयितं न कीर्तयति,अप
कृतं विस्मरति।किंबहुनोक्तेन,दक्षिणतया फलकृतेव आत्मानं अवगच्छति शरणागतवत्सलश्च कइहा

र्नी।आर्याया मनोरथांतरस्य गुणान् चोरयित्वा,उज्जयिनी अलंकरोति।साधु,चेटि,साधु;मयापि एवमेव हृदयेन मंत्रि
तं।आर्य ततस्ततः।आर्य,सइदानीं अनुद्योगशक्तेः प्रहाणेः।किंउपरतविभवः संवृत्तः।अनाख्यातमेव कथं आर्यया
विज्ञातं किमत्र ज्ञातव्यं,दुर्लभागुणाविभवाश्च;अपेयेषु तडागेषु बहुतरमुदकं भवति।आर्य,किंनामधेयः खलु सः।
आर्ये,कइदानीं तस्य भूतलमृगांकस्य नाम न जानाति,स खलु श्रेष्ठिचत्वरे प्रतिवसति,श्लाघनीयनामधेय आ
र्यचारुदत्तोनाम।आर्यस्य आत्मकृतं एतद्गेहं हे चेटि;देहि अस्य आसनं,तालवृंतकं गृहाण,परिश्रम आर्यस्य वा
धते।कथं आर्ये चारुदत्तस्य नामसंकीर्तनेन ईदृशो मे आदरः।साधु,आर्यचारुदत्त,साधुः पृथिव्यां त्वमेकोजीवसि
शेषः पुनर्जनः श्वसिति।भवतु,आर्ये,भवतु,आसने निसीदतु आर्या।आर्य कुतः स धनिकः।सत्कारधनः खलु स

ज्ञानः कस्य न भवति चलाचलं धनं। यः पूजितुं अपि जानाति, स पूजाविशेषमपि जानाति ततः। ततस्तेन आर्येण स वृत्तिः परिचारकः कृतोस्मि। चारित्र्यावशेषे च तस्मिन् दूतोपजीवी संवृत्तः। ततोऽभागधेयविषमतया दश सुवर्णे द्यूते हारितं। उत्खातितोस्मि। मुषितोस्मि। एतौ तौ सभिकद्यूतकरौ, मां अनुसंधत्तः। सांप्रतं श्रुत्वा आर्या भ्रमाणी। मदनिके, वासपारपक्षिसंघुलतया पक्षिणोऽतस्तोपि आहिंडंतिहे चेटि, तद्गच्छ, एतयोः सभिकद्यूतकरयोः अयमार्यस्य प्रतिपादयतीति इदं हस्ताभरणं, त्वं देहि। यत् आर्या आज्ञापयति। उत्सादितोस्मि। यथा एतौ ऊर्ध्वप्रेक्षेते, हर्षं निश्वसतश्च विचारयतश्च अभिलषतश्च द्वारनिहितलोचनौ, तथा तर्कयामि, एतौ तौ सभिकद्यूतकरौ ।भविष्यतः। आर्य वंदे। सुखं तव भवेत्। आर्य, कतमौ युष्माकं सभिकः। कस्य त्वं तनुमध्ये, अधरेण रतदष्टदुर्वि

यदि।

णीतेन जल्पसि मनोहरवचनं, आलोकयंती कटाक्षेण नास्ति मम विभवः, अन्यत्र व्रजाँईदृशानि ननु मंत्रयसि तदा न भवसि द्यूतकरः। अस्ति कोपि युष्माकं धारकः। अस्ति, दशसुवर्णं धारयति, किंतस्य। तस्य कारणात् आर्या इदं हस्ताभरणं प्रतिपादयति; नहि, नहि, सएव प्रतिपादयति। अरे, भणसि तं कुलपुत्रं; भूतः तव गंडः, आगत्य, पुनः द्यूतं रमस्व। आर्ये, परितुष्टगताः सभिकद्यूतकराः। तद्गच्छतु आर्यो बंधुजनं समाश्वासयितुं। हे आर्य, यदि एवं तत् इयं कला परिजनहस्तगता क्रियतां। आर्य, यस्य कारणात् इयं कला शिक्ष्यते, सएव आर्येण शुश्रूषितपूर्वः शुश्रूषितव्यः। आर्यया निपुणं प्रत्यादिष्टोस्मि। कथं प्रत्युपकरिष्ये। आर्ये, अहं एतेन द्यूतकरायमानेन शाक्यश्रमणको भविष्यामि। तत् संवाहको द्यूतकरः, शाक्यश्रमणकः संवृत्तः, इति स्मर्तव्यानि आर्यया एतानि अक्षराणि। आर्य, अलं साहसेन। आर्ये, क

तो निश्चयः द्यूतेन तत्कृतं मम यत् विहस्तं जनस्य सर्वस्य इदानीं प्रकटशौण्डिनरेंद्रमार्गेण विहरिष्यामि। जेरे, किं नेदं। किं भणतः एष खलु वसंतसेनाक्रीडापात्रं स्तंभभंजको नाम दुष्टहस्ती विहरतीति। अहो, आर्या यावत्पश्यामि प्रेक्षिष्ये, गत्वा, अथवा, किं मम एतेन यथा व्यवसितं अनुष्ठास्यामि। कुत्र कुत्र आर्या। दुर्मनुष्यः किं ते उद्वेगकारणं, यत् अयतोवस्थितां आर्यां न प्रेक्षसे। आर्ये वंदे कर्णपूरक, परितुष्टमुखोलक्ष्यसे, तत् किं नेदं। आर्ये, वंचितासि, यथा अद्य कर्णपूरकस्य पराक्रमो नदृष्टः। कर्णपूरक किं भणतु आर्या, यः स आर्यायाः स्तंभभंजको नाम दुष्टहस्ती, स अत्यानस्तंभं भंक्त्वा, महामात्रं व्यापाद्य, महांतं संक्षोभं कुर्वन्, राजमार्गमवतीर्णः ततः अत्रांतरे उद्दृष्टं जनेन, अपनयत बालकजनं, त्वरितं आरोहत वृक्षप्रासादं, किं न खलु पश्यथ, पुरतो दुष्टहस्तीदृश्यति। १५९

अपिच विचरति नूपुरयुगलं, लिंघते च मेखलामणिखचिताः, बलया च सुंदरतरा, रत्नांकुरजालप्रनिबद्धा। तत्क्षणेन दुष्टहस्तिना करचरणरदनैः, फुल्लनलिनीमिव नगरमुज्झायिनीमवगाहमानेन, समासादितः परिव्राजकः। तंच परित्रष्टदंडकुंडिकाभाजनं धीकारैः सित्का, दंतांतरे क्षिप्त्वा पुनरप्युद्दृष्टं जनेन, हा परिव्राजको व्यापाद्यतेऽनि। अहो प्रमादः अहो प्रमादः। अलं संभ्रमेण, श्रृणोतु तावत् आर्या। ततोविलिंब्य विसंष्ठुलशृंखलाकलापं उद्वहंतं दंतांतरपरिगृहीतं परिव्राजकं उद्वहंतं तं प्रेक्ष्य, कर्णपूरकेण मया, नहि, नहि, आर्यया अनेन पिंडोपपुष्टेन हारेण, वामचरणेन द्यूतलेखकं उद्धूय, उद्धूय त्वरितं आपणात् लोहदंडं गृहीत्वा, आकारितः स दुष्टहस्ती। ततस्ततः। आहत्य सरोषं तं हस्तिनं, विंध्यशैलशिखरभां, मोचितो मया स दंतांतरसंस्थितः परिव्रा

नेक:। सुष्ठु त्वया कृतं। तत आर्ये, साधु रे कर्णपूरक, साधु इत्येतावन्मात्रं भणंती विषमभराक्रांता इव नो: एकत: पर्यस्ता सकला उज्जयिनी आसीत्। तत आर्ये, एकेन शून्यानि आभरणस्थानानि परामृश्य ऊर्ध्वं प्रेक्ष्य, दीर्घं नि:श्वस्य, अयं आवारको ममोपरि क्षिप्त:। कर्णपूरक, जानीहि तावत् किं एष जातीकुसुमवासित: आवारको न वाऽस्ति। आर्ये, मद्गंधेन सुष्ठु तं गंधं न जानामि। नामापि तावत् प्रेक्षस्व। इदं नाम आर्या एव वाचयतु। कर्णपूरक, शोभते आर्याया: आवारक:। अहो शोभते आर्याया: आवारक:। कर्णपूरक, इदंते पारितोषिकं। साधुते सुष्ठु शोभते आर्याया: आवारक:। कर्णपूरक, एतस्यां वेलायां कुत्रार्य चारुदत्त: एतेनैव मार्गेणैव प्रवृत्तोगेह। हे चेटि, उपरितनं अलिंदकं आरुह्य आर्य चारुदत्तं पश्याम:। सुजन: खलु भृत्यानुकंपक: स्वामी निर्धनकोपि १९० १९०

* इतिद्वितीयोंक:२

शोभते; पिशुन: पुनरीर्ष्यागर्वितो दुष्कर: खलु परिणामदारुण: सुजन: खलु कुभृत्यपालको धनहीनोप्युरुरपि शोभते, पिशुन: पुनरीर्ष्यागर्वितो न च लक्ष्मीविभवावलंबित:। अपिच॥ शस्यलंपटबलीवर्दो न शक्योवारयितुं; अन्यकलत्रप्रसक्तो न शक्योवारयितुं; द्यूतप्रसक्तोमनुष्यो न शक्योवारयितुं; योपि स्वाभाविकदोषो न शक्योवारयितुं:॥१॥ कापि वेला आर्य चारुदत्तस्य गांधर्वं श्रोतुं गतस्य अतिक्रामति अर्धरजनी, अद्यापि नागच्छति तत् यावत् बहिर्द्वारशालायां गत्वा स्वपिष्यामि भो एहि, गृहं गच्छाव:॥ मम तावत् हास्यामेव हास्यं जायते स्त्रिया संस्कृतं पठंत्या, मनुष्येण च काकलीं गायता स्त्री तावत् संस्कृतंपठंती दत्तनवनासिकारंध्ररज्जुरिव गृष्टि: अधिकं सूत्कृताक्षेपैरो ति:मनुष्योपि काकलीं गायन्, शक्र:सुमनोदामवेष्टितो वृद्धपुरोहितएव मंत्रं जपन्, दृष्टं मे नरोचते। भो वयस्य, आ

परांतरस्थाविभागेषु सुखं कुक्कुराअपि सुप्ताः। तत् गृहं गत्वावः। वयस्य। पश्य। पश्य। एषोपि अंधकारस्येवास्य
काशं दृष्ट्वा अंतरीक्षप्रासादात् अवतरति भगवान् चंद्रः। भो इदं अस्माकं गेहं। वर्धमानक। उद्घाटय द्वारं। आ
र्य मैत्रेय स्वरसंयोगः श्रूयते। आगतआर्य चारुदत्तः। तत् यावत् द्वारं अस्य ददामि। आर्य वंदे। मैत्रेय त्वामपि वंदे।
अत्र विस्तीर्णे आसने निसीदतं आर्यो। वर्धमानक। रदनिकां आकारय पादौ धावितुं आर्य मैत्रेय। अहं पानीयं
गृह्णामि। त्वं पादौ धाव। भो वयस्य। एष इदानीं दासीपुत्रोभूत्वा पानीयं मां पुनर्ब्राह्मणं पादौ धावयति। आर्य
मैत्रेय। देहि उदकं। किं मम पादोदकैः। भूम्यां एव मया गर्दभेन इव पुनरपि लोटितव्यं। आर्य मैत्रेय। ब्राह्मणः खलु
त्वं। यथा सर्वनागानां मध्ये डुंडुभः तथा सर्वब्राह्मणानां मध्ये अहं ब्राह्मणः। आर्य मैत्रेय। तथापि धाविष्यामि

आर्य मैत्रेय। एतत् तत् सुवर्णभांडं मम दत्वा। तव शौचो चः तद्धाणं। अद्यापि एतत् तिष्ठति। किमत्र उज्जयिन्यां
चौरोपि नास्ति। यएतद्दास्याः पुनर्निद्राचौर्येणापहरति। भो वयस्य आर्यचारुदत्तः शाल्मकं प्रवेशयामि एनं अपि नि
द्राति भवान् तत् स्वपिहि। भो वयस्य संधिरिव दृश्यते। चोरमिव पश्यामि। तत् गृह्णातु भवान् इदं सुवर्णभांडं। भो
वयस्य। शापितोसि भो ब्राह्मणकाम्यया। यदि एतत् सुवर्णभांडं नगृह्णासि। भो वयस्य। शीतलस्ते अग्रहस्तः।
इदानीं विक्रीपण्यइव वणिक् अहं सुखं स्वपिष्यामि। हाधिक्। हाधिक्। बहिर्द्वारशाल्मायां प्रसुप्तोवर्धमानकः। सोप्य
त्र नदृश्यते। भवतु आर्य मैत्रेयं आह्वयामि। हाधिक्। हाधिक् अस्माकं गृहे संधिं कर्तयित्वा। चोरोनिष्क्रामति।
भवतु। मैत्रेयं गत्वा प्रबोधयामि। आर्य मैत्रेय। उत्तिष्ठ। उत्तिष्ठ। अस्माकं गेहे संधिं कर्तयित्वा। चोरोनिष्क्रांतः।

आः हास्याः पुत्रिके, किं भणसि चोरः कक्षमधित्वा संधिं निष्क्रांतः। हताश किं न अलं परिहासेन, किं नप्रेक्षसे एतत् आः हास्याः पुत्रिके, किं भणसि हितीयमिव द्वारं उद्घाटितमिति। भो वयस्य, चारुदत्त उत्तिष्ठ उत्तिष्ठ अस्माकं गेहे संधिं रत्वा चोरो निष्क्रांतः। भो नपरिहासः प्रेक्षतां भवान्। भो एषः। भो वयस्य, एष संधिर्द्वाभ्यामेव दत्तो भवेत्। अथवा आगंतुकेन शिक्षितुकामेन वा अन्यथा अत्रोज्जयिन्यां कोस्माकं गृहं विभवं न जानाति। भो कथं नमेव चोरहतकमनुशोचामि तेन चिंतितं महदेतद्गृहं इत्थं रत्नभांडं सुवर्णभांडं वा निष्क्रामयिष्यामि कुत्र तत्सुवर्णभांडकं। भो वयस्य त्वं सर्वकालं भणसि मूर्खोमैत्रेय अपंडितः मैत्रेयइति सुष्ठु कृतं मया न तत्सुवर्णभांडं भवतो हस्ते समर्पयतो अन्यथा दास्याः पुत्रेणापहृतं भवेत्। भो यथा नाम्माहं मूर्खस्तत्किं परि

हासस्य अपि देशकालं न जानामि। भो यदा त्वं मया भणितोसि शीतलस्ते अग्रहस्तः। किं नापहृतं तथापि किं भ्रियं। न्यासः खलु सः समाश्वसितु भवान् यदि न्यासश्चोरेणापहृतः त्वमपि किं मोहमुपगतः। अहं खलु आत्मपिष्यामि केन दत्तं केन गृहीतं कोवा साक्षीति। तत् यावत् आर्या धूतायै गत्वा निवेदयामि। अयि सत्यं अपरिक्षतशरीरः आर्यपुत्रः आर्य मैत्रेयेण सह। स्वामिनि सत्यं किंतु यः स वेषेण जनस्यालंकारः सोपहृतः। सा माश्वसितु आर्या धूता। चेटि किं भणसि अपरिक्षतशरीरः आर्यपुत्रइति वरं इदानीं स शरीरेण परिक्षतो न पुनश्चारित्रेण सांप्रतमुज्जयिन्यां जनश्चं मंत्रयिष्यति दरिद्रतया आर्यपुत्रेणैव ईदृशमकार्यं अनुष्ठितं गगनं कृतं तपुष्करपत्रपतितजलबिंदुचंचलैः क्रीडसि दरिद्रपुरुषभागधेयैः इयंवेमे एका मातृरहतुब्धा रत्नावली तिष्ठति। ए

एतामपि अतिशौण्डीरतया आर्यपुत्रो न गृह्णिष्यसि चेटि। आर्ये मैत्रेयं तावदाकृष्य। यत् आर्यो धूता आज्ञापयति। आर्य मैत्रेय, धूतास्त्वामाज्ञापयति। कुत्र सा। एषा तिष्ठति उपसर्प। स्वस्ति भवत्यै:। आर्ये चेटे। आर्य पुरस्तान्मुखोभव। एष भवति पुरस्तान्मुख: संवृत्त:। आर्ये गृह्णातु इमां। किं नेदं। अहं खलु रत्नषष्ठी उपोषिता आसं; तत्र यथाकिंभवानुसारेण आत्मन: प्रतिपादितव्य: स: अन्यत्र प्रतिपादित:, तत् तस्य कृतघ्नतील्ल इमां रत्नमालिकां। स्वस्ति, गमिष्यामि प्रियवयस्य निवेदयामि। आर्य मैत्रेय, मा खलु मां लज्जितां कुरु। अहो अस्या महानुभावता। एषास्मि; गृहाण एतां। भो यत् ते सदृशं दारसंग्रहस्य फलं। मा तावत् अस्वादितस्य, अभुक्तस्य, अल्पमूल्यस्य चौरैरपि हृतस्य कारणात् चतु:समुद्रसारभूता रत्नावली हीयते। भो दरिद्र: किं अरूपणं मंत्रयति। आज्ञप्तास्मि मात्रा आ

१५२

७ लक्षायोत्तरीयांकः

र्यायाः सकाशं गंतुं। एषा आर्या चित्रफलकहस्तिमदनिकया सह किमपि मंत्रयतीतिष्ठति। तत् यावत् उपसर्पामि। चेटि मदनिके, सुसदृशी एवं इयं चित्राकृतिः आर्य चारुदत्तस्य। सुसदृशी अथ त्वं जानासि। येन आर्यायाः सुस्निग्धा दृष्टिरनुक्रमा। चेटि, किं वेश्यावसतादक्षिण्येन मदनिके एवं भणसि। आर्ये, किं यत्रैव जनोवेशं प्रतिवसति सत्रैव अलीकदाक्षिण्यागवति। चेटि, नानापुरुषसंगमेन वेश्याजनः अलीकदाक्षिण्योभवति। यतस्तावत् आर्याया दृष्टिः इयं अभिरमते, तदयंच तस्य कारणं किं पृच्छते। चेटि सखीजनादुपहसनीयता द्रक्ष्यामि। आर्ये, एवं नेदं सखीजनचित्तानुवर्ती अबलाजनो भवति। आर्ये माता आज्ञापयति, गृहीतावगुंठनं परस्परं सख्यं प्रवहणं तां गच्छति। चेटि किं आर्यं चारुदत्तो मां नेष्यति। आर्ये, येन प्रवहणेन सह सुवर्णदशसाहस्रिकः अलंकारः अनुप्रविष्टः। कः पुनः सः। एष एव राजश्यालकसंस्था

नकैः अपेहि मा पुनरेवं भणिष्यति। प्रसीदतु प्रसीदतु आर्या संदेशो नास्मि प्रेषिता अहं संदेशस्येव कुप्यामि॥तत्किमिति मातरं विज्ञापयिष्यामि एवं विज्ञापयितव्या यद्यहं मां जीवतीमिच्छसि, तदा एवं न पुनरहं मात्रा आज्ञापयितव्या। यथा ते रोचते। चेटि इमं तावत् चित्रफलकं मम शयनीये स्थापयित्वा, तालवृंतं गृहीत्वा, लघु आगच्छ। अंब यदाज्ञापयति। कथं शार्विलकः। शार्विलक, स्वागतं ते, कुत्र त्वं। चिरयति मदनिका, तत्कुत्र नु खलु सा। कथं एषा केनापि पुरुषकेण सह मन्त्रयतीतिष्ठति यथा अतिस्निग्धया निश्चलदृष्ट्या आपिबंतीव एवं निर्ध्यायति। तथा तर्कयामि, एष स जनः एनामिच्छति अनुज्ञिप्यां कर्तुं, तत् रमतां, रमतां, मा कस्यापि प्रीतिच्छेदो भवतु, नखलु आकारयिष्यामि। शार्विलक, कथय। शार्विलक किं नेदं स्तोकेन लभ्यते। अथ किं। परमरहस्यं तत् न श्रोष्यामि। २५५

कथं मत्संबंधिनी कथा, तत् श्रोष्यामि अनेन गवाक्षेण निवारितशरीरा। शार्विलक, भणिता मया आर्या। तदा भणति, यदि मम स्वच्छंदः तदा विना अर्थेन सर्वं परिजनं अनुज्ञिप्यं करिष्यामि। अथ शार्विलक, कुतस्ते एतावान् विभवः येन मामार्यासकाशात् मोचयिष्यसि। प्रसीदास्याकृतिः साहसकर्मतया पुनरुद्वेजनीया। शार्विलक, स्थीकल्यवर्तस्य कारणेन उभयमपि संशये विनिक्षिप्तं॥शरीरं चारित्रं च। शार्विलक, अखंडितचरित्रोसि, तत् नहि त्वया मम कारणात् साहसं कुर्वता अत्यंतविरूपमाचरितं। शार्विलक, अप्रकाशोलंकारः, अर्थेन जनः, इति ह्ययमपि न युज्यते, तत उपनय तावत् पश्यामि तावदेतत् अलंकारं। दृष्टपूर्वं ह्येवायमलंकारः, तद्गृहीत्वा कुतस्ते एषः यदि मत्प्रियं न गच्छसि, तत् किं निमित्तं मां निष्क्रीणासि। साहसिक, न खलु त्वया मम कारणात् इदं

अकार्यं कुर्वता तस्मिन् गेहे कोपि व्यापादितः परिक्षतोवा। सत्यं आश्चर्यः प्रत्युपनीवितास्मि। प्रियं अहो अस्य अस्था
ने आवेशः। अपि असंबद्धभाषके असंभावनीयं कुर्यासि। एष खलु अलंकारः आर्यया कृतः। सर्वं तस्य आर्यस्य
हस्तेविनिःसिक्तः। एवमिव। कथमेष संतप्यते एवः तत् अजानता एतेन एव मनुष्ठितं॥ अथ त्वमेव पंडितः। शर्वि
लक यदि मम वचनं श्रूयते तत् तस्यैव महानुभावस्य प्रतिनिर्यातय। न चेद्दास्यतीभागवति। साधु मदनिके सा
धु। सोयमपरउपायः। कः खलु अपरउपायोभविष्यति। तस्यैव आर्यस्य कृतः भूत्वा इममलंकारं आर्यायै उपनय
त्वं तावत् अहोरः। सोपि अद्य अनृणः आर्यया सकः अलंकारः उपगतः भवति। अपि उपनय अन्यथा अनि ५५
साहसं। साधु मदनिके साधु अभुजिष्यया इव मंत्रितं। तेन त्वमस्मिन् कामदेवगेहे मुहूर्तं तिष्ठ यावत् आर्याये

तयागमनं निवेदयामि आर्ये एष खलु चारुदत्तस्य सकाशात् ब्राह्मण आगतः हे चेटि तस्य तस्य कृते इति कथं
त्वं जानासि। आर्ये आत्मनः कृते अपि न जानामि। युज्यते युज्यते प्रविशतु। यदार्या आज्ञापयति प्रविशतु शर्वि
लकः॥ आर्ये वंदे समाविशतु आर्यः। आर्ये ममापि तावत् प्रतिसंदेशं तत्र आर्यो नयतु॥ प्रतीच्छतु आर्यो मदनिका।
अहमार्यचारुदत्तेन भणिता यः इमं अलंकारं समर्पयिष्यति तस्य त्वया मदनिका दातव्या तस्यैव एतानि दत्ता
नीति एवं आर्येण अवगंतव्यं। कोत्र भवदलिकः। आर्ये सज्जं भवदलं। चेटि मदनिके सुदृष्टं मां कुरु दर्शा
सि आरोह भवदलं स्मरसि मां परि च्युतास्मि आर्यायाः॥ संप्रति त्वमेव वंदनीया संवृत्ता तदुत्तिष्ठ आरोह भव
दलं स्मरसि मां एवं नेदः तत्परं नयतु मां आर्यपुत्रः समर्पयितुं गुरुजनानां। अथ किं। यदार्य आज्ञापयति यथा आ

ये पुत्रोऽगणयति; अप्रमत्तेन तावत् आर्यपुत्रेण भवितव्यं। आर्ये, दिष्ट्या वर्धसे; आर्यचारुदत्तस्य सकाशात् ब्राह्मण
आगत:। अहो रमणीयता अद्य दिवसस्य; तच्चेटि, सादरं, बंधुलेन समं प्रवेशय एनं। यदार्यो आज्ञापयति। आ
श्चर्यं भो! नपश्चरणकुशविनिर्जितेन रात्रंचरराजोरावण: पुष्पकेण विमानेन गच्छति, अहं पुनर्ब्राह्मण: अन
नपश्चरणकुशोपि नगरनारीजनेन गच्छामि। धिगस्तां आर्य: अस्माकं कृतं गेहद्वारं। अहो; सलिलसिक्तमा
र्जितस्थैर्यकृतहरितोपलेपनस्य, विविधसुगंधकुसुमोपहारचित्रितभूमिकाभागस्य, गगणतलालोकनको
तूहलदूरोन्नमितग्रीवार्षस्य, दोलायमानावलंबितरावणहस्तस्थमाथितमल्लिकादामगुणालंकृतस्य, समुच्छ्रि
तैरिंद्रकेतोरणकशोभितस्य, महाराजनोपरागापशोभिनापवनचलोद्दोलनालंबचंचलायहस्तेन, इत

एहीति व्याहरता, इव, मां सौभाग्यपताकानिवहेनोपशोभितस्य तोरणधरणस्तंभवेदिकानि: क्षिप्तमुक्तस
क्थचितचूतपल्लवलालामस्फटिकमंगलकलशाभिरामोमयपार्श्वस्य, महासुरवरस्थलदुर्गगवाक्षनिरंतरप्र
तिबद्धकनककवाटस्य, दुर्गतजनमनोरथायासकस्य, वसंतसेनाभवनद्वारस्य, सश्रीकता। उत्सर्पं मध्य
स्थस्यापि जनस्य दृष्टिं आकारयति। एतु, एतु, इमं प्रथमं प्रकोष्टं प्रविशतु आर्य: अत्रापि प्रथमप्रकोष्ट,
शशिशंखमृणालसन्निभा, विनिहितचूर्णमुष्टिपांडुरांविविधरत्नप्रतिबद्धकांचनसोपानशोभिता: प्रासा
दपंक्तय:, अवलंबितमुक्तादामभि: स्फटिकवातायनसुखचेष्टनिध्यानंतीवोल्लासिनी। श्रोत्रियइव सुरवे
पविष्टोनिद्राति दौवारिक:। सदध्ना फलमोदकेन प्रलोभिताकाशयंति वायसाबलिं सुधासकलीतया आ

दिशतु भवती। एतु एतु आर्यः इमं द्वितीयं प्रकोष्ठं प्रविशत्वार्यः। इहापि द्वितीयस्मिन् प्रकोष्ठे पर्येतोपनीतय
वसकवलसुपुष्टा घृताभ्यक्तविषाणावलयाः प्रवृद्धवत्सीवृन्दाः। अयमन्यतरोन्नमितदृप्त कुक्षीनो दीर्घं निः
श्वसिति सैरिभः इतश्च अपनीतयुध्यस्य मद्गुरेयेव मर्द्यते ग्रीवा मेषस्य। इतइतोपरोधाश्वानो केशकल्म
ना क्रियते। अयमपरः पाटच्चरइव दृढबद्धोमंडुरायो शारसामृगः इतश्च प्रक्व्युतघृतमिश्रं पिंडं हस्ती प्रति
याच्यते हस्तिपकेः। आदिशतु भवती। एतु एतु आर्यः; इमं तृतीयं प्रकोष्ठं प्रविशत्वार्यः। इहापि तृतीयप्रको
ष्ठे इमानि तावत्कुलपुत्रजनोपवेशननिमित्तं विरचितानि आसनानि। अर्घ्यवाचितं मंचे तिष्ठति पुस्तके ए
तंच मणिमयसारिकासहितपाशकपीठं। इमे चापरे संधिविग्रहचतुराविविधचर्णिकाविलिखितचित्रफलकाग्रह

स्ताइतस्ततः परिभ्रमंति गणिका वृत्तविराः। आदिशतु भवती। एतु एतु आर्यः; इमं चतुर्थं प्रकोष्ठं प्रविशत्वार्यः।
आश्चर्यं भोः इहापि चतुर्थे प्रकोष्ठे युवतिकरताडिताजलधराइव गंभीरं नदंति मृदंगाः क्षीणपुण्याइव गगणात्तारका
निपतंति कांश्यतालिका मधुकरविरुतंवायंते वंशाः इयमपरा ईर्षाप्रणयकुपितकामिनीव अंकारोपिता करकृपरिम
र्शेन सार्यते वीणा। इमा अपराः कुसुमरसमत्ताइव मधुकरयोनिमधुरतरं प्रगीताः गणिकादारिकानृत्यंते, नाट्यं पर्य
ते, रसरंगाराः अपवल्गिताः। गंधर्वेषु वातं गृह्णंति सल्लिलगर्गर्यः। आदिशतु भवती। एतु एतु आर्यः; इमं पंचमं
प्रकोष्ठं प्रविशत्वार्यः। आश्चर्यं भोः। इहापि पंचमे प्रकोष्ठे भयं दरिद्रजनलोभोत्सादनकरमाहरति उपचितो हिंगुते
लगंधः। विविधरकरिधूमाद्गोरैर्नित्यसंतप्यमानं निःश्वसितीव महानसं द्वारमुखैः। अधिकमुत्कूकायते मो साध्य

DR BHAU DAJI LIBRARY

बहुविधभक्ष्यभोजनगंधः। अयमरोजार्णवस्त्वमिव हतपशूरपेशिं धावति रूपिशारकः। विविधाहारविकारमुपसाधय
ति सूपकारः पच्यंते मोदकाः, पच्यंते च पूपकाः। अपीदानीमिह परिविष्टं भुंक्ष्व, इति पादादंकलक्ष्येण। इह गंधर्वाप्स
रोगणेरिव विविधालंकारशोभितैर्गणिकाजनैर्बंधुलैश्च यत्सत्यं स्वर्गायते इदं गेहं। भोः, के यूयं बंधुलानाम? आदि
शतु भवती। एतु, एतु, आर्यः; इमं षष्ठं प्रकोष्ठं प्रविशत्वार्यः। आश्चर्यं, भो! इहापि षष्ठे प्रकोष्ठे अमूनि नानावर्ण
रत्नानां कर्म तोरणानि, नीलरत्नविनिक्षिप्तानि, इंद्रायुधस्थानमिव दर्शयंति, वैदूर्यमौक्तिकप्रवालकपुष्परागइंद्र
नीलकर्केतरकपद्मरागमरकतान्रत्नविशेषान् अन्योन्यं विचारयंति शिल्पिनः। बध्यंते जातरूपेमाणिक्यानि
घट्यंते सुवर्णालंकाररत्नसूत्रेण ग्रथ्यंते मौक्तिकाभरणानि। घृष्यंते धीरं वैदूर्याः छिद्यंते शंखाः। शाणघर्षणो

नानिर्मायंते प्रवालकाः शोष्यंते आर्द्रकुसुमप्रस्तराः। सार्यते कस्तूरिका। विशेषेणघृष्यते चंदनरसः संयोज्यं
ते गंधयुक्तयः। दीयते गणिका कामुकयोः सकर्पूरं तांबूलं। अवलोक्यते सकटाक्षं। प्रवर्तते हासः। पीयते वा
रुणी सरसीत्कारं मदिरा। इमे वेराः, इमाश्चेटिकाः, इमे अपरे अवधीरितपुत्रदार चिंतामनुष्याः, आसवकरका
पीतमदिरैर्गणिकाजनैर्यैः मुक्तास्ते पिबंति आदिशतु भवती। एतु, एतु, आर्यः; इमं सप्तमं प्रकोष्ठं प्रविशत्वार्यः
इहापि सप्तमे प्रकोष्ठे सुश्लिष्टविहंगवासिसुखनिषेदुषाणि, अन्योन्यचुंबनपराणि सुखमनुभवंति पारावतमिथु
नानि। दधिभक्तपूरितोदरब्राह्मणइव सूर्यं पठति पंजरशुकः। इयमपरा स्वामिसंमाने नालब्धप्रसादेव गृहदा
सी अधिकं कुररुरायते मदनसारिका। अनेकफलरसास्वादसंतुष्टकंठ कुंभदासीव कूजितपरपुष्टा। आलंबि

ता नागरैतेषु पंजरपरंपराः। रोध्यंते लावकाः। आलाप्यंते पंजरकपोताः। इतस्ततोविविधमणिविचित्रितइता
यं सहचरीसहितः संहर्षेण नृत्यन् रविकिरणसंतप्तं पक्षोत्क्षेपैर्विधुनिइव प्रासादं गृहमयूरः। इतः पिंडी
कृताइव चेडीपादाः पदगतिं शिक्षंतीव कामिनीनां। पश्चात्परिवर्तंति राजहंसमिथुनानि। एते अपरे वृद्धश्रेष्ठा
इव इतस्ततः संचरंति गृहसारसाः। आश्चर्यं भोः। प्रसारणं कृतं गणिकायानापरिसमूहैः। यत्सत्यं खलु
नंदनमिव मे गणिकागृहं प्रतिभासते आदिशतु भवती। एत्वार्यः। इममष्टमं प्रकोष्ठं प्रविशात्वार्यः। हे कए
ष पट्टशावारकप्रावृतोधिकतरं अत्युद्भुतपुनरुक्तालंकारालंकृतः अंगभंगैः परिस्खलन् इतस्ततः परिव
र्तति आर्यः एष आर्यायाअयं भ्राता भवति। किंयत्पश्चरणं कृत्वा वसंतसेनायाभ्राता भवति। अथवा मा

तावत्। यद्यपि एषउज्ज्वलः स्निग्धश्च रूक्षंधश्च तथापि श्मशानवीथ्यां जातइव चंपकवृक्षः अनभिगमनीयोलो
कस्य। भोः एषा पनः का। पुष्पशावारकप्रावृता उपानद्युगलनिक्षिप्तेतलविकृतेः पादैः उच्चासनोपविष्टा तिष्ठ
ति। आर्य, एषा खलुअस्माकं आर्यायामाता। अहो अस्या अपवित्रडाकिन्या उदरविस्तारः तत्किमेतां प्रविश्य
महादेवमिव हारशोभा इह गृहे निर्मिता हताशः मेवमुपहसास्माकं मातरं एषा खलु चातुर्थिकेन पीड्यते।
भगवन्, चातुर्थिक एतेनोपचारेण मामपि शीघ्रं अवलोकय। हताशः मरिष्यसि। दारयाः पुत्रिः वरं ईदृशः शत्रु
पीनजठरोमृतएव न। धुरुधुरुसवमत्ता एतादृशीमवस्थां गता हि अतिवृद्धा यदि म्रियते, अत्र माता भवति शरं
गालसदस्त्रयाचा। हे भवति किं युष्माकं यानपात्राणि वहंति आर्य; नहि, नहि। किंवा अत्र पृच्छ्यते यु

प्याकं खलु प्रेमनिर्मलजले मदनरसमुद्रे स्तननितंबजघनान्येव यानपात्राणि मनोहराणि। एवं वसंतसेनायाश्चतुरस्रो नेत्रः
आष्टमकोष्ठं भवनं प्रवेक्ष्यत्यसत्यं जानामि एकस्थमिव त्रिपिष्टपं दृष्टं प्रशंसितुं नास्ति मे वाचा विषयः। किं तावत् गणिकागृहं कुबेरभवनपरित्यक्तैरिति। कुत्र युष्माकमार्यो। आर्य एषा दृश्यवाटिकायां तिष्ठति। तस्मात्प्रविशत्वार्यः। आश्चर्यं भो! अहो दृश्यवाटिकायाः सभ्यीकृता अत्यंतरीतिकुसुमायत्र रोपिताअनेकपारपाः निरंतरं पारपतलनिर्मिता। युवतिजनजघनप्रमाणाः पदहोला सुवर्णयूथिका शेफालिका मालती मल्लिका नवमल्लिका कुरबकातिमुक्तकप्रभृतिकुसुमैः। स्वयं निपतितैर्यत्सत्यं लघूकरोतीव नंदनवनस्य सभ्यीकृतां। इतश्च उदयत्सूर्यसमप्रभोः कमलरक्तोत्पलैः संध्यायते इव दीर्घिका। अपिच। एष अनेकदृश्यानवनिर्गतकुसुमपल्लवो

भाति। सुभटइव समरमध्येघनलोहितपंकचर्चितः। तत्कुत्र युष्माकमार्या। आर्य। अवनमय दृष्टिं पश्यार्यो। स्वस्ति भवत्यै। उपविशतु भवती। हे कुशले। उपलक्षितं दृष्टविलासिन्या। अथकिं। शृणोतु भवती। तत्र भवान् चारुदत्तः शीर्षेअंजलिं कृत्वा आर्यां विज्ञापयति। मया तत्कवर्णभाडं विश्रंभाद्यात्मनः कृते। इति कृत्वा द्यूते हारितं। सच गणिकाराजावश्यकारी। न ज्ञायते कुत्र गतइति। आर्य। दिष्ट्या वर्द्धसे; आर्यो द्यूतकरः संवृत्तः। कथं। चोरेण पुत्रेण शौंडीरतया द्यूते हारितं इति भणंति; अतएव काम्यते। तन्नस्य कारणात् गृह्णातु भवतीमां रत्नावलीं। किं दर्शयामि तमलंकारं। अथवा न तावत्। किं तावत् न गृह्णाति भवती इमां रत्नावलीं। मैत्रेय। कथं न गृहीष्यामि रत्नावलीं कथं। हीनकुलकुमारपि सहकारपारपान्मकरंदबिंदवो निपतंति। आर्य। विज्ञापयसि तं यू

मृ० ना० २६२ तकरं मम वचनेनार्यचारुदत्तं। अहमपि प्रदोषे आर्यं प्रेक्षितुं आगमिष्यामि। किमन्यत्तत्र गत्वा ग्रहीष्यति इत्यभ
वति, भणामि निवर्ततामस्मात् गणिकाप्रसंगादिति। चेटि, गृहीत्वैतं अलंकारं, चारुदत्तमंदिरं तु गच्छामः। आ
र्ये, पश्य, पश्यः उन्नमत्यकालदुर्दिनमिति। चेटि, हारं गृहीत्वा शीघ्रमागच्छ। अहोगणिकायाः लोभः अनुदारता च।
यतोन कथा कृता अन्या अनादरेणैव आदाय गता किमपि एवमेव गृहीता रत्नावली। एतावत्या कथ्याः न तया
अहंभणितः आर्यमैत्रेय, विश्राम्यतु मदनिकेन पानीयं पीत्वा गम्यतामिति, तत् मा तावत् दास्याः पुत्र्यागणिका
या। सुष्ठु खलु उचिता, अकंदसमुत्थिता पद्मिनी, अकंचकोवणिक्, अचोरः सुवर्णकारः, अकलहायामसमाग
मः, अलुब्धा गणिकेति दुष्करं एतिसंगाद्यते। तत् प्रियवयस्यं गत्वा, अस्मात् गणिकाप्रसंगात् निवर्तयामि। अ

यं प्रियवयस्यावृक्षवाटिकायामुपविष्टस्तिष्ठति, तत् यावदुपसर्पामि; स्वस्ति भवते, अर्थितो भवान्। उपविष्टोस्मि। त
त्खलु कार्यं विनष्टं। कुतोस्माकमेतावद्भागधेयं यत् नवनलिनकोमलं अंजलिं मस्तके कृत्वा प्रतिगृहीता। भो, क
थं न विनष्टं, यत् अभुक्तपीतस्य, चौरेरपहृतस्य, अप्रमूल्यस्य सुवर्णभांडस्य कारणात्, चतुःसमुद्रसारभूता
रत्नमाला हारिता। भो, वयस्य; एतदपि मे द्वितीयं संतापकारणं; यत् सखीजनदत्तसंज्ञया पूतोतापवारितं मुखं
कृत्वा, अहमुपहसितः। तदहं तदहं भ्रात्रेणागत्य इदानीं भवंतं शीर्षेण पतित्वा, विज्ञापयामि। निवर्त्यतामात्मा
अस्माद्दुष्प्रत्यवायात् गणिकाप्रसंगात्। गणिका, नाम, पादुकांतरप्रविष्टेव शर्करा, दुःखेन पुनर्निराक्रिय
ते। अपिच, अहो वयस्य, गणिका, हस्ती, कायस्थो, भिक्षुः, चाटो, रासभश्च, यत्र एते निवसंति, तत्र दुष्टाअ

पि न जायंते। अपितु जायंते एव। यथा एष ऊर्ध्वं प्रेक्ष्य दीर्घं निःश्वसति। तथा तर्कयामि मया निवार्यमाणस्य
अधिकतरं वृथा अस्योत्कंठा। तत् सुष्ठु खल्वेवमुच्यते। कामो वामश्रुति। भो। वयस्य। भणितं च तया। अण्ण वा
रुद्दत्तं। अथ घरोषे मया अत्र आगंतव्यमिति। तत्तर्कयामि रत्नावल्या अपरितुष्टा अपरं याचितुं आगमिष्य
तीति। अथेतरा मानवाः यथा यथा वर्षति अभ्रखंडं। तथा तथाद्रैभवति पृष्ठचर्म। यथा यथा लगति शी
तवातः। तथा तथा वेपते मे हृदयं। वशं वादयामि सप्ततिछिद्रं रुद्राक्षं। वीणां वादयामि सप्ततंत्रीं नर्दंतीं।
गीतं गायामि गृहीभस्यानुरूपं। को मे गणे तुंबुरुनारदौवा॥१॥ आज्ञप्तोस्मि आर्यया वसंतसेनया। कुंभी लक
गत्वा ममागमनं आर्यचारुदत्तस्य निवेदयेति। तथावत् आर्यचारुदत्तस्य गेहं गत्वामि। एष। चारुदत्तो

वृक्षवाटिकायां तिष्ठति। एषोपि सदुष्टवटुकः। तथावदुपसर्पामि कथमास्तादितं द्वारं वृक्षवाटिकायाः। भव
तु। एतस्य दुष्टवटुकस्य संज्ञां ददामि। अयं कदाचनी एष प्राकारवेष्टितमिव कपित्थं। मां लोष्टुकेस्ताडयति। हा
स्याः पुत्र दुष्टपारावत। तिष्ठ। तिष्ठ। यावदेतेन दंडकाष्ठेन सुपक्वमिव चूतफलं। अस्मात् प्रासादात् भूमौ पात
यिष्यामि। कथं पारावतं पश्यति। मां न प्रेक्षते भवतु। अपरया लोष्टगुटिकया पुनरपि ताडयिष्यामि। कथं। कुं
भीलक! तत् यावदुपसर्पामि। अरे कुंभीलक। प्रविश। स्वागतं ते। आर्य वंदे। अरे। कुत्र त्वं ईदृशे दुर्दिने अंध
कारे आगतः। अरे। एषा सा। का एषा का। एषा। सा। किमिदानीं दास्याः पुत्र। दुर्भिक्षकाले वृद्धरुक्ष ऊर्ध्वं
श्वासायसे एषा सा सेति। अरे। त्वमपि इदानीं ईदृग्मदकामुकस्य सुष्ठु किं काकायसे काकेति तत् कथय

भवतु एवं भणिष्यामि अरे प्रश्नं ते दास्यामि। अहंते मस्तके पादं दास्यामि। अरे जानीहि तावत् तेनहि क
स्मिन्काले चूताः मुकुलवंतोभवंति। अरे दास्याः पुत्र धीष्व। अरे नहि नहि। किमिदानीमत्र कथयिष्यामि। भवतु
चारुदत्तं गत्वा प्रश्यामि। अरे मुहूर्तकं तिष्ठ। भो वयस्य प्रक्ष्यामि तावत् कस्मिन् काले चूता उन्मुकुलाभवंति।
मूर्ख वसंते। द्वितीयेते प्रश्नं दास्यामि। सकलसमृद्धानां यामाणां कोरडां करोति। अरे रथ्या। अरे नहि नहि। भवे
तु संशये पतितोस्मि। भवतु चारुदत्तं पुनरपि प्रश्यामि अरे दासीपुत्र सेना। अरे हे अपि एकस्मिन्कुले शी
घ्रं भण। ननु परिवर्त्य भण। सेनावसंते अरे मूर्ख वटुक परे परिवर्तय। अरे अक्षर पदे परिवर्तय वसंतसेना। एषा
सा आगता। तत् यावत् चारुदत्तस्य निवेदयामि। भो चारुदत्त धनिकस्ते आगतः। यदि कुले नास्ति तत् द्वारे अ

स्ति एषा वसंतसेना आगता। यदि मे वचने न प्रत्ययसे तदेनं कुंभीलकं पृच्छ अरे दास्याः पुत्र कुंभीलक उपसर्प।
आर्ये वंदे। एषा सा आगता वसंतसेना। यावदार्यायानिवेदयामि। भो अपि जानासि किंनिमित्तं ईदृशो दुर्दिने
आगतेति। मया ह्यतं अल्पमूल्या रत्नावली बहुमूल्यं सुवर्णभांडं इति न परितुष्टा अपरं याचितुमागता।
भाव सुष्ठु ते भणितुं। एवं नेदं तत्कथं एषोपरः। भाव पश्य पश्य। एषोपरः। भाव एवं नेदं तस्य पश्य। भाव ए
वं तदेव एतद्गेहं। यद्वयाना ज्ञापयति। स्वस्ति भवत्ये। आर्ये वंदे स्वागतमार्यस्य। भाव एषा छत्रधारिका भावस्य ए
वं भवतु। आर्ये मैत्रेय कुत्र युष्माकं द्यूतकरः। आश्चर्यं भो द्यूतकरइति भणित्वा अलंकृतः प्रियवयस्यः हे भवति
एष खलु रत्नवाटिकायां। आर्ये का युष्माकं शकटवाटिका उच्यते। हे भवति यत्र न खाद्यते न पीयते त

नस्मात् प्रविशतु भवती। अत्र प्रविश्य किं मया भणितव्यं द्यूतकर, अपि शकारस्ते प्रदोषइति। अपि पारयिष्यामि। अव सरएव तो पारयिष्यति प्रविशतु भवती। अपि द्यूतकर शकारस्ते प्रदोषः इहासने उपविशतु भवती। यद्वानासापय ति। आर्य मैत्रेय तिष्ठ त्वं, अहमेवार्यां शकारमुपधिष्यामि। भो वयस्य प्रयत्स्यामि तावत्तव भवती। किमपि। अथ किं निमि त्तं पुनरीदृशे प्रनष्ट चेष्टालोके दुर्दिनांधकारे आगता भवती। आर्ये उज्जयिनो ब्राह्मणः। ननु निपुणइति भण। एषा खलु आर्या एवं प्रभुभागता कियत्तस्याः रत्नावल्या मूल्यमस्मिति। भो, भणितं मया, यथा अल्पमूल्या रत्नावली। बहुमू ल्यं न परितुष्टा अपरं याचितुमागता। सा खलु आर्याया आत्मनः कृते इति गणित्वा द्यूतेहारिता, सच सशीकः राजावश्यकारी। न ज्ञायते कुत्र गतइति। हे भवति मंत्रितमेव मंत्र्यते। यावत्सोन्विष्यते तावदेव गृह्यतां सुवर्णभांडं

अतिमात्रमार्यो निर्ध्यायति; तत्किं दृष्टपूर्वस्ते। हे भवति, शिल्पकुशलतया अवबध्नाति दृष्टिं आर्य वंचितोसि दृ ष्ट्वा, तदेवदं सुवर्णभांडं। भो वयस्य, तदेवदं सुवर्णभांडं यस्माकं गृहे चौरैरपहृतं। भो वयस्य, सत्यं, शपामि ब्राह्म णेन। भो, पृच्छा ननु कुतइदं समासादितमिति। एवमिव। एवमिव। एवमिव आर्य अथकिं। अतएव काम्यसे। भो भले, अ तिमात्रसंतापितेन हे भवति, समर्प्यतां मम स्नानशाटिका। आर्य चारुदत्त, युक्तमेतदं, अनया रत्नावल्या इमं जनं तुल यितुं। चेटि, किं भवत्या इहैव सुप्तव्यं। आर्य मैत्रेय, अतिमात्रमिदानीं उद्यमात्मानं दर्शयसि। भो वयस्य एष खलु उत्तारयन्निव स्फरेकापविष्टं जनं पुनरपि विस्तारवारिधारासिः प्रविष्टः पर्जन्यः। हास्याः पुत्र, दुर्दिन, अनार्य इदा नीमसि त्वं यदेवं भवतीं विद्युता भीषयसि। कथमद्यापि आर्यो न विबुध्यते। भवतु प्रविश्य प्रतिबोधयिष्यामि उत्ति

स्तिष्ठतु उत्तिष्ठतु आर्या प्रभातं संवृत्तं। कथं रात्रिरेव प्रभातं संवृत्तं। अस्माकमेतत्प्रभातं आर्यायाः पुनरात्रिरेव। चेटि कुतः पुनर्युष्माकं द्यूतकरः। आर्ये वर्धमानकं समादिश्य पुष्पकरंडकं जीर्णोद्यानं गत आर्यचारुदत्तः। किं समादिश्येत्यादि पूर्ववत्। योजय रथो प्रवहणं वसंतसेना गन्तुमिति। चेटि कुत्र मया गंतव्यं। आर्ये यत्र चारुदत्तः। चेटि सुष्ठु न निर्ध्यातोऽयो तरय्य प्रत्यक्षं प्रेक्षिष्ये। चेटि किं प्रविष्टा अहमिहाभ्यंतरचतुःशालं। न केवलं आर्यचारुदत्तचतुःशालकं सर्वजनस्यापि हृदयं प्रविष्टा। अपि संतप्यते चारुदत्तस्य परिजनः। संतप्स्यति। कदा यदा आर्या गमिष्यति। तदा मया प्रथमं संतप्तव्यं चेटि गृहाण इमां रत्नावलीं मम भगिन्यै आर्यायै धूतायै गत्वा समर्पय। तथेत्युक्त्वेच्च अहं श्रीचारुदत्तस्य गुणनिर्जिता दासी। तदा युष्माकमपि तदेषा तवैव कंठाभरणं भवतु रत्नावली आर्य। १५५

कुपिष्यति चारुदत्त आर्यायै तावत् गत्वा न कुपिष्यति। यदाज्ञापयसि। आर्ये भणति आर्या धूता आर्यपुत्रेण युष्माकं प्रसादीकृता न युक्तं ममेतां ग्रहीतुं आर्यपुत्रस्य ममाभरणविशेषदृष्टिं जानातु भवती। एहि वत्से शकटिकया क्रीड यावः। रदनिके किं ममेतया मृत्तिकाशकटिकया तामेव सुवर्णशकटिकां देहि। तात कुतोऽस्माकं सुवर्णव्यवहारः तातस्य पुनरपि कृत्वा सुवर्णशकटिकया क्रीडिष्यसि। तथावदिनोदयाम्येनं आर्या वसंतसेनायाः समीपमुपसर्पिष्यामि। आर्ये प्रणमामि। रदनिके स्वागतं ते। कस्य पुनरयं दारकः अनलंकृतशरीरोऽपि चंद्रमुखआनंदयति मम हृदयं। एष खलु आर्यचारुदत्तस्य पुत्रो रोहसेनो नाम। एहि मे पुत्रक आलिंगय। अनुरूपं अनेन पितृरूपं। न केवलं रूपं शीलमपि तर्कयामि एतेनार्यचारुदत्त आत्मानं विनोदयति। अथ किं निमित्तं एषरोदिति। एतेन प्रतिवेशिक

गृहपतिदारकैस्तया सुवर्णशकटिकया क्रीडितं,तेन चसा नीता।ततःपुनस्तो याचतोमया इयं मृत्तिकाशकटि
काकृत्वा दत्ता तदा भणति,रदनिके किं मम एतया मृत्तिकाशकटिकयातामेव सुवर्णशकटिकां देहीति।हा।
धिक्,हा धिक्, अयमपि नाम परसंपत्त्या संतप्यते।भगवन् कृतांत,पुष्करपात्रपतितजलबिंदुसदृशैः क्रीड
सि त्वं पुरुषाभागधेयैः।तात,मा रोदिहि,सुवर्णशकटिकया क्रीडिष्यसि।रदनिके,कारणात्ते पितुर्गुणानि
र्जिता दासी।तात,आर्या ते जननी भवति।रदनिके,अलीकं त्वं भणसि,यद्यस्माकं आर्या जननी,तत्कि
मर्थं अलंकृता,तात,मुग्धेन मुखेनातिकरुणं मंत्रयसि।एषा इदानीं ते जननी संवृत्ता।तत् गृहाणेतं अ
लंकारं,सुवर्णशकटिकाकारय।अपेहि,न गृहीष्यामि,रोदिषि त्वं।तातेन रोदिष्यामि,गच्छ,क्रीड।तात,

कारय सोवर्णशकटिकां।रदनिके,रदनिके,निवेदय आर्यायै वसंतसेनायै,अपवारितं पक्षद्वारिके सज्जं भव
हणं तिष्ठति।आर्ये,एष वर्धमानको विज्ञापयति पक्षद्वारे सज्जं भवहणमिति चेटि,तिष्ठ मुहूर्तं,यावत् अ
हमात्मानं प्रसाधयामि।ही ही भोः,मयापि यानास्तरणं विस्मृतं।तत् यावत् गृहीत्वा आगच्छामि।एते
नासिकारंध्रकटुकावलीवर्दाः।भवतु,भवतु,भवहणेनैव गतागतिं करिष्यामि।चेटि,उपनय मे प्रसा
धनं,आत्मानं प्रसाधयिष्यामि।आज्ञप्तोस्मि राजश्यालकसंस्थानेनः स्थावरकः,भवहणं गृहीत्वा पुष्पकरंड
कं जीर्णोद्यानं त्वरितमागच्छेति।भवतु,तत्रैव गच्छामि।वहत,वलीवर्दा वहत।कथं ग्रामशकटैरुत्थो मार्गः,कि
मिदानीं अत्र करिष्यामि।अरे,अरे,अनुसरत।किं भणत,एष कस्य कृते भवहणइति,एष राजश्यालकसंस्था

नस्य कृते प्रवहणमिति । तत्क्षीघ्रमपसरत कथमेष अपरः । सशिकमिव मां प्रेक्ष्य सहसैव घूतपलायितइव घूतकरो
पवार्यात्मानं अन्यतोपक्रांतः । तत्कः पुनरेषः अथवा किं ममेतेतेन । त्वरितं गमिष्यामि । अरे अरे । याम्या । अपस
रत । अपसरत । किं भणत । मुहूर्तं तिष्ठ । परिचक्रयतेनं देहीतिअरे । अरे । राजश्यालसंस्थानस्य अहं सूरः चक्रप
रिवर्त्तिं रास्यामि । अथवा एष एकाकी तपस्वी, तदेवं करोमि एतं प्रवहणं आर्यचारुदत्तस्य वृक्षवाटिकायाः पश्चि
द्वारके स्थापयामि । एषोस्मि आगतः । आर्ये । नेमिशब्दइव श्रूयते तदागतः प्रवहणः चेटि । गच्छ । स्मरयति मे हृ
दयं, तदादिश पश्चद्वारं । एतु । एतु । आर्या । चेटि । विश्रम त्वं । यदार्या ज्ञापयति किं नेदं स्फुरति दक्षिणं लोचनं । १५७
अथवा चारुदत्तस्येव दर्शननिमित्तं प्रसंज्ञयिष्यति । अपसारिता मया शकटः । तत् यावत् गच्छामि भास्वत्

प्रवहणं । अथवा चक्रपरिवृत्या परिश्रांतस्य सभारं प्रवहणं प्रतिभासते भवतु । गमिष्यामि । यात । वृषभा । यात ।
अरेरे दौवारिका । अप्रमत्ताः स्वेषु स्वेषु गुल्मस्थानेषु भवत । एषोद्य गोपालदारको गुप्तीगंत्का । गुप्तिपालकं व्यापा
द्य । बंधनं भित्त्वा । परिभ्रष्टः अपक्रामति । तद्गृह्यंतां तद्गृह्यंतां । महान् नगर्यां संभ्रमः उत्पन्नः । तत् त्वरितं त्वरितं
गमिष्यामि । यात । वृषभा । यात ॥ आश्चर्यं । आनीतं मया यानान्तरेण । रदनिके । निवेदय आर्यायै वसंतसेनायै ।
अवस्थितं सज्जं प्रवहणं अधिरुह्य पुष्पकरंडकं नीलोत्पलानं गच्छतु आर्या । कथं नूपुरशब्दः । तदागता खल्वा
र्या आर्ये । इमौ नासिकारंध्रकंदकौ वलीवर्दौ । तत्रस्थतएव रोहतु आर्या । पादोत्कालचालितानां नूपुराणां विश्रां
तः शब्दः । आरूढंच प्रवहणं । तर्कयामि संप्रति आर्यया आरूढया भवितव्यं । तद्गच्छामि । यात । गोपा । यात । अ

तथा

रे रे० अरे जय० जयमान चंदनक० समं व्रजति नरपतिर्हृदयं च० बंधनं चापि अरे पुरस्तात् प्रतोलीद्वारे तिष्ठ त्वं; त्व
मपि पश्चिमे; त्वमपि त्वमपि दक्षिणे; त्वमपि उत्तरे। योपि एषप्राकारखंडः एतमभिरुह्य, चंदनेन समं गत्वा० अ
वलोकयामि एहि० चंदनक० एहि० इतस्तावत्। अरेरे वीरक० विरज० विशल्य० गोमांगार० दंडकाल० दंडधार प्रमुखाः
। आगच्छत विश्वस्यास्त्वरितं यात्रां लघु कुरुत लक्ष्मीर्येन न राज्ञः प्रभवति गोत्रांतरं गंतुं। अपिच। प्रयाणेषु० स
र्वासु० मार्गे० नगर्यां० आपणे० घोषे० तं० तं० अन्वेषयत त्वरितं० शंका वा जायते यत्र रे रे वीरक० किं दर्शयसि०
र्पणमि तावत् विश्वस्थं, भित्वा च बंधनकं कः स गोपालदारकं हरति कस्याष्टमोदिनकरः० कस्य चतुर्थश्च वर्तते १६८
चंद्रः० षष्ठश्च भार्गवगृहो० गृहिसुतः पंचमः कस्य; भण कस्य जन्मषष्ठोजीवो० नवमस्तथैव सुरसूतः० जीवति

चंदनके० कः स गोपालकं हरति। हे भट चंदनक० अपहरति कोपि त्वरितं चंदनक० शपामि तव त्वदर्थेन यथा अधो
दितरिनकरे गोपालक दारकः खुरितः पलायितइत्यर्थः। यात० गोपा० यात। अरे० रे० पश्यत० पश्यत; अपहारितं प्र
वहणं व्रजति मध्येन राजमार्गस्य एतं तावद्विचारय० कस्य० कुत्र प्रेषितं प्रवहणं। अरे० प्रवहणवाहक० मा तावदेतं प्र
वहणं वाहय कस्य कृतमेतत् प्रवहणं? कोवा इहारूढः? कुत्र वा व्रजति। एतत् खलु प्रवहणं आर्यचारुदत्तस्य कृतं,
इहार्या वसंतसेना आरूढा; प्रस्थानं पुष्पकरंडकं जीर्णोद्यानं क्रीडितुं चारुदत्तस्य निर्याति। एष प्रवहणवाहकोभव
ति; आर्यचारुदत्तस्य प्रवहणं वसंतसेनारूढा, पुष्पकरंडकं जीर्णोद्यानं नीयते इति। तद्गच्छतु। अनवलोकितएव? अथ
किं कस्य प्रत्ययेन? आर्यचारुदत्तस्य। कआर्यचारुदत्तः का वा वसंतसेना? येनानवलोकितं व्रजति। अरे० चारुदत्तं न

आर्य

जानासि? नवा वसंतसेनां? यदि आर्य चारुदत्तं, वसंतसेनां वा, न जानासि, तदा गगने ज्योत्स्नासहितं चंद्रमपि त्वं न जानासि। कस्तं गुणारविंदं शीलमृगांकं जनो न जानाति आपणदुःस्थमोक्षं, चतुःसागरसारं रत्नं। ह्रावेव पूजनीयौ, दृष्ट नगर्यां तिलकभूतौ च, आर्यो वसंतसेना, धर्मनिधिश्चारुदत्तश्च। जानामि चारुदत्तं, वसंतसेनां च सुष्ठु जानामि, अहं च राजकार्ये, पितरमपि अहं न जानामि त्वं चिंतापरः सेनापतीराज्ञः प्रत्ययितः; एतौ धारितौ मया वर्तावहै, अवलोकय। त्वमपि राज्ञः प्रत्ययितो बलपतिः; तस्मात्वमपि अवलोकय। मयावलोकितं, त्वयावलोकितं भवति। यत्त्वयावलोकितं, तत् राज्ञा पालकेनावलोकितं। अरे, उन्नामय धुरं। कथं आर्यकोगोपालदारकः, श्येन विनासितइव पक्षी, शाकुनिकस्य हस्ते निपतितः। एष अनपराधः शरणागतः; आर्यचारुदत्तस्य प्रवहणं



आरूढः; प्राणप्रदस्य मे आर्य शार्विलकस्य मित्रं; अन्यतो, राजनियोगः। तत्किमिदानीमत्र युक्तमनुष्ठातुं। अथवा, यद्भवतु तद्भवतु, प्रथममेवाभयं दत्तं। भीता भयप्रदानं दत्तः परोपकाररसिकस्य, यदि भवति, भवतु नाशस्तथापि खलु लोके गुणएव। दृष्टआर्यः, आर्या वसंतसेना। तत् एषा भणति; युक्तं नेदं सदृशं नेदं, यदहं आर्यचारुदत्तं अभिसर्तुं गच्छंती, राजमार्गे परिभूता। चंदनक, अत्र महान् संशयः समुत्पन्नः। कथं ते संशयः? संभ्रमघूर्णकंउत्सृज्य जातोसि यत्त्वया भणितं, दृष्टमया खलु आर्यः; पुनरार्या वसंतसेनेति। अत्रमे अप्रत्ययः। अरे कः अप्रत्ययस्तव? वयं दासिपुत्र्या अत्यंतभाषिणः, वसंत्यादीनि कुलदोषहितानि म्लेंछ जातिनामानीति बोध्यं मंत्रयामोभाषामहे दृष्टो दृष्टा वा आर्योवा आर्या वा। ननु अहमपि प्रलोकयामि; राजाज्ञा एषा; अहं राज्ञः प्रत्ययि

तः तत्किमहमप्रत्ययितः संवृत्तः। ननु स्वामिनियोगः। आर्य गोपालदारकआर्यचारुदत्तस्य प्रवहणमधिरुह्य अप
क्रामतीति, यदि कथ्यते, तदा आर्यचारुदत्तो राज्ञा शास्यते; तत्कोत्र उपायः। कर्णाटकलहप्रयोगं करोमि। अरे,
वीरक, मया चंदनकेन प्रलोकितं, पुनरपि तं प्रलोकयसि, कस्तं? अरे त्वमपि कः? पूज्यमानोमान्यमानस्त्वमा
त्मनोजातिं अनुस्मरसि। अरे, का मम जातिः? को भणतु। भणतु; अथवा न भणतु। जानन्नपि खलु जातिं तव
भणामि शीलविभवेन, तिष्ठतु मेमेव मनसि, किंच कपित्थेन भक्षेन। ननु, भणतु, भणतु। किं नेरं। शीलेशृगाल
कहस्तः पुरुषाणां कुरुकर्मसंस्थापनः, कर्तरीव्याप्तहस्तस्त्वमपि सेनापतिर्जातः। अरे चंदनक, त्वमपि मा
न्यमान, आत्मनः कृतां जातिं नस्मरसि। अरे, का मम चंदनकस्य चेटविशुद्धस्य जातिः? को भणतु। भणतु, २७०

भणतु। अरे, किं नेरं। अरे शृणु। जातिस्तव विशुद्धा, माता मेरी, पितापि ते पटहः, दुर्मुख करटकोघाता, त्वमपि
सेनापतिर्जातः अहं चंदनकश्चमंकारकः। तदा प्रलोकय प्रवहणं अरे प्रवहणवाहक, परिवर्तय प्रवहणं प्रलोकयिष्या
अरे, अहं त्वया विश्रब्धो, राजाज्ञप्तिं कुर्वन्, सहसा केशेषु गृहीत्वा पादेन ताडितः। तत् शृणु, रे; अधिकरणमध्ये य
दितं चतुरंगं न करोमि, तदा न भवामि वीरकः। अरे राजकुलं, अधिकरणं वा व्रज; किं त्वया शकनकसदृशेन
। गच्छ रे प्रवहणवाहक, गच्छ। यदि कोपि पृच्छति तदा भण, चंदनकवीरकाभ्यामवलोकितं प्रवहणं व्रजति।
आर्य वसंतसेने, इदं चाभिज्ञानं ते ददामि। आर्य। अत्रमया विश्वस्ता प्रत्ययिता, चंदनकमपि स्मरसि; ननु भ
णामि, एष तुभ्यः स्नेहस्य रसेन सुखसामः। अभयं तव ददातु हरो विष्णुर्ब्रह्मा रविश्च चंद्रश्च, हत्वा शत्रुपक्षं

मृ०ना० २७१

शंकनिशंकौ यथा हे चौ। अरे, निष्क्रामतोमम प्रियवयस्यः, शर्विलकः पृष्ठतएवानुलग्नोगतः भवेत्, अथानदंडधारको, वीरको, राजश्यालकारकोविरोधितः, तत्यावदहमपि पुनश्चारुदत्तपरिजनएतमेवानुगच्छामि। भोः, पश्य पश्य, पुष्पकरंडकजीर्णोद्यानस्य सम्मीकतो। भोः, इदमसंस्कारसमणीयं, शिलातलमुपविशतु भवान्। भणितोमया, वर्धमानक, वसंतसेनां गृहीत्वा लघु लघु आगच्छेति। यात, गोरुआ, यात। इदं तदुद्यानं यावदुपसर्पामि आर्यमैत्रेयं। प्रियं ते निवेदयामि, वर्धमानको मंत्रयति, आगतया वसंतसेनया भवितव्यं दासीपुत्र, किं चिरायितोसि। आर्य मैत्रेय, मा कुप्य, यानान्तरणं विस्मृतमिति कृत्वा, गता गतं कुर्वन् चिरायितोस्मि। किं निगडेनास्थाः पादो बद्धो, येन स्वयं नावतरति वसंतसेना, वसंतसेनः खल्वेषः। यदार्य आज्ञापयति आर्य अपनीतानि नि

न

२७१

गडानि। संगतस्तु निगडेपु एषोपि मुक्तः, सोऽहं वयं व्रजिष्यामः। हे अज्ञाः। कुरुध्वं धर्मसंचयं, नियं आगत ध्यान पट्टेन, विषमाइंद्रियचोराहरंति चिरसंचितं धर्मं। पंचेंद्रियाणियेनमारितानि, अविद्यांचमारयित्वा, गात्ररक्षितं, भयश्चाहंकारोमारितो, वध्यं स पुनः स्वर्गं गाहते। हे शिरोमुंडक, मुंडं मुंडितं, चित्तं न मुंडितं, किं मुंडितं। यस्य पुनश्च चित्तं मुंडितं, साधुः शुद्धः तस्य शिरोमुंडितं। गृहीतं कषायमिदं चीवरं, यावदिदं गृहीत्वा, द्यालकस्ते उद्यानं प्रविश्य, पुष्करिण्यां प्रक्षाल्य, लघु लघु अवतरिष्यामि। तिष्ठ, रे दुष्टश्रमणक, तिष्ठ। भो आश्चर्यं! एषराजश्यालकसंस्थानकआगतः। एकेन शिरुणा अपराधे कृते, अन्यमपि यत्र यत्र शिरुं पश्यति, तत्र तत्र नासिकोत्पीडा अपवाहयति, तस्मात् कुत्र अशरणः शरणं गमिष्यामि। अथवा भट्टारकएव बुद्धोमे शरणं। तिष्ठ, रे दुष्ट श्रमण

एक०तिष्ठ।आपानकमध्यप्रविष्टस्यापि रत्नमूलकस्य शीर्षे ते भंस्यामि।स्वागतं,असोहतु उपासक।विहून०पश्य० पश्य०आक्रोशति मां।उपासकइति मां भणति;किमहं नापितः।शृणु श्रमणक।त्वं धन्यस्त्वं पुण्यः।धन्यःपुण्यइति मां भणति;किमहं श्रावको०कोष्ठकावाः तस्मात् कथमेष इहागतःइदं चीवरकं ग्रहीतुं।अरे०दुष्ट श्रमणक०एतन्म मभगिनीपतिना सर्वोपानानां प्रवरं पुष्पकरंडोद्यानं दत्तं;यत्र तावत् शतशकाःशृगालाःपानीयं पिबंति;अहम पि प्रवरपुरुषोमनुष्यकः न स्वामिनत्व त्वं पुष्करिण्यां पुराणकुलित्थयूषसुवर्णानि उग्रगंधीनि चीवराणि प क्षालयसि।ननु त्वामेकप्रहारिकं करोमि कथं विद्वान् जानाति।उपासकएवं आचिर प्रव्रजितोहं।किमर्थं त्वं मा नमात्रएव न प्रव्रजितः।नमोबुध्धस्य अरे तिष्ठ तावत्;यावत् सम्प्रधारयामि।आत्मनोहृदयेन।पुत्रकहृदय०भद्रा

रक पुत्रक०एष श्रमणकः अपिनाम किं गच्छतु०किं तिष्ठतु०स्वयं नापि गच्छतु नापि तिष्ठतु।संप्रधारितुं मया हृदयेन सह;एतन्मम हृदयंभणति।मापि गच्छतु०मापि तिष्ठतु;मापि उच्छ्वसितु०मापि निःश्वसितु;इहैव कुटि ति पतित्वा म्रियतां।नमोबुध्धस्य०शरणागतोस्मि।ननु समयेन।तथा करंमं क्षिपतु;यथा पानीयं पंकाविलं न भवति।अथवा०पानीयं पुंड्रीकृत्य करंमं क्षिपतु।किं भणति।शरणं०शरणं०पुनरपि शरणं।सुष्ठु भावोभण ति।वनकुसुमविचित्रिताचभूमी०कुरबकशोकविनामिताश्चवृक्षाः।।द्रुमशिखरलतावलंबमाना०पनसफलानीव यानवालंबंति।।१।।एषोस्मि आसितइति।भगव०अद्यापि तां वसंतसेनां स्मरामि;दुर्जनवचनमिव हृदयान्नाव तरति।भगव कापि वेन्या स्थावरकचेटस्य गणिकस्य प्रवहणं गृहीत्वा लघुलघु आगच्छंति।अद्यापि नागच्छ

नीति। चिरमस्मि बुभुक्षितः। मध्याह्ने न शक्यते पादाभ्यां गंतुं तत् पश्य। पश्य॥ नभोमध्यगतेऽसूरो दुष्प्रेक्ष्यः कुपितवानरसदृक्षः। भूमीरुसंतप्ता। हतपुत्रशतेव गांधारी॥१॥ शिरसि मम निर्दयो। भानुः सूर्यरूप पारः। शकुनि खग विहंगा वृक्षशाखास्थलीनाः॥ नरपुरुषमनुष्यारीर्घमुष्णं श्वसंतो गृहशरणनिषण्णा आतपंचिर्वहंति॥२॥ भाव। अद्यापि स चेटः नागच्छति आलस्यो विनोदनिमित्तं किमपि गास्यामि। भाव। श्रुतं त्वया यन्मया गीतं कथं गंधर्वो न भविष्यामि। हिंगूज्जल्ला। जीरकाद्यमुस्था। चचायायंथिः। सगुडा शुंठी। एषा मया सेविता गंधयुक्ता। कथं नाहं मधुरस्वर इति। भाव। पुनरपि तावत् गास्यामि। भाव। भाव। श्रुतं त्वया यन्मया गीतं। कथं गंधर्वो न भवामि। हिंगूज्जलं। दत्तमरीचचू

र्णं व्याघारितं। तैलघृतैः मिश्रं। गुडेन मया। भारभृतीयमोरसं। कथं नाहं मधुस्वरइति। भाव। अद्यापि चेटोनागच्छति। भीतः खल्वहं। माध्यान्हिकः सूर्यः। देवोनी मां कुपितः राजश्यालसंस्थानको भविष्यति। तत् त्वरितं वहामि। यात। कृष्णा। यात। हा धिक्। हा धिक्। ने खलु वर्धमानकस्यायं स्वरसंयोगः किं नेदं। किं न खलु आर्ये चारुदत्तेन वाहनपरिश्रमं परिहरता। अन्योमनुष्यः। अन्यत् श्रवणं। नेषितं भविष्यति। स्फुरति। दक्षिणं लोचनं। वेपते मे हृदयं। शून्यादिशः। सर्वमेवविसंष्ठुलं पश्यामि। आगतं श्रवणं। किं न पश्यति भावः। हस्त्यरूकरइव घुरघुरायमाणं लक्ष्यते। पुत्रक स्थावरक। चेट। आगतोसि। अथकिं। श्रवणमपि आगतं। अथ किं। कृष्णोपि आगतो। अथ किं। त्वमपि आगतः। भट्टारक। अहमपि आगतः। तस्मात् प्रवेशय श्रवणं। कतरेण मार्गेण। एतेनैव प्राकार खंडेन। भट्टारक। कृष्णा म्रियते।

प्रवहणमपि भज्यते । अहमपि चेटोस्मि ये । अरे राजश्यालकोहं । वृषभा मृता अपरं क्रेष्यामि प्रवहणं । प्रवहणं भ
ग्नं अपरं कारयिष्यामि । त्वं मृतः अन्यः प्रवहणवाहको भविष्यति । सर्वं उपपन्नं भविष्यति । अहमात्मानः कृते न भ
विष्यामि । अरे सर्वमपि नश्यतु । भाकारखंडेन प्रवेशय प्रवहणं । विभंजे रे प्रवहणं समं स्वामिना विभंज । अन्यत् प्र
वहणं भवतु । भट्टारकं गत्वा निवेदयामि । कथं न भग्नं । भट्टारक उत्तदुपस्थितं प्रवहणं । ननु पुंश्चल्या जरद्गवेन मृ
ताः । त्वमपि न मृतः । अथकिं । भाव आगच्छ । प्रवहणं पश्यामः । भाव त्वमपि मे गुरुः । अथमगुरुः । वेश्यस्य सारकः
अभ्यंतरकइति । त्वं तावत् प्रवहणमयतोधिरोह । अथवा तिष्ठ त्वं । तव प्रकृतं प्रवहणं येन त्वमयतोधिरोहसि । अहं १७४
प्रवहणस्वामी अयतः प्रवहणमधिरोहामि । यद्यप्यहमेवं भणामि । तथापि तवैष आचारः । अधिरोहेति भट्टारकं भ

ट्टारकं भणितुं । एष संप्रतं अधिरोहामि । पुत्रक स्थावरक चेटपरिवर्तय प्रवहणं । अधिरोहतु भट्टारकः । भाव अहं त्वि
ये । प्रवहणाधिरूढा राक्षसी चोरोवा प्रतिवसति । तत् यदि राक्षसी । तदा उभावपि मुषितौ । अथ चोरः । तदा उभावपि
खादितौ । पुत्रक स्थावरक चेट जीवसि । अथकिं । प्रवहणांतः स्त्री प्रवसति । तदवलोकय । कथं मम नयनयोरायासकर
एव राजश्यालः । तत् संशयितास्मि । मंदभाग्या । एतर्हि इदानीं मम मंदभागिन्या ऊषरक्षेत्रपतितइव बीजमुष्टिः निष्फल
मिहागमनं संवृत्तं । तत्किमत्र करिष्यामि । कातरः खल्वेष वृद्धचेटः प्रवहणं नावलोकयति । भाव आलोकय प्रवहणं
कथं शृगालाउड्डयंते । वायसाव्रजंति । तत् यावत् भाव अस्थीयां भक्ष्यंते । दंतैः भक्ष्यंते । तावदहं पलायिष्ये । प्रवहण
विपर्यासेनागता । शरणागतास्मि । यदि राक्षसी प्रतिवसति । तत्किं नत्वां मुष्णाति । अथवा चोरः तदा किं त्वं न भक्षि

तः। एवं कृते किं भवति। एवं भवतु। स्थावरक चेट, नय भवहणं; अथवा, तिष्ठ, तिष्ठ। देवतानां ब्राह्मणानां चायतः चरणेन गत्वामि। नहि, नहि, भवहणमधिरुह्य गत्वामि। येन दूरतो मां प्रेक्ष्य भणिष्यति, एष स राष्ट्रियश्यालोभद्वारकोगच्छति। शांतं, पापं, प्रतिहतममंगलमिति। मां भवत्पुरुषमनुष्यं वासुदेवाकं। तेन हि अपूर्वश्रीः समासादिता। तस्मिन् काले मया रोषिता; साधतं पादयोः पतित्वा प्रसारयामि। एष पादयोः पतामि। हे मातः, अंबिके, शृणु मम विज्ञप्तिं। एष पतामि चरणयोर्विशालनेत्रे, हस्ताजलिं दशनरुचं नव शुक्ल दंतिः॥ यत्तन्मया अपकृतं मदनातुरेण, तत्क्षामितासि, शरणार्थिः तवास्मि दासः॥१॥ अपेहि, अनार्ये मंचयसि॥ यच्चुंबितं अंबिकामातृकाभिः, गंधं न देवानामपि यत्प्रणामं॥ तत्सांप्रतं पादतलेन मुंड, वने शृगालेन यथा मृतांगं॥१॥ अरे स्थावरक चेट, कुत्र त्वया

एषा समासादिता। भट्टक, ग्रामशकटैरुत्थे राजमार्गे, तरा चारुदत्तस्य रथवाटिकायां भवहणं स्थापयित्वा, नत्रावतीर्य, यावत् चक्रपरिवृत्तिं करोमि, तावदेषा भवहणविपर्यासेन हास्यति इति तर्कयामि। कथं भवहणविपर्ययेणागता, नमाम्यहं शीलितुं; तरवतर, अवतर, मम रुतात् भवहणात्। त्वं तं दरिद्रसार्थवाहपुत्रकमभिसारयसि, मदीयान् रथभान् वाहयसि, तदवतर, अवतर, गर्भदासि, अवतर, अवतर। तमार्य चारुदत्तमभिसारयसीति; यत्सत्यं, अलंकृतास्मि अमुना वचनेन। संप्रतं च यद्भवतु, तद्भवतु। एताभ्यां ते दशनरोचत्कलमंडलाभ्यां, हस्ताभ्यां, चादुशतताडनक्षमाभ्यां॥ कर्षामि तव चरतनुं निजयानका, केशेषु, वालिह्यितामिव यथा जरायुः॥२॥ योसौ मम वचनावमानेन तरा रोषाग्निः सिंधुक्षितः, अथ एतस्याः पादप्रहारेणानेन प्रज्वलितः, तत्सांप्रतं मारयाम्येनां। भवतु

एवं तावत्। यदीच्छसि लंबदशाविशालं आवारकं सूत्रशतेर्युक्तं, मांसं चरवादितुं, तथा तुष्टिं कर्तुं, चुहू चुहू चुक्कु चुहू चुहू इति। मम प्रियं कुरु। अकार्यस्य गंधोपि नास्ति, राक्षसी कापि नास्ति। मारय वसंतसेनां। अहं ते उडुपं दास्यामि। अन्यच्च, विविक्ते उद्याने इह मारयंतं कस्त्वां प्रेक्षिष्यते। तेन हि परांतरं वारितो रुत्वा, मारय। अधर्मभीरुरेष वृत्तश्रेष्ठगालः। भवतु; स्थावरकं चेटं मनुनयामि। पुत्रक, स्थावरक, चेट; सुवर्णकंटकानि दास्यामि। अहमपि परिधास्यामि। सोवर्णं ते पीठकं कारयिष्यामि। अहमपि उपवेक्ष्यामि। सर्वं ते उल्लिष्टं दास्यामि। अहमपि खादिष्यामि। सर्वचेटकानां महत्तरकं कारयिष्यामि। भट्टको भविष्यामि। तन्मन्यस्व मम वचनं। भट्टक, सर्वं करोमि, वर्जयित्वा अकार्यं। अकार्यस्य गंधोपि नास्ति। भणतु भट्टकः। एनां वसंतसेनां मारय। प्रसीदतु भट्टकः। इयं मया ॥ १७६ ॥

नार्येण आर्या प्रवहणपरिवर्तेनानीता। अरे चेट, तथापि नश्यामि। अभवति भट्टारकः शरीरस्य, न चारित्र्यस्य; तत्प्रसीदतु, प्रसीदतु भट्टकः; विभेमि खल्वहं। त्वं चेटो मम भूत्वा कस्मात् विभेषि। भट्टारक; परलोकात्मकः स परलोकः। भट्टक, सुकृतदुष्कृतस्य परिणामः। कीदृशः सुकृतस्य परिणामः। यादृशो भट्टको बहुसुवर्णमंडितः। दुष्कृतस्य कीदृशः। यादृशोहं परपिंडभक्षकोभूतः। तत् अकार्यं न करिष्यामि। अरे न मारयिष्यसि। ताडयतु भट्टकः; मारयतु भट्टकः; अकार्यं न करिष्यामि। येनास्मि गर्भदासो विनिर्मितो भागधेयदोषैः; अधिकं च न क्रीडिष्यामि, तेनाकार्यं परिहरामि। शरणागतास्मि। अधर्मभीरुको वृत्तश्रेष्ठगालः; परलोकभीरुरेष गर्भदासः; अहं राष्ट्रियशृगालः कस्य बिभेमि, वरपुरुषमनुष्यः; अरे गर्भदास, चेट, गच्छ त्वं; अयि अपवा

रके प्रविश्य, विश्रांत एकांते तिष्ठ। यत् भर्ता आज्ञापयति। एतावान् मे विभवः। तिष्ठ, वसंतसेने, तिष्ठ; मारयिष्यामि। भावो भद्रकं मारयति। सर्वकालं मया पुष्टो मांसेन च घृतेन च; अद्य कार्ये समुत्पन्ने, जातो मे वैरिकः कथं॥१॥ भवतु; लब्धो मया उपायः। दत्ता वृत्यरगालेन शिरश्छेदनसंज्ञा। तदेनं श्रेष्ठ, वसंतसेनां मारयिष्यामि; एवं तावत्। भाव, यत् त्वं मया भणितः, तत्कथमहं वृहत्तरैः पत्रपुरप्रमाणैः कुलैर्जातः अकार्यं करोमि? एवमेतद्गीकारयितुं मया भणितं। एषा तवायतोलज्जते; न मामंगीकरोति। तद्दुष्टः स्थावरकचेटकैः मया ताडितः गतोपि एष अपलोक्य गच्छति। तस्मात्तं गृहीत्वा, आगत्य तु भावः। अनु भणामि, शरणागतास्मि। एवं मम हस्ते एषा न्यासेन तिष्ठतु। सत्यं भवतु, मारयिष्यामि। अथवा; कपटकापटिकए

ष आत्मनः वृत्यरगालः, कस्यापि अपवारितशरीरोगत्वा, शरगालोभूत्वा, कपटं करोति; तदेतस्य करोमि वंचनानिमित्तं एवंतावत् करिष्यामि। हे वाले, हेवाले, वसंतसेने, वसंतसेने, एहि। रुवणं ददामि। भक्खं ददामि, पत्तामि। शीर्षेण सवेष्टनेन, तथापि। नेच्छसि मां शुनकं, किं सेवकं कष्टमयामनुष्याः। कोत्र संदेहः, अपिच। सहकारपारपं सेवित्वा, न पलाशपारपमंगीकरिष्यामि। दास्याः पुत्रि! हरिश्चारुदत्तकः सहकारपारपः कृतः, अहं पुनः पलाशोभणितः, किं शंकोपि न रुतः। एवं त्वं मह्यं गालीं ददती, अद्यापि तमेव चारुदत्तकं स्मरसि हृदयगतत्वं किमिति नस्मर्यते। अद्यापि ते हृदयगतं, त्वां समभेव मोटयामि। तद्धरिद्रसार्थवाहकमनुष्यकामुकि, तिष्ठ, तिष्ठ। भण, भण पुनरपि, श्लाघनीयानि अक्षराणि। परित्रायतां दास्याः पुत्रः चारुदत्तकः त्वां परित्रायते यदि

मां प्रेक्षते। किं सशक्रो वालिपुत्रो मेघेंद्रो रंभापुत्रः कालनेमिः सुबंधुः रुद्रो रामा द्रोणपुत्रो जरायुः चाणक्यो वा धुंधुमारः त्रिशंकुः। अथवा एते पि त्वां न रक्षंति॥ चाणक्येन यथा सीता मारिता भारते युगे॥ एवं त्वां मारयिष्यामि जटारि वे द्रौपदीं॥१॥ हा मातः कुत्रासि! हा आर्य चारुदत्त! एषजनः असंपूर्णमनोरथएव विपद्यते तदूर्ध्वमाक्रंदिष्यामि; अथवा न संतसेना ऊर्ध्वमाक्रंदतीति लज्जनीयं; रक्षेतत् नमः आर्य चारुदत्तस्य। अद्यापि गर्भदासी तस्येव पापस्य नाम गृह्णाति। सर गर्भदासी स्मर। नमः आर्य चारुदत्तस्य। म्रियतां गर्भदासि म्रियतां॥ एतां दीपकरंडिकामधिनैस्थावासभूतां रक्तां तस्य किलागतस्य रमणे कालागतामागतां;॥ किमेष समुराहरामि निजकं बाहोः शरत्वं॥ निश्वासेपि म्रियते इयंच सुमृता यैथो सीतो भारते इत्युक्तं मां नेत्युसीति गणिका रोषेण मे मारिता;॥ शरत्ये पुष्पकरंडके इति सहसा पाशेन

उच्छासिता। सेवावंचितभ्रात्रके मम पिता मातेव सा द्रौपदी। यस्याः पश्यति नेदृशं व्यवसितं पुत्रस्य शरत्वं। भवतु संप्रतं वृद्धशृगालः आगमिष्यतीति; ततः अपसृत्य तिष्ठामि। स्वागतं ते; पुत्रक, स्थावरक तवापि स्वागतं। अथ किं कीदृशोन्यासः। गता भावस्येव पृष्ठतः त्वं गतमया दिशा गतः। सापि दक्षिणया गता सापि उत्तरया। शपामि भावस्य शीर्षं आत्मनः हताभ्यां पाराभ्यां, ततः संस्थापयत्वदृश्यं एषा मया मारिता। यदि मम वचनेन न प्रत्ययसे, तत्पश्य प्रथमं राष्ट्रियरथालंस्थानस्य शरत्वं। ही ही उपरतो भावः। समाश्वसितु समाश्वसितु भावः अविचारितं ग्रहणमानयता एव मया प्रथमं मारिता। अरे वसंतसेनां स्वयमेव मारयित्वा मां दूषयित्वा कुत्र पलायसे; संप्रतमीदृशोहं अनाथः प्राप्तः। अर्धं शतं ददामि सुवर्णं ते, कहापणं ददामि सर्वेष्टिकं ते; एषदुःशासनो फल्गुको मे, सामान्यकोभवतु मनुष्यकाणं शांतं पापं। भाव, प

सीर॰ प्रसीद; एहि सरस्यां प्रविश्य क्रीडावः। मदीयपुष्पकरंडकं जीर्णोद्याने वसंतसेना मारयित्वा कुत्र पलायसे? एहि॰ मम आयुक्तस्यायतोव्यवहारं देहि। किंरे भीतोसि तद्गत्वा निधनं गत्वा। अरे स्थावरक पुत्रक कीदृशं मया कृतं? भट्टक॰ महदकार्यं कृतं। अरे चेट॰ किं भणसि॰ अकार्यं कृतमिति? भवतु॰ एवं तावत् गृहाणेमं मम लंकारं; मया तावद्गत्वा॰ यावत्यां वेलायां अलंकरोमि तावतीं वेलां त्वमात्मानमलंकुरु। भट्टके॰ एव एते शोभंते; किं मम एतैः? तदा गत्वा॰ एतान् शुभान् गृहीत्वा॰ मदीयायां प्रासादवाल्यायंयतोलिकायां तिष्ठ॰ यावदहमागत्यामि। यद्भट्टक आज्ञापयति। आत्मपरित्राणे भावो गतः अदर्शनं चेटमपि प्रासादवाल्यायंयतोलिकायां निगडपूरितं कृत्वा स्थापयिष्यामि। एवं मंत्रोरक्षितोभवति। तद्गच्छामि; अथवा॰ पश्यामि तावदेनां किमेषा मृता अथवा पुनरपि मारयिष्यामि। कथं सुमृता। भवतु; एतेन प्रावरकेण प

त्वादयाम्येनां; अथवा। नामांकितएषः तत्कोपि आर्यपुरुषः प्रत्यभिज्ञास्यति। भवतु; एतेन वातालीपुंजितेन शुष्कपर्ण पुटेन त्वादयामि। भवतु॰ एवं तावत् संप्रतं अधिकरणं गत्वा व्यवहारं लेखयामि; यथा अर्थस्य कारणाय सार्थवाहकचारुदत्तकेन मदीयं पुष्पकरंडकं जीर्णोद्यानं प्रविश्य वसंतसेना व्यापादितेति। चारुदत्तविनाशाय करोमि कपटं नवं नगर्यो विशुद्धायां पशुघातमिवदारुणमविरमादिके! येन येन गत्स्यामि मार्गेण॰ तेनैवएष दुष्टश्रमणको गृहीतकषायोदकं चीवरं गृहीत्वा आगत्य इति; एष मया नसि क्षिप्त्वा वाहितः सुतेयेः कदापि मां प्रेक्ष्य॰ एतेन मारितेति प्रकाशयिष्यति; तत्कथं गत्स्यामि। भवतु एतं अर्धपतितं प्राकारखंडमुत्क्षिप्य गत्स्यामि एषोहं त्वरितं तुलितः लंकानगर्यो गमने गत्वन्। भूम्यां पाताले हनूमच्छिखरेइव महेंद्रः प्रक्षालितमेतन्मया चीरखंडं; किं नुखलु शारिकायां शुष्कं करिष्यामि। इहयानराक्षिप्यंति। किं नुख

लुप्तभूम्यां धूलीदोषोभवति; तत्कुत्रचत्रसार्य शुष्कं करिष्यामि। भवतु इह वातालीपुंजिते शष्कपत्रसंचये प्रसारयिष्यामि, नमोबुध्यै भवतु, धर्मोपरागणि उदाहरामि। अथवा; अलममेतेन स्वर्गेण, यावत्तस्यावसंतसेनायाबुधोपासिकायाः प्रत्युपकारं नकरोमि, यया दशानां सुवर्णकानां कृते चूलकराद्यांनिष्क्रीतः; ततः प्रभृति तया क्रीतमियात्मानमवगत्स्यामि। किंनु खलु पर्णोदरे समुत्क्षिप्तिः? अथवा॥ वातातपेन तप्तानि, चीवरतोयेनार्द्राणि पत्राणि॥ एते विस्तीर्णपत्राः मन्ये पत्रा इव स्फुरंति॥१॥ रक्तधाल्लंकारभूषितः स्त्रीहस्तोनिष्क्रामति! कथं; द्वितीयोपि हस्तः प्रत्यभिजानामि इव एतं हस्तं। अथवा, सत्यं; सएव हस्तः येन मे अभयं दत्तं। भवतु, पश्यामि सेयबुधोपासिका। कथमुदकं याचते। दूरे चहीर्घिका। किमिदानीमत्र करिष्यामि? भवतु, एतत् चीवरं अस्या उपरि चालयिष्यामि। आर्य, कस्त्वं? किंमां नस्मरसि बुधोपासि

१८०

का, दशस्वर्णनिष्क्रीतं। स्मरामि न पुनर्यथा आर्योभणति, परमहमुपरता एव। बुधोपासिके किंनेदृं। यत्सदृशं वेशमावस्य। उत्तिष्ठतु, उत्तिष्ठतु, बुधोपासिका एतां पादपसमीपजातां लतामवलंब्य। एतस्मिन् विहारे ममधर्मभगिनी तिष्ठति, तत्र समाश्वस्तमनाभूत्वा उपासिका, गेहं गमिष्यति। ततः शनैः शनैर्गच्छतु बुधोपासिका। अपसरत आर्यो, अपसरत, एषा तरुणी स्त्री, एषगिरिसुरिति, धर्मो ममएषधर्मः; हस्तसंयतमुखसंयतेंद्रियसंयतः, स खलु मनुष्यः, किं करोति तस्य राजकुलं परलोकोहस्ते निश्चलइति। आज्ञप्तोस्मि अधिकरणभोजकैः; अरे शोधनक, व्यवहारमंडपं गत्वा, आसनानि संस्कुरु इति। तत् यावदधिकरणमंडपं सज्जितुं गच्छामि। इदमधिकरणमंडपमेषोहं प्रविशामि। विविक्तं कारितं मयाधिकरणमंडपं, विरचितानि च मयासनानि; तत् यावदाधिकरणिकानां

निवेदयामि। कथमेषराष्ट्रियश्यालो दुर्जनमनुष्यइतएवागच्छति; तद्दृष्टिपथं परिहृत्य गमिष्यामि। स्नातोहं सलिलज
लैः पानीयैः, उद्याने उपवनकानने निषण्णः; नारीभिः सह युवतीभिः स्त्रीभिः; गंधैर्वैः सुविहितेः अंगके॥ क्षणेन ग्रंथिः
क्षणं जूटकोमे, क्षणेन मे चंचलकुंडलावा॥ क्षणेन मुक्ताः क्षणमूर्ध्वचूडा, चित्रविचित्रः अहं राजश्यालः॥१॥अ
पिच। विषयंथिगर्भप्रविष्टेनेव कीटकेनांतरं मार्गमाणेन, त्रासं मया महदंतरं; तत्कस्येदं कृपणचेष्टितं पाल
यिष्यामि आं, स्मृतं हरिद्दारुदत्तस्य संभाव्यते। भवतु, अधिकरणमंडपं गत्वा, अथतोव्यवहारं लेखयिष्या
मि, यथा चारुदत्तेन वसंतसेना मोचयित्वा मारिता; तत् यावदधिकरणमंडपमेव गत्वागमि। एततदधिकरणमं
डपमत्र प्रविशामि। कथमासनानि दत्तानि तिष्ठंति; तावदागच्छंति अधिकरणभोजकाः एतस्मिन् दूर्वा चत्वरे

OR BHAU DAJI

मुहूर्तमुपविश्य प्रतिपालयिष्यामि। एवे अधिकरणिका आगच्छंति, तत् यावदुपसर्पामि। आज्ञापयतु आर्यः। आर्य
स्यापि नाम गुणे दोषइति उच्यते यद्येवं, तदा चंद्रालोकेपि अंधकारइति उच्यते। एतु, एतु, अधिकरणभोजकएतु
। एतत् अधिकरणमंडपं, तत्प्रविशंतु अधिकरणभोजकाः। यदार्य आज्ञापयति। आर्या आधिकरणिकाभणं
ति, कः कइह कार्यार्थीति। उपस्थिताअधिकरणिकाः अह, वरपुरुषमनुष्यः वासुदेवः राष्ट्रियश्यालः राजश्यालः
कार्यार्थी। हंत प्रथममेव राजश्यालः कार्यार्थी भवतु; आर्य, मुहूर्तं तिष्ठ, तावत् अधिकरणिकानां निवेदयामि।
आर्या एष खलु राष्ट्रियश्यालः कार्यार्थी व्यवहारमुपस्थितः। यदार्य आज्ञापयति। आर्य, अधिकरणिकाभणं
ति, अद्य गच्छ, नदृश्यते तव व्यवहारः। किं नदृश्यते मम व्यवहारः? यदि नदृश्यते, तदा आवृत्तं राजानं पाल

भीत

कं भगिनीपतिं विज्ञाप्य, भगिनीं मातरं च विज्ञाप्य, एतमाधिकरणिकं दूरीकृत्यान्यमाधिकरणिकमत्र स्थापयिष्यामि
। आर्य, राष्ट्रियश्यालः, मुहूर्तं तिष्ठ तावत् आधिकरणिकानां निवेदयामि, एष राष्ट्रियश्यालः कुपितो भणति। आर्य, आ
धिकरणिका भणंति, आगत्य प्रथमं भण्यंते न दृश्यते, सांप्रतं दृश्यते; इति तत् नाम भीता आधिकरणिकाः; या
वदहं भणिष्यामि, तावत्स्थेष्यंते। भवतु, प्रविशामि। कथं सुखं अस्माकं युष्माकमपि सुखं दद्मि, न ददामि च। अहो; आ
सीया भूमेषा भूमीः; यत्र मह्यं रोचते तत्रोपविशामि। एष उपविशामि। ननु अत्रोपविशामि। एष उपविशामि। अथ किं
कर्णे कार्ये कथयिष्यामि। एतावद्वृत्तके महत्कमाणस्य कुले अहं जातः। राजश्वशुरोमम पिता राजा मातुलस्य भवति १५२
जामाता, राजश्यालोहं, ममापि भगिनीपती राजा। एवं भणामि। अपराधस्यापि न च मे किमपि करिष्यति; ० ततस्ते

न भगिनीपतिना परितुष्टेन मे क्रीडितुं रक्षितुं सर्वोद्यानानां प्रवरं पुष्पकरंडकजीर्णोद्यानं दत्तं, तत्र चावेक्षितुं अनुदि
वसं शृङ्गं कारयितुं, शोधयितुं, पुष्टं कारयितुं, स्नानं कारयितुं, गत्वागतो दैवयोगेन पश्यामि, न पश्यामि वा, स्त्री
शरीरं निपतितं। अधिकरणिकाः, किमिति नज्ञायते तां तादृशीं नगरमंडनं कांचनशतभूषणां। केनापि कुपुरु
षेण अर्थकल्यवर्तस्य कारणात्, शून्ये पुष्पकरंडकजीर्णोद्याने प्रविश्य बाहुपाशबलात्कारेण वसंतसेना मारिता, न म
या। यदार्य आज्ञापयति। आर्य, लिखिते। किमर्थं, तरां कुर्वाणेनैव पायसपिंडकेन, अथ मया आत्मा एव निर्भाशितः।
भवत्येवं तावत्। अधिकरणिकाः, ननु भणामि मया एव दृष्टा; किं कोलाहलं कुरुत। हंहो; नूनं मोपस्थानया गोपा
लिकया निःसुवर्णकैः राजकणस्थानैः तर्कयामि युज्यतेऽत्र। दिष्ट्या प्रत्युज्जीवितोस्मि। गो कमेषव्यवहारो वर्तते; कोऽ

शेो: तस्मात् वसंतसेनामातरमवलंबते व्यवहार:। एतु एतु आर्या गता मे दारिका मित्रगृहं आत्मनोयोवनमनुभवितुं: ए
ष पुनरर्घायुर्गणति, आगत्य अधिकरणिकं आकृषति; तन्मोहपरवशमिवात्मानमवगच्छामि, हृदयं मे प्रकंपते। आदि
श महं अधिकरणमंडपस्य मार्गं। एतु एतु आर्या। एष अधिकरणमंडप:। अत्र प्रविशत्वार्या सुखं युष्माकं भवतु भावमिश्रा
णां। आगतासि हृत्वकुरुते, आगतासि! अथकिं मित्रगृहं। अतिलज्जनीयं खलु इदं। अनयत्वनीयोयमर्थ: न पुनराधि
करणिकस्य। व्यवहार: पृच्छति, नास्ति दोष:, कथय। कथं व्यवहारो यद्येवं, तदा शृण्वंतु आर्यमिश्रा: स खलु सार्थवाहवि
नयदत्तस्य नप्ता सागरदत्तस्य तनय: सुग्रहीतनामधेय: आर्यचारुदत्तो नाम, श्रेष्ठिचत्वरे प्रतिवसति, तत्रमे दारिका २८२
योवनसुखमनुभवति। श्रुतमार्यै: ? लिख्यतामेतान्यक्षराणि, चारुदत्तेन सह मम विवादे। चारुदत्तो मित्रमिति नास्ति

दोष:। एवमिव। यदार्य आज्ञापयति। एतु एतु आर्य: एतु एतु आर्य: एतु एतु आर्य:। एतु एतु आर्योधिकरणमंडपं प्र
विशत्वार्य:। इदमासनमत्रोपविशत्वार्य:। आगतोसि रे स्त्रीघातक आगतोसि रे। अहो न्याय: व्यवहार:, अहो धर्म्म व्यवहा
र:, यदेतदन्यस्य स्त्रीघातकस्य आसनं दीयते स गर्वो भवतु, ननु दीयतां। तात चिरं मे जीव। अयं स चारुदत्त:, सुनिश्चि
तं खलु दारिकया योवने लज्जया, अथवा भीरुतया वा, चारित्रं अलीकं निगृहितं, स्वयं स्त्रीं मारयित्वा अर्थकारणा
य निगूहति न तत भट्टक:। आर्य चारुदत्त, भण: अलं लज्जया, व्यवहार: खल्वेष:। अरे मया सह व्यवहार:। अरे स्त्री
घातक: तां तादृशीं रत्नशतभूषणां वसंतसेनां मारयित्वा, साम्प्रतं कपटकापटिकोभूत्वा निगूहसि। कथं गता, कदा ग
ता? गच्छंती वा केन अनुगता? आर्य कथय। मदीयं पुष्पकरंडकजीर्णोद्यानं प्रवेश्य अर्थनिमित्तं बाहुपाशावलोकारे

ण मारिता। अये संप्रति वरसि गृहं गतेति। किं पक्षपातेन व्यवहारोदृश्यते। किं पक्षपातेन व्यवहारोदृश्यते। हताश। यद्
दानीं न्यासीकृतं सुवर्णभांडं रात्रौ चौरैरपहृतमिति। तस्य कारणात् चतुःसमुद्रसारभूतो रत्नावली ददानि। सइदानीं
अर्थकल्पवृक्षस्य कारणात् इदमकार्यं करोति। हा जाते। एहि मे पुत्रीति। पादप्रहारपरिभवविमाननाबंधगुरुवेरस्य।
अनुशोचतइयं कथमपि रात्रिः प्रगा ता मे॥१॥ तद्यावदधिकरणमंडपमुपसर्पामि। शर्विलकमार्यमिश्राणां हो। किम
ये। बंधनमोदनसंभ्रमे आर्यकमन्वेषयन्। अपवारितं प्रवहणं व्रजन्तिनी विचारं कुर्वन् अन्वेषयन्। अरे त्वयापि
आलोकितं मयाप्यालोकितव्यमिति भणनेव चंदनमहत्तरकेण पादेन ताडितोस्मि। एतच्छ्रुत्वा आर्यमिश्राः प्रमा
ण्। अस्य चारुदत्तस्य वसंतसेना आरूढा। पुष्पकरंडकजाणोद्यानं क्रीडितुं नीयते। इति प्रवहणवाहकेन कथितं। पुन

रपि श्रुतमार्यैः। यदार्य आज्ञापयति। गतोस्मि तत्र। दृष्टं च मया स्त्रीकलेवरं श्वापदैर्विलुप्तं। कथं त्वया ज्ञातं स्त्रीकलेवरमि
ति। सावशेषैः केशहस्तपादिपादैकपल्लिकितं। हंहो। अधिकरणभोजकाः। किंयूयं पक्षपातेन व्यवहारं पश्यत। येना
घापि एषहताश चारुदत्तआसने धार्यते। अनेन मया कृतं पापं अन्यस्य मस्तके निपतितं। तत् यत्र चारुदत्तउपविशा
ति तत्राहं उपविशामि। चारुदत्त। पश्य। पश्य मां। तत् भण। भण। मयामारिताइति। प्रेषितोस्मि आर्यचारुदत्तेन व
संतसेनासकाशं। तत्रालंकरणानि गृहीत्वा। यथा आर्यमैत्रेयो। वसंतसेनाया बत्सीरोहसेनः अलंकारेणालंकृत्य।
जननीसकाशं प्रेषितः। अस्याभरणं दातव्यं। न पुनर्गृहीतव्यं। तत्समर्पयेति। यावत् वसंतसेनासकाशमेव गत्वा
मि। कथं भाव रेणिलः भो। भावरेणिल। किं निमित्तं त्वमुद्विग्न इव लक्ष्यसे। किं भणसि। प्रियवयस्यश्चारुदत्तः अ

धिकरणमंडपं शब्दायते इति; तत् नखलु अत्रेन कार्येण भवितव्यं। तत्पश्चात् वसंतसेनासकाशं गमिष्यामि, अधिकरणमंडपं तावत् गमिष्यामि। अयमधिकरणमंडपः; तत् यावत् प्रविशामि। सुखं अधिकरणभोजकानां, कुत्र मम प्रियवयस्यः? वयस्य स्वस्ति ते। अपि क्षेमं ते। भो वयस्य, किं निमित्तं उद्विग्नः उद्विग्नइव लक्ष्यसे, कुतो वा आहूतः? कथं भणति? एवं किमर्थं न भण्यते गृहं गतेति। भो भो आर्याः; येन तावत् पुरस्थापनविहारारामदेवालयतडागकूपयूपेरलंकृता नगरी उज्जयिनी, सः अनीशः अर्थकल्पवर्तकारणात् ईदृशमकार्यं अनुतिष्ठतीति? अरे रे कुलटापुत्र, राजन्यबालक, संस्थानक, दुःशीलक, नृशंसजन दोषभांड, बहुसुवर्णमंडितमर्कटक, भण, भण, ममायतः यदानीं मम प्रियवयस्यः कुसुमितां माधवीलतामाघ्राय कुसुमार्थं न करोति, आरूढतया पादपस्य दोषो भवतीति,

---

रकथमीदृशमकार्यमुभयलोकविरुद्धं करोति! तिष्ठ रे कुट्टिनीपुत्र, यावदेतेन तवहृदयकुटिलेन दंडकाष्ठेन मस्तकं तेशत खंडं करोमि। रक्षंतु रक्षंतु आर्यमिश्राः; चारुदत्तेन सह मम विवादे, व्यवहारे वा, किमर्थमेष काकपदशीर्षमस्तकः दुष्टवटुकः मम शिरः शतखंडं करोति! मा तावत्, रे दास्याः पुत्र, दुष्टवटुक। पश्यंतु, पश्यंतु आर्याः; एते खलु तस्यास्तस्यास्त्वन्ये अलंकाराः। अस्य अर्थकल्पवर्तस्य कारणाय एषा मारिता व्यापादिता च। भोः। किमर्थं भृत्यार्थो न निष्क्रयते। अत्रहिता तावदार्या, इदं सुवर्णभांडं अवलोकयतु; तदेवेदं नवेति। सदृशएष, एष न पुनः सः। दृष्टः कुट्टिनि, अस्मिन्नर्थे मंत्रितं वाचामूकितं। हताश, अपेहि। अधमत्ते कथयः सएव एष नवेति। आर्य शिल्पिकुशलतया अवश्यभ्रांतिदृष्टिः; न पुनः सः। ननु भणामि। नखलु अन्यत्; अथवा, कदापि शिल्पिना घटितो भवेत्। आर्य चारुदत्तोयान्येना

नि तदा कस्य: कथमेतानि तस्यावियोगे गतानि: आर्य चारुदत्त, अत्र सत्यं वक्तव्यं। पश्य, पश्य, सत्येन सुखं खलु लभ्यते
सत्यालोपेन भवतिपातकं, सत्यमिति हे अक्षरे, मा सत्यं अलीकेन गूहय। उद्यानं प्रवेश्य प्रथमं मारयसि, कपटकापटिक
तया सांप्रतं निगूहसि। व्यापादिता; अरे त्वमपि भण, मया व्यापादितेति। शृणुत, शृणुत, भट्टारका; एतेन मारिता एते
तेनैव संशये छिन्ने एतस्य दरिद्रचारुदत्तस्य शरीरं दंडोधार्यतां। वसीदंतु वसीदंतु आर्यमिश्रा:; यस्तावत् चौरेरपहृत
स्य तदा यदि व्यापादिता मम दारिका, व्यापादिता; जीवतु मे दीर्घायु:। अन्यच्च। अर्थिप्रत्यर्थिनोर्व्यवहार: नचाहमर्थि
नी; तत् मुंचैनं। अपेहि गर्दभासि, गच्छ; किं तवैतेन। हा तात, हा पुत्रक। कृतं मयैतस्य आत्मन: सदृशं, सांप्रतं ग
च्छामीति। यदार्य आज्ञापयति। आर्या, गतोस्मि; तत् राजा पालकोगणाति, येन अर्थकल्पवर्तस्य कारणात् वसंत

व्यापादिता, तं तत्रैव आभरणानि गले बध्वा, डिंडिमं ताडयित्वा, दक्षिणश्मशाने नीत्वा, शूले भेदयत। इति य: को
ऽपरईदृशमकार्यमनुतिष्ठति, स एतेन निकारदंडेन शास्यते। मूले छिन्ने, कुत: पादपस्य पालनं? भो वयस्य, अहं
ते प्रियवस्या भूत्वा, त्वया विरहितान् प्राणान् धारयामि; एवं युज्यते। इत आगच्छतु आर्य: तत्किं न कल्पयत कार
णं नववधबंधनगणे निपुणा: अचिरेण शीर्षच्छेदनशूलारोपेषु कुशलो स्व:। अपसरत, आर्या, अपसरत। एष आ
र्यचारुदत्त: दत्तकवीरसामा गृहीत:, आवाभ्यां वध्यपुरुषाभ्यां, दीपस्य मंदस्नेहक: स्तोकं स्तोकं क्षयं याति।
अपसरत, आर्या, अपसरत। किं पश्यत? क्षिप्यमानं सत्पुरुषं कालपुरुषधाराणि: सुजनशकुनाधिवासं सज्ज
नपुरुषद्रुमभेदं। आगच्छ, रे चारुदत्त, आगच्छ। अपसरत, आर्या, अपसरत, किं पश्यत? इंद्र: प्रवाह्यमाणो, गो

, प्रसवः, संक्रमश्च तारणां, सुपुरुषप्राणविपत्तिश्चत्वार इमे नरेष्याः। अरे, आहीनाः पश्य, पश्य। नगरी प्रधानभूते
वध्यमाने कृतोताज्ञया, किं रोदिति अंतरीक्षं? अथवा अनभ्रे पतति वज्रं? अरे मोहा। नच रोदिति अंतरीक्षं, नैव
अनभ्रे पतति वज्रं, महिलासमूहमेघे निपतति नयनांबुधाराभिः। अपिच॥ वध्ये नीयमाने जनस्य सर्वस्य रुदतः,
नयनसलिलसिक्तो रथ्यातोन उन्नमति रेणुः॥ आगच्छ, रे चारुदत्त, आगच्छ; इदं घोषणास्थानं। आहत डिंडिमं
घोषयत घोषणं। शृणुत, आर्याः, शृणुत; एष सार्थवाहविनयदत्तस्य नप्ता, सागरदत्तस्य पुत्रकः, आर्य चारुद
त्तोनाम; एतेन किल्ला कार्यकारिणा, गणिका वसंतसेना अर्थकल्पवर्तस्य कारणात्, अन्यं पुष्पकरंडकजी
र्णोद्यानं प्रवेश्य बाहुपाशबलात्कारेण मारितेति, एतत्तद्दोषं गृहीतं स्वयं च प्रतिपन्नः; तदा राज्ञा पालकेन व

LIBRARY OF THE BHAU DAJI

यमाज्ञप्तास्ते मारयितुं। यद्यपरैरेष मुग्धलोकविरुद्धमकार्यं करोति, तमपि राजा पालकएवमेव शास्ति। अपसरत, आर्या, अपसरत। एवगुणरत्ननिधिः सज्जनदुःखानामुत्तरणसेतुः, असुवर्णमंडनकं अपनीयतेद्य नगरीतः। अन्यं च॥ सर्वः खलु भवति लोके लोकः सुखसंस्थितानां चिंतायुक्तः, विनिपतितानां नराणां प्रियकारी दुर्लभो भव
ति अघसारणं कृतं विविक्तो राजमार्गः; तदा नयतेनं दत्तवध्यचिन्हं। हा तात हा प्रियवयस्य। किमस्माकं हस्ता
त्प्रतिग्रहं करोषि। एवं क्रियतां। हा तात, हा पितः! हेप्रभुराजनाः, क्षणमंतरं दत्ते एष आर्य-चारुदत्तः पुत्र
मुखं पश्यतु। आर्य इतआगच्छ, रे दारक आगच्छ। त्वरतां, त्वरतां, भद्रमुख; पिता ते मारयितुं नीयते हा पितः,
हा तात! हा प्रियवयस्य, कुत्र मया त्वं द्रष्टव्यः। आगच्छ रे चारुदत्त आगच्छ अरे, आर्य-चारुदत्तं निरूपदे

न नाम्ना आलपसि। अरे पश्य॥ अगुरुये अवधाने तथा च रात्रिंदिवं अर्हतमार्गा॰ उद्दामेव किशोरी नियतिः खलु परोक्षितुं याति॥१॥ अन्यं च॥ शङ्काव्यपदेशाः किमस्य प्रणामितमस्तकेन कर्तव्यं॥ राहुगृहीतोपि न चंद्रो न वंद्यनीयोजनपदस्य॥१॥ अरे॰ अरे चांडालाः॰ कुत्र मम पितरं नयत। दारक॰ न खलु वयं चंडालाः श्वांडालकुले जातपूर्वाः॰॥ यैर्मि भणंति साधु॰ ते पापास्ते चचांडालाः॥१॥ तत्कथं मारयत पितरं। हे दीर्घायुः॰ अत्र राजनियोगः खलु अपराध्यति॰ न खलु वयं। व्यापारयत मां॰ मुंचत पितरं। हे दीर्घायुरयं भणन्॰ चिरं मे जीवतो भद्रमुखा मुंचत प्रियवयस्यं॰ मां व्यापारयत। अपसरत आर्याः॥ किं पश्यत सत्पुरुषं अपराधवशान्न नष्टजीवाशं॰॥ कूपे खनितपाशं कांचनकन्यसमं मुंजंतं॥१॥ अरे पुनरपि घोषय। कथम

पापश्चारुदत्तो व्यापाद्यते अहं निगडेन स्वामिना बध्यः। भवतु॰ आक्रंदामि। शृणुत॰ आर्याः शृणुत। अस्मिन् इदानीं मया पापेन प्रवहणपरिवर्तने पुष्पकरंडकजीर्णोद्यानं वसंतसेना नीता॰ ततो मम स्वामिना मां न कामयसे इति रुष्टा॰ बाहुपाशबलात्कारेण मारिता॰ न पुनरेतेनार्येण। कथं॰ विदूरतया न कोपि शृणोतु। तत्किं करोमि। आत्मानं पातयामि॰ यद्येवं करोमि, तदा आर्यचारुदत्तो न व्यापाद्यते। भवतु॰ अस्याः प्राणरक्षायत्नतोलिकातः स्तेन जीर्णगवाक्षेण आत्मानं निक्षिपामि। वरं अहमुपरतो॰ न पुनरेषकुलपुत्रविहगानां वासपादपः आर्यचारुदत्तः। एवं यदि विषये लब्धो मया परलोकः आश्चर्यं नोपरतोस्मि॰ भग्नो मे दंडनिगडः॰ तच्चांडालघोषं समन्वेषयामि। हंहो चांडालाः। अरे कः अंतरं याचते। स्थावरक॰ अपि सत्यं

भणसि: सत्यं; अहमपि मा कस्यापि कथयिष्यसीति प्रासादबालायतौलिकादंडनिगडेन बध्वा निक्षिप्त:।
मांसेन तिक्ताम्लेन शाकेन सूपेन समत्स्यकेन भुक्तं मया आत्मनएव गेहे शारदा कुलेन गुडौदनेन॥९॥
गिंभिकास्यवत्सं रणाया: चोंडालवाचाया: स्वरसंयोग:॥ यथा चैष उद्घोषो वध्यडिंडिमशब्द: परहानौ च श्रू
यते, तथा तर्कयामि, दरिद्रचारुदत्तकोवध्यस्थानं नीयते इति। तत्रश्रुत्वा। शत्रुविनाशेन मम महान् हृदयस्य प
रितोषो भवति। श्रुतंच मया योहि किल शत्रुं व्यापाद्यमानं पश्यति तस्यान्यस्मिन् जन्मांतरे अक्षिरोगोन भ
वति। मया खलु विषयंथिगर्भप्रविष्टेनैव कीटकेन किमपि अंतरं मृग्यमाणेन उत्पादितं, तस्य दरिद्रचारुदत्तस्य १८९
विनाशं संप्रतं आत्मीयायां प्रासादबालायप्रतोलिकायां अधिरूढात्मन: पराक्रमं। कितैकं पश्यामि एत

स्य दरिद्रचारुदत्तस्य वध्यमानस्य एष वृत्तोजनसंमरो; यस्यां वेलायां अस्मादृश: प्रवरोवरमानुषो वध्यं नीयते, तस्यां
वेलायां कीदृशं भवेत्। कथमेष स नवघटीवर्द्धइव मंडितो दक्षिणां दिशं नीयते। अथ किं निमित्तं मदीयाया: प्रासा
दबालायप्रतोलिकाया: समीपे घोषणा निपतिता निवारिता चकथं स्थावरकश्चेटोपि नास्ति: इह मा नामतेन
इतोगत्वा मंत्रभेद: कृतोभविष्यति। तत् यावदेनमन्वेषयामि। भट्टारक, एष स आगत:॥ अपसरत, दत्तमार्ग, द्वा
रं पिधत्त, भवत तूष्णीका:॥ अविनयतीक्ष्णविषाणो दुष्टबलीवर्द्दइतएति॥२॥ अरे, अरे, अंतरमंतरं देहि। पु
त्रक स्थावरक, चेटक, एहि गच्छाव:। वितर्के: अनार्य, वसंतसेनां मारयित्वा नपरितुष्टोसि; संप्रतं ब्राह्मणिजन
कलत्रपादपं आर्यचारुदत्तं मारयितुं व्यवसितोसि। नहि रत्नकुंभसदृश: अहं स्त्रियं व्यापादयामि। अहो, त्वया मा

रिता, न चारुदत्तेन। कथं भणति। ननु एष साधुः। हंत, कथं स्थावरकश्चेटः सुष्ठु नमया संयतः। एष खलु मम अकार्यस्य साक्षी। एवंतावत् करिष्यामि। अलीकं, भट्टारकाः अहो, एष चेटः सुवर्णचोरिकायामया गृहीतस्ताडितः भारितश्च एवश्च, तत्कृतेचेर एष, यत् भणति, किं सर्वं सत्यं? पुनरेव स्थावरक चेट, एतद्गृहीत्वा अन्यथा भण। पश्यत, भट्टारकाः, अहो सुवर्णेन मां प्रलोभयति। एतत् तत्सुवर्णकं यस्य कारणाय मया बद्धः॥१॥ हंहो, चंडाल, मया खलु एष सुवर्ण भांडारे नियुक्तः, सुवर्णं चोरयन् मारित्वा ताडितः। तत् यदि न प्रत्ययध्वं, तदा एष तावत्पश्यत। शोधनं भणति। विनष्ट श्चेटः किं न प्रतपति। हंत! ईदृशा दासभावो यत् सत्यं कमपि न प्रत्याय्यते। आर्य चारुदत्त, एतावान् मे विभवइति। भट्ट क, ताडयित्वा एनं चेटं निष्काशय। निःसर रे। अरे चांडालाः किं विलंबध्वं, मारयतैनं। यदि त्वरयसे तदा स्वयमेव मारय।

चांडालाः, मां मारयत, मंचत पितरं। सपुत्रमेव एनं मारयत। किं गया गतेन कर्तव्यं। भोवयस्य एवं त्वया ज्ञातं, त्वयाहि नाहं प्राणान् धारयामीति। युक्तं नेदं। तथापि न शक्नोमि प्रियवयस्य विरहितः प्राणान् धर्तुं इति; तन् ब्राह्मणेये दारकं समर्प्य प्राणपरित्यागेन प्रियवयस्य मनुगमिष्यामि। भो वयस्य परानयामि एतं लघु। अरे ननु भणामि सपुत्रकं चारुदत्तं व्यापादयतेति॥ अरे न त्वस्माकमीदृशी राजाज्ञप्तिः, यथा सपुत्रं चारुदत्तं व्यापादयतेति; तस्मात् निष्क्रम रे। दारक। इदं तृतीयं घोषणास्थानं, ताडयत डिंडिमं। कथमेते न प्रत्ययंते पौराः। अरे चारुदत्त, स्वयं वधुक, न प्रत्ययते। एष पौरजनः, तदाकर्णयया जिह्वया भण, मया वसंतसेनिका मारितेति। अरे चांडाल गोह, नाभणति चारुदत्त स्वयंवधुकः। तद्गृणयत अनेन जर्जरवंशखंडेन शृंखलेन ताडयित्वा। भो चारुदत्त भण। व्यापादिता। अरे, तव वध्यपालिका

अरे तव। अरे लेरवं कुर्मः। अरे यदि मम मदीयवध्यपालिका, तरा तिष्ठतु तावत् मुहूर्तं। किं निमित्तं। अरे भणितोस्मि पि
त्रा स्वर्गं गच्छता, यथा, पुत्रवीरक, यदि तव वध्यपाली भवति, मा महेसेव व्यापादयसि वध्यं। अरे किंनिमित्तं। कदापि को
पि साधरर्थं दत्वा वध्यं मोचयति; कदापि राज्ञः पुत्रो भवति तेन वस्थिमहोत्सवेन सर्ववध्यानां मोक्षो भवति; कदापि ह
स्ती बंधं खंडयति तेन संभ्रमेण वध्यो मुक्तो भवति; कदापि राजपरिवर्तो भवति तेन सर्व वध्यानां मोक्षो भवति। किं किं
राजपरिवर्तो भवति। अरे, वध्यपालिकायालेरवं कुर्मः। अरे, शीघ्रं मारयत चारुदत्तं। आर्य चारुदत्त राजनियोगः खं
लु अपराध्यति, न खलु वयं चांडालाः; तस्मरयत स्मर्तव्यं। अरे इदं दृश्यते दक्षिणश्मशानं यत्रैस्य वध्याश्छिद्यंति
प्राणान् मुंचंति पश्य॥ अर्धं कलेवरमतिरक्तं कर्षंति हीर्घगोमायवः॥ अर्धमपि शुक्लवस्त्रं वेशमिवाट्टहासस्य॥ २॥



न तावद्गमिष्यामि चारुदत्तकं व्यापाद्यमानं तावत्पश्यामि। कथमुपविष्टः। चारुदत्त, किं भीतोसि? आर्य चारुदत्त,
गगणतले प्रतिवसंतो चंद्रसूर्यौ विपत्तिं लभेते; किं पुनर्जनामरणभीरुकामानवा वा; लोके कोप्युत्थितः पतति,
कोपि पतितोप्युत्तिष्ठते। उत्तिष्ठतः पतनंच वसनपातिका शवस्य पुनरस्ति। एतानि हृदये कृत्वा संधारयात्मानं
। एतत् चतुर्थं घोषणास्थानं, उद्घोषयामि॥ आश्चर्यं! प्रस्थानपरिश्रांतो समाश्वास्य वसंतसेनिकां नयन् अनु
गृहीतोस्मि भवत्यया; उपासिके, कुत्र त्वां नेष्यामि? आर्य चारुदत्तस्येव गेहं; तस्य दर्शनेन मृगलांछनस्येव
कुमुदिनी आनंदय मां। कतरेण मार्गेण प्रविशामि। राजमार्गेणैव प्रविशामि। उपासिके, एहि इमं राजमार्गं
। किं नु खलु एष राजमार्गे महान् कलकलः श्रूयते। कथं पुरतो महान् जनसमूहः; आर्य जानीहि तावत् किं



नेदमिति। विषमभराक्रांताइव वसुंधरा एकवासोव्रता उज्जयिनी वर्तते। इदं च पश्चिमं घोषणास्थानं; तत्ताडयत इमं; उद्घोषयत घोषणां। भो चारुदत्त, अति शीघ्रमेव त्वं मार्यसे। उपासिके, त्वं किल चारुदत्तेन मारितासीति, चारुदत्तो मारयितुं नीयते। हा धिक्, हा धिक्; कथं मम मंदभागिन्याः कृते आर्यं चारुदत्तो व्यापाद्यते। भो त्वरितं, भो त्वरितं, आदिश मार्गं। त्वरतां, त्वरतां, बुधोपासिका, आर्यचारुदत्तं जीवंतं समाश्वासितुं। आर्या, अंतरमंतरं दत्ते। अंतरमंतरं। आर्य चारुदत्त स्वामिनियोगः अपराध्यति, तत् स्मर यत् स्मर्तव्यं। आर्य चारुदत्त, उत्तानो भूत्वा, समं तिष्ठ; एकप्रहारेण मारयित्वा तो स्वर्गं नयामः॥ आरुष्टः सरोषं मुष्टामुष्टिना गृहीतोपि धरण्यां किमर्थं पतितो दारुणाकोशनिसन्निभः खड्गः। यथा एतत्संवृत्तं तथा तर्कयामि, न विपद्यते आर्य

चारुदत्तइति। भगवति सह्यवासिनि, प्रसीद, प्रसीद; अपि नाम चारुदत्तस्य मोक्षोभवेत् तदानुगृहीते त्वया चंडालकुलेभवेत्। यथाज्ञप्तमनुतिष्ठावः। भवतु एवंकुर्वः। आर्या, मा तावत्; आर्या, एषा अहं मंदभागिनी यस्याः कारणादेष व्यापाद्यते। त्वरितं कापुनरेषा अंसपतता चिकुरभारेण, मामिति व्याहरंती, उत्थितहस्ता इतएति। आर्य चारुदत्त, किं नेदमिति। आर्य चारुदत्तस्य, किं नेदमिति। कथं वसंतसेना ननु खलु अस्माभिः साधुर्न्यापादितः। अरे जीवति चारुदत्तः, जीवति वर्षशतं प्रत्युज्जीवितास्मि। यावदेतं वृत्तांतं राज्ञोयज्ञवाटगतस्य निवेदयावः। विस्मयः, केन गर्भदासी जीवनं प्रापिता, उत्क्रांता मे प्राणा, भवतु पलायिष्ये। ननु अस्माकमीदृशी राजाज्ञप्तिः, येन सा व्यापादिता तं मारयत तत राष्ट्रियइयालमेवान्वेषयावः। आर्य चारुदत्त, सैवाहं पापा, यस्याः कारणादियं।

त्वया असदृशीअवस्थाप्रापा। आश्चर्ये, आश्चर्ये, जीवति वसंतसेना। सेवाहं मंदभाग्या। अति दक्षिणतया किंनेदं व्य
वसितमार्येण। शांते, पापं; तेनास्मि राजश्यालेन व्यापादिता। तेनानार्येण व्यापादिता; एतेन आर्येण जीवं प्रापिता
स्मि। न प्रत्यभिजानाति मामार्यः। अहं स आर्यस्य चरणसंवाहचिंतया संवाहको; द्यूतकैरवेगृहीतः; एतया उपासिक
या आर्यस्यास्त्रीयइति अलंकारपणनिष्क्रीतोस्मि। तेन च द्यूतनिर्वेदेन शाक्यश्रमणकः संवृत्तोस्मि। एषापि आर्या
प्रवहणविपर्यासेन पुष्पकरंडकजीर्णोद्यानं गता, तेन चानार्येण नमां बहु मन्यसेइति बाहुपाशबलात्कारेण मा
रिता, मया दृष्टा। विस्मये। एवं दूरमतिक्रांत, उद्दामइव गर्दभः; आनीतः खल्वहं बत्थः कुकुरान्यवदुष्करः। समंततउ
पस्थितः स राष्ट्रियबंधः। तत्कमिदानीमशरणः शरणं प्रव्रजामि। भवतु; तमेवाभ्युपपन्नशरणरक्षणं गच्छामि। आर्य

चारुदत्तपरित्रायस्व, परित्रायस्व। आर्य चारुदत्त, मुंच, मुंच; व्यापादयाम एनं। भो अशरणशरण, परित्रायस्व। भट्टारकचा
रुदत्त शरणागतोस्मि, तत्परित्रायस्व; यत्तव सदृशं तत्कुरु; पुनर्न ईदृशं करिष्यामि। व्यापादयत किं निमित्तं पातकीजी
व्यते। गर्भदासीपुत्रि प्रसीद, न पुनर्मोरयिष्यामि, तत्परित्रायस्व। विस्मये! प्रत्युज्जीवितास्मि। इतः परं नीलकंठेनापूरि।
एषा आर्य चारुदत्तस्य वधूरार्या धूता, परे वसनांचलेविलगंतं दारकमाक्षिपंति, वाष्पभरितनयनेनांचलेनिवार्यमाणा, प्र
ज्वलिते पावके प्रविशति। किं न पश्यति आर्यो महाराजप्रसादं दक्षिणेन महान् जनसंमर्दो वर्तते। कथितंच मया तस्येय
था, आर्येमा साहसं कुरुष्व, जीवति आर्यचारुदत्तइति; परंतु दुःखव्याप्ततया कःशृणोति कःप्रत्ययते। समाश्वसितु
आर्यः, तत्र गत्वा जीवयतु आर्यां, अन्यथा अधीरत्वेनानर्थः संभाव्यते। इत इत आर्यः। तात मुंच मां; मा शिघ्रं कुरुष्व,

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

बिभेमि आर्यस्या मंगलाकर्णनात्। हा आर्ये प्रतिपालय मां। त्वया विना न शक्नोमि जीवितं धर्तुं। भवत्या स्तावत् ब्राह्मण्या अग्निप्रवेशेन चितारोहणं पापमुदाहरंति ऋषयः। वरं पापाचरणं, नपुनरार्यपुत्रस्यामंगलाकर्णनं। रदनिके, अवलंबस्व दारकं। यावदहं समीहितं करोमि। अहमपि यथोपदेशिन्यस्मि भट्टिन्याः। आर्यस्तावदवलंबतु। समीहितसिध्ये प्रयत्नेन, ब्राह्मणेन कर्तव्यः, अतोभवत्या अयुक्तीर्भणामि। कथं प्रत्यादिशस्मि हार्यां। तात, त्वमेव पर्यवस्थापयात्मानं अस्माकं तिलोदकदानाय अतिक्रांतं किं मनोरथैः। न खलु आर्यपुत्रस्त्वां पर्यवस्थापयिष्यति आश्चर्यं, आर्यपुत्रस्येव स्वरसंयोगः। दिष्ट्या आर्यपुत्र एवेषः, प्रियं मे प्रियं मे। आश्चर्यं, पिता मां परिष्वजति, आर्ये वर्धसे, जनकएवमां पर्यवस्थापयति। आर्यपुत्र, अतएव सा अचेतनेति चुंब्यते। आश्चर्यं, एताभ्यामेवाशिष्यां प्रियवयस्यः प्रेष्यते, अहो सत्याः प्रभावो, यतोज्वलनप्रवेशव्यवसा

येनैव प्रियसमागमं प्रापितो। जयतु, जयतु, प्रियवयस्यः। अहो संविधानं, आर्ये वंदे। दिष्ट्या कुशलिनी भगिनी। अधुना, कुशलिनी संवृत्तास्मि। यत्सूर्योदयभयतः कविनो चितपात्रमेलनं न कृतं, तत्सुरतयुक्तिभिरत्वयदाचंदनकोक्तिनीलकंठस्तत्। आर्ये कृतार्थोस्मि। संवृत्ता। इदमीदृशमनित्यत्वं प्रेक्ष्य, द्विगुणतरोमम ब्रह्मण्यायावहुमानः संवृत्तः॥ समाप्तमंकमात्रं कृत्वा॥

दुरात्मनः